॥ श्रीः ॥

अरशाणिपालै वेङ्कटाध्वरीति प्रसिद्धैः

श्रीवेङ्कटाचार्यदीक्षितैः

विरचितं

विधित्रयपरित्राणम्

श्रीवेङ्कटेश्वरप्राच्यमहाविद्यालयन्यायमीमांसाध्यापकेन

न्यायमीमांसोभयशिरोमणिना

शब्दवङ्गीशवंश्येन

को. शठकोपाचार्येण

परिशोध्य परिष्कृतम्

तत्पुत्रेण व्याकरणशिरोमणिना साहित्याचार्येण

डा. के. अनन्तेन, एम.ए., पीएच.डी.

आङ्गभाषोपोद्घातादिभिः परिष्कृत्य प्रकाशितम्

1997

॥ श्रीः ॥

अरशाणिपालै वेङ्कटाध्वरीति प्रसिद्धैः

श्रीवेङ्कटाचार्यदीक्षितैः

विरचितं

विधित्रयपरित्राणम्

श्रीवेङ्कटेश्वरप्राच्यमहाविद्यालयन्यायमीमांसाध्यापकेन

न्यायमीमांसोभयशिरोमणिना

शब्दवङ्गीशवंश्येन

को. शठकोपाचार्येण

परिशोध्य परिष्कृतम्

तत्पुत्रेण व्याकरणशिरोमणिना साहित्याचार्येण

डा. के. अनन्तेन, एम.ए., पीएच.डी.

आङ्गभाषोपोद्घातादिभिः परिष्कृत्य प्रकाशितम्

1997

First Edition : 1954

Revised Edition : 1997

All Rights Reserved with T.T.D.

Price : **80-00**

Copies can be had of :

1. **Mrs. A. Rajalakshmi**
   "Sreevalsam"
   Elappully Village
   Palakkad, Kerala-678 622

2. **Mr. K. Seshadri**
   "Bharadwaj"
   No.7, N.R.N. Colony
   Villivakkam,
   Madras-600 049.

Lasertype & Printed at :
V.K.N. Enterprises,
8/1, Dr. Rangachari Road, Mylapore, Madras-4 Ph: 4950775

|| श्रीः ||

VIDHITRAYA-PARITRĀṆAM

Of

VEṆKATĀDHVARIN

Edited with an Introduction

by

Dr. K. ANANTHA, M.A.Ph.D.

Lecturer in Vyakarana

Sree Sankaracharya University of Sanskrit

Kalady

PREFACE

It was about 45 years ago that the long-felt necessity of an edition of the rare text **"Vidhitraya-paritranam"** of Sri Venkatadhavarin was presented before the scholarly world by my revered father late **Kozhiyalam Satakopacharya.** This first edition was brought out by the T.T. Devasthanams, Tirupathi, is out of print right now. A second edition is being brought out with their kind permission. In this edition some changes have been made with a slight revision in the presentation and the addition of a few notes. I have prepared the edition with a detailed introduction in English keeping in view the students of Pūrva-mīmāṁsā and the non-academic scholars. A fairly exhaustive index has been added which I hope, will be found useful.

I take this opportunity of expressing my deep and sincere thanks to the T.T. Devasthanams, Tirupathi for having permitted me to bring out the second edition.

My Teacher, Shri U.Ve. V. Srivatsankachariar, Retired Principal of The Madras Sanskrit College, Mylapore, Madras-4 a profound scholar and a well known authority on Purva-mīmāmsā, Vyakarana and Visishtadvaita Vedantha has written a learned and appreciative foreword in Sanskrit which considerably enhances the value of the book. I am very grateful to him for his valuable contributions.

I take great pleasure in thanking Sri Dr. P. Narasimhan for his assistance in preparing the introduction. No words of mine are adequate to express my obligation to him.

I express my profound gratitude to Shri Dr. M. Narasimhachary, M.A. Ph.D. Prof. and Head, Dept. of Vaishnavism, University of Madras, for enriching the volume

with his valuable foreword. My sincere thanks are also due to Sri P.S. Ramanathan, (L.I.C. of India, Palakkad) for his inspiration and valuable suggestions throught this work.

It is also my sacred duty to express my deep debt of gratitude to my brothers Sri K. Seshadri & Sri K. Srinivasan who inspired and encouraged me to take up this work. I would like to make special thanks to my Cousin Mr. V. Narayanan (S. Navalpakkam) who has helped me a lot in many ways to bring out this book.

I should like to make special mention of Shri S.N. Varadarajan, Managing Director (Indsil, Coimbatore) and Sriman N.S. Narasimhan, Mumbai, for their munificent financial assistance, but for their kindness, it would have been almost impossible for me to fulfil my task. Besides, I was assisted in various ways by a kind host of friends. My respectful pranamam are due to them. I thank M/s. V.K.N. Enterprises, Madras-4 for their best efforts in getting the book neatly printed.

Palakkad **Kozhiyalam Anantha**

॥ श्रीः ॥

अभिनन्दनम्

[श्री.उ.वे पैयम्बाडि चेट्टलूर् वा. श्रीवत्साङ्काचार्यः, भूतपूर्वप्रांशुपालः, मद्रास् संस्कृतकलाशाला, महिलापुरी, मद्रास्-६०००४]

महदिदं प्रमोदस्थानम् - यदुत अतीते गणरात्रे मुद्रितस्य विधित्रयपरित्राणाख्यस्य ग्रन्थस्य पुनर्मुद्रणं भगवत्सङ्कल्पादद्याभूदिति। पूर्वमीमांसायाम् मन्त्राधिकरणे (1.2.4) अपूर्वविधिः नियमविधिः परिसंख्याविधिरिति त्रीन् विधीन् अधिकृत्य प्रथमतः **कुमारिलभट्टैः** स्वरूप-लक्षणोदाहरणप्रदर्शनपूर्वकं विवेचितम्। तदनु विधिविवेकः इत्यादिषु मण्डनमिश्रादिभिर्महता आडम्बरेण एतद्विषये स्वस्वप्रज्ञाप्रकर्षः प्रादर्शि। तदनु चिरस्य प्रसिद्धैर्महद्भिः नानातन्त्रनिष्णातैर्मीमांसकमूर्धन्यैः सुगृहीतनामधेयैः **श्रीमदप्पय्यदीक्षितैः** विधिरसायननामके स्वीये पद्यात्मके निबन्धे तद्व्याख्यारूपेण तैरेव निर्मिते **विधिरसायनसुखोपजीविनी**नामके ग्रन्थे च कुमारिलप्रदर्शितानां विधिलक्षणानां विस्तरेण दूषणमभिहितम्। यद्यपि तैरेव स्वग्रन्थेऽन्ते स्वेनैवाक्षिप्तानां दूषणानामुद्धरणमपि सङ्ग्रहेण कियदिव कृतं वर्तते।

''विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधिस्रोतसाम्
आचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः।
किं तत्रास्ति विचार्यम्? आर्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे॥''

इति ग्रन्थारम्भपद्ये तैरभिहितत्वाच्च तेषां कुमारिलदूषणे न व्यग्रता इत्यपि वक्तुं शक्यते। तथाऽपि आन्तं ग्रन्थं तमधीयानानां प्राचीनमार्गदूषणैदम्पर्यमेव तेषामिति स्फुटम्। व्याकरणाधिकरणे अन्ते वैयाकरणानां मान्यत्वं अगतिकगत्या स्वीकृतं कुमारिलैः इति स्थितेऽपि, पूर्वपक्षे तत्रैवाधिकरणे साग्रहं पाणिनि-कात्यायन - पतञ्जलिप्रभृति।

परमर्षिदूषणं, तदुक्तिष्वेव विस्तरेण अपशब्दान् अन्विष्य सोपहासं पङ्क्तिकाप्रदर्शनपूर्वकं स्थापनम्, इत्यादिकं दृष्टवतां कुमारिलस्य व्याकरणशास्त्रे, विशिष्य तत्प्रवर्तकपरमर्षिविषये च कियान् द्वेष इति स्पष्टम्। तद्वदत्रापि विधिरसायने गुडजिह्विकान्यायेन कुमारिलमण्डनव्याजेन खण्डनमेव कृतम् इति करतलामलकवत् स्फुटं कृतधियाम्। गच्छति काले विधिविचारेऽवतीर्णाः विपश्चितः विधिरसायनखण्डने मण्डने च सुदूरं व्यापृतवन्तः। दुरूहशिक्षानाम्नि ग्रन्थे यद्यपि विधिरसायनोपरि प्रदर्शितानां केषाञ्चिद् दूषणानामुद्धारः कृतः, तथाऽपि विधिदर्पणोक्तादोषाः एव तत्रोद्धृताः। यैर्महामीमांसकैः ''मीमांसकमूर्धन्यः'' इति स्वग्रन्थे साभिमानं प्रशंसिता अप्पय्यदीक्षिताः- तैः खण्डदेवैरपि भाट्टदीपिकायां मीमांसाकौस्तुभे च विधिरसायनोक्ता विषयाः साग्रहं विमृष्टाः, तैः प्रदर्शिताः दोषाश्च यथासम्भवमुद्धृताः इति अस्माकं चित्तवृत्तिर्विस्मिता। मद्रनगरप्राच्यकोशालयप्रभृतिषु कोशालयेषु विधिरसायनग्रन्थखण्डनेदम्परा एव ग्रन्था बहुलमुपलभ्यन्ते। द्वित्रा एव मण्डनोन्मुखाः। तत्र च निदानम् — ''व्यवहारे भाट्टनयः'' इत्यभ्युपगच्छतां कूटस्थसम्प्रदायविरुद्धया प्रक्रियया दूषणलालसतैवेति वृद्धा विदामासुः। यद्वा तद्वा भवतु। कुमारिलप्रदर्शितोऽध्वैव निष्कण्टक इति स्थापनार्थेयं कृतिः विश्वविख्यातवैदुष्यैः विश्वगुणादर्शचम्पूप्रभृतिकैः काव्यैः, लक्ष्मीसहस्राद्यैः पद्यात्मकैः स्तुतिनिबन्धनैश्च प्रथितवैभवातिशयैः **आत्रेय - वेङ्कटाध्वरिभिः** प्रायः सार्धत्रिशतसंवत्सरेभ्यः पूर्वं लीलाविभूतिमिमामलङ्कृतवद्भिराचिता।

तालपत्रेष्वेव वम्रिभिर्भक्ष्यमाणोऽयं ग्रन्थ आसीत्। पञ्चचत्वारिंशत्संवत्सरेभ्यः प्राक् अस्मन्मातुलैः न्यायमीमांसादि-शास्त्रानवरतावगाहनसार्थजन्मभिः अध्यापितसच्छिष्यनिकुरुम्बैः सत्सन्तानप्रसूतैः सदाचार्यकटाक्षलब्धसत्ताकैः सदाचारशीलैः विलक्षणधिषणाशालिभिः श्री कोलियालं शब्दम् वङ्गीपुरम् वाजपेयम् घनपाठि श्रीनिवासाचार्यतनूजैः श्रीतिरुपतिदिव्यक्षेत्रस्थ- श्रीवेङ्कटेश्वर-

संस्कृतमहाकलाशालायां न्यायमीमांसाध्यापकपदवीं अधिष्ठितवद्भिः श्री **को. शठकोपाचार्यैः** महता प्रयासेन बहुग्रन्थपरिशीलनपूर्वकं अनेकतालपत्रसंवादप्रदर्शनपुरस्सरं इदंप्रथमतया प्राकाश्यमानीयत। एभिरेतद्ग्रन्थप्रकाशनावसरे कियान् परिश्रम ऊढः? कियती अमीषां वैदुष्यवैखरी? कति वा ग्रन्था अमुद्रितास्तालमात्रशरणा अमीभिरामृष्टाः? इत्यादिकमेतैरारचिते अत्रत्ये उपोद्घाते एव विशदमनु-सन्धेयम्। "सूते सूकरयुवतिः सुतशतम् अत्यन्तदुर्भगं झटिति। करिणी चिराय सूते सकलमहीपाललालितं कलभम्॥" इति आचार्यसार्वभौम-**श्रीमन्निगमान्तमहागुरु**सूक्तिरेतद्ग्रन्थस्याध्यनानन्तरं सत्यापितेति व्यक्तं विदुषाम्। अद्यत्वे पूर्वग्रन्थेभ्यः सारतमं भागमनूद्य स्ववाक्यत्वेन तान् आयोज्य तेषां नामापि अप्रकाश्य स्वोपज्ञं ग्रन्थो निर्मित इति ये लोकानिह वञ्चयन्ति - ते कुत्र? पृथक् स्वतन्त्रग्रन्थव्यपदेशार्हसमीचीनार्थ-विमर्शपुरस्सरोपाद्धातविलेखका इमे क्व? आस्तामेतत्।

चिरात् लुप्तप्रायप्रचारस्यास्य ग्रन्थस्य पुनर्मुद्रणेन शास्त्ररसिकेभ्यः सुमहदुपकृतं चिरायुषा श्रीमता **अनन्तेन।** अयं श्रीशठकोपाचार्याणां पूर्वोक्तानामात्मजः, अस्मत्तोऽधीतव्याकरणवेदान्तादिकः वर्धिष्णुः समुत्सुकः पितृभक्तः सहृदयः। केरलस्थे श्रीशङ्कराचार्य-विश्वविद्यालयेऽध्यापकोऽयं प्राचीनग्रन्थप्रचारव्यग्रः। लौकिकरीत्या M.A. PH.D इत्याद्युपाधिपूर्णोऽप्ययं यथावकाशं प्राच्यग्रन्थपठने पाठने शोधने प्रकाशने च व्यासक्तः। वर्धतामभिवर्ध-तामस्य प्रशस्याः व्यापाराः।

पैयम्बाडि. चेट्टलूर्. वा॰श्रीवत्साङ्काचार्यः

ईश्वर कन्या श्रवणम्
D. 200 हिन्दू कालनी
नङ्गनल्लूर्. चेन्नै. ६०००६१

Foreword

Prof. M. NARASIMHACHARY, M.A., Ph.D
Prof. and Head, Dept. of Vaishnavism
University of Madras-600 005.

I am extremely delighted to write this Foreword to the **Vidhitrayaparitrānam,** a Mīmāṁsā-work composed by the post-Deśika polymath, "śleṣa-yamaka-cakravartin". Śrī Veṇkaṭādhvarin of the 17th century. He is supposed to have written 108 works, of which only a few like the Viśvaguṇādarśacampú, Lakṣmīsahasra, Yādavarāghavīya, Uttaracampū, Varadābhyudayacampu, the Pradyumnānanda and the present work have been published. Still a few await publication while a majority of the works are lost due to the ravages of time. The present publication is an important augury for the revival of studies in Mīmaṁsā which has become a neglected **śāstra.** It is heartening to know that the late-lamented Sriman kozhiyalam Satakopacharya Swamin, Professor of Nyāya and Mīmāṃsā in the Sri Venkatesvara Oriental College, Tirupati, prepared a reliable Edition of this work on the basis of two palm-leaf manuscripts available, of which, only one manuscript was practically useful. He publised it way back in 1954 for the benefit of all interested in this **śāstra** with a very scholarly and informative Introduction in Sankrit. It is very heartening to note that Dr. K. Anantha, son of the illustrious swamin, presently working in the Sri Sankaracharya University of Sanskrit, Kaladi (Kerala) as a "labour of love" towards his famous father, is bringing out the second edition of this rare work, which has been a long-felt desideratum.

The **Vidhitrayaparitrānam,** of Veṇkaṭādhvarin is a counter to Śri Appayya Dīkṣita's **Vidhirasāyanam** which contradicts the definitions given by Kumāraila Bhaṭṭa for the three types of Vidhi, viz., **Niyamavidhi** (Injunction of Restriction),

Apūrvavidhi (Injunction of originality) and **parisaṅkhyāvidhi** (Injunction of Exclusion), in his **Tantravārtika** (I.2.4)

The relevant verse which defines these three types of Vidhi is:

"Vidhir atyantam aprāpte, niyamaḥ pākṣike sati
tatra caānyatra ca prāptua parisaṅkhyeti gīate".

This may be translated thus: "A new Injunction is said to operate when something so far non-established is ordained. An Injunction of Restriction iṣ found when a matter is not established as an alternative. And when the establishment is there and elsewhere simultaneously, the Injunction of Exclusion finds its operation. The illustrations given for these are -- "Vrīhin prokṣati" "Vrīhīn Avahanti" and "Gṛhamedhīye pañcame pakṣe" respectively.

Appaya Dīkṣita the celebrated polymath (A.D. 1520-1593) seems to have been the first scholar to criticise this well-known definition of Kumārila Bhaṭṭa. In his **Vidhirasāyanam** along with an auto-commentary **Sukhopajīvinī,** Dīkṣita tries to show that all the three definitions suffer from fallacies like being too narrow **(avyāpti)** and being too wide **(ativyāpti).** Then he tries to give his own stand from a verse of the Introductory portion, Dikṣitā's intention was not to controvert Kumarila's definitions of **vidhis.** It was more a scholarly exercise for the education and enlightenment of those interested in the matter that he did so, than an actual refutation. The whole exercise is calculated to make one's under-standing of the subject deeper and unassailable.

Whatever be his intentions, subsequent to Dīkṣita's work, there appeared a number of works small and large; tried to refute Dīkṣita and justify Kumārila, and some tried to justify parts of Dīksita's stand-point. On the refutation side of Dīkṣita

we have the **Mīmāṃsākaustubha** and **Bhāṭṭadipikā, Vidhi rasāyanadūsana** of Śaṇkarabhaṭṭa, **Vidhibhūṣaṇa** of Veṅkaṭanārāyaṇa **Vidhicamatkāracandrikā** of Nāyanārya and the **Vidhidarpaña** of Kollūri Nārāyaṇa and the **Vidhidarapaṇa** of Kollūri Nārāyàṇa Śāstrin. On the defence side of Dīkṣita we have the **Vidhiviveka** of Rāmeśvarsūri, and the **Vidhi rasāyanadūṣaṇoddhāra** (alias **Durūhaśikṣā** of Appaya Dīkṣita II.

It is against this background that the **Vidhitrayaparitrānan** of Veṅkaṭādhvarin deserves to be studied and appreciated. This is a small work comprising 30 verses accompanied by a lucid commentary by the author himself. It is divided into three **paricchedas,** each of which is devoted to one particular **Vidhi.** Each section or chapter opens with a statement of the objection raised by Appayya Dīkṣita, and provides the **siddhānta**-view of the author. This is followed by a detailed examination of all the points raised by the critic, and an attempt to apply the definitions to the illustrations given by Kumārila. Then follows a brief definition of each **vidhi.** This is the **modus operandi** adopted by the author. In the course of this, he also refutes the views expressed by the earlier writers like Khaṇḍadeva on certain issues.

It is a matter of immense satisfaction that the present publication comes as a boon to many interested in Mīmāṁsā. As noted earlier, it is a matter of regret that the study of **śāstras** like Nyāya and Mīmāṁsā, sāṅkhya and Yoga is slowly relegated to the back-ground. There again the position of Mīmāṁsā-studies may be described as "dismal". In the Oriental Colleges and Vidyāpeeṭhas the study of Mīmāṁsā as a subject is not evoking much response. There is more enrolment for sujects like sāhitya and Vedānta than for **śāstras.** The reasons for the neglect of Mīmāṁsā in particular, are not far to seek. In these modern days, very few people have the interest, time

or wherewithal to perform Vedic rituals. Mīmāṁsā is directly related to this particular practical aspect of Vedic literature. Mere study of the theoretical aspect with practically no support from the practical aspect will never be of an any utility. It is therefore the bounden duty of every right-thinking person to do all that lies in his/her power to resuscitate and revive the study of this much neglected **śāstra.** Otherwise, there is the grave danger of this **śāstra** completely disappearing from its own land of origin. Small efforts like the present one go a long way in reviving interest in the studies of this śāstra, in slow but sure measures.

I am therefore all admiration for the efforts taken by the young and promising Dr. K. Anantha, who as a visionary, is reissuing the **Vidhitrayaparitrāṇam** critically edited and published for the first time by his late-lamented illustrious father Sriman K. Satakopacharya Swamy in the early fifties.

I take this opportunity not only to congratulate Dr. K. Anantha on this laudable effort, but also to urge young scholars like him to think in terms of preserving and developing our great heritage, viz., **śāstra** knowledge. They have to devise ways and means of reviving and revitalising the study of Mīmāṃsā, which may be descirbed as a "highly endangered species". Educational Institutions should offer highly attractive incentives to those who offer to study Mīmāṃsā and such **śāstra.** Once these priceless heritages are lost beyond retrieval, the culture of our Nation can never be regained. It is therefore in the fitness of things that steps are taken right now for the preservation and propagation of this great **śāstra,** by all possible means.

31st October 1997
Madras 600 005.

M. Narasimhachary.

श्रीः

श्री श्रीनिवासपरब्रह्मणे नमः ।

उपोद्घातः

वेदेषु काण्डद्वितयं यदीयमाराधनं बोधयतीति सद्भिः ।
विचार्य निर्णीतमवेद्यरूपं तं श्रीनिवासं प्रणमाम्यजस्रम् ॥

''यतस्सर्वार्थलाभो नः प्रज्ञावैराग्यवारिधेः ।
श्रीरङ्गलक्ष्मणाभिख्यां देवतां तामुपास्महे ॥''

वेदमहिमा

निश्चप्रचमेवेदं विश्वेषामपि विमर्शकुशलानां यत् भारतभूमिरियं सर्वस्मादपि देशात् विशिष्टतमा वरीवर्तीति । अन्यैरपि सशिरःकम्पमिदमुद्घुष्यते तत्र तत्रेति च । तत्र च निदानं, अपेक्षितसकलपुमर्थसाधनभूतायाः परमपवित्रायाः स्वतः प्रमाणभूतायाः भगवत्याः श्रुतेः तदनुसारिणां विद्यास्थानानां, तथा समकण्ठमङ्गीकृततत्प्रामाण्यानां मात्रयाऽप्यपरित्यक्ततदुपदिष्टमार्गाणां परमकारुणिकानाम् अतिमेधाविनाम् असम्भावितदोषगन्धानाम् आकलितसर्वतत्त्वस्वरूपाणां निर्णीतसारासार- विषयाणां महतां तत्रभवतां वाल्मीकिवसिष्ठपराशरव्यासजैमिनिपाणिनिप्रभृतीनां महर्षीणां चावतरणं अस्यामेव भारतभूमाविति ।

यद्यपि कुसुमाञ्जलिकारोक्तरीत्या अद्य सञ्जातो धर्मह्रासः, तथाऽपि तादृशानां पञ्चषाणामपि वा यावदनुवर्तनं, न तावदपेयात् भारतभूमेर्गौरवम् । तेषामपि महनीयानां मान्यता वेदद्वारिकैवेति तादृशो वेद एव मान्यतमेष्वग्रचं स्थानमलङ्करोति । स चातिगभीरो वेदः न

सहसा स्वाशयमविष्करोतीति दयापरवशाः परमर्षयः स्वयोगमहिम्ना साक्षात्कृतसर्वतत्त्वाः सर्वेषामनायासबोधार्थं वेदप्रतिपाद्येष्वेकैकमंशमादाय तद्विवरणार्थं तानि तानि विद्यास्थानानि व्यररचन् । अतः प्रतिनियतविषयाण्यपि तानि, विशिष्य तत्र तत्रोल्लिखितप्रमेयविशेषान् विना, अन्येषु सर्वेषु प्रमेयेषु स्वेतरविद्यास्थानप्रतिपादितान् विषयानङ्गीकुर्वन्त्येव । स्पष्टं चेदं सर्वेषामपि विद्याव्यसनिनाम् ।

मीमांसायाः वैलक्षण्यम्

तादृशेषु धर्मविद्यास्थानेषु प्रधानभूतानां चतुर्णां वेदानामङ्गभूतान्यवशिष्टानीति विदितचरम् । तत्र इतरापेक्षया जैमिनिव्यासाभ्यां प्रवर्तिता वाक्यशास्त्रमिति प्रसिद्धा मीमांसैव वेदोपकारविषये परां काष्ठां समधिगता । अत एव ह्युक्तं भट्टपादैः—

"धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥" इति ।

न केवलं सा विधिमन्त्रनामधेयनिषेधार्थवादात्मकवेदवाक्यार्थ-परिज्ञानायैव साधनभूता । अपितु सर्वेषामपि शास्त्राणां, किमुत लौकिकानामपि वाक्यानां यथावस्थितार्थनिर्णये बहुलमुपकरोतीत्यत्र तेषां मनांस्येव प्रमाणं, ये लेशतोऽपि वा मीमांसामधीयते ।

अथापि किञ्चिन्निरूपयामः — वेदस्य वाक्यरूपत्वात् तेषां वाक्यानां यथावस्थितार्थपरिज्ञाने सत्येव वेदहृदयमवगतं स्यात् । तच्च यथावस्थितज्ञानं तदैव स्यात्, यदा विचार्य समीचीनैर्न्यायैः निर्णयेम । तादृशविचारमुखेन समीचीनान् न्यायानेव हि वदति मीमांसा । नहि उत्सर्गापवादन्यायस्य सामान्यविशेषन्यायस्य वा स्वरूपमजानता, व्याकरणे धर्मशास्त्रेषु अन्यत्र वा तन्त्रेषु वाक्यार्थो वर्णयितुं शक्यते । किं

श्रुतिलिङ्गादीनां स्वरूपस्य, नावमिकस्य ऊहस्य, दाशमिकस्य बाधस्य, अन्येषां वा तत्तदध्यायप्रतिपाद्यानामर्थानां स्वरूपस्य चाज्ञाने व्युत्पत्तिः सुप्रतिष्ठिता भवेत् । किं बहुना; तस्यां च मीमांसायां प्रायः प्रत्यधिकरणमतिरमणीयस्य कस्यचिल्लोकानुसारिणो न्यायस्य निष्पत्तेः तादृशन्यायानवलम्ब्य वाक्यार्थं वर्णयितुः गौरवमन्यादृशमेवेति नेदमपह्नवार्हम् । अत एव ह्युक्तं प्रकृतप्रबन्ध्रा विश्वगुणादर्शे —

''नैयायिका वा ननु शाब्दिका वा त्रयीशिरस्सु श्रमशालिनो वा ।
वादाहवे बिभ्रति जैमिनीयन्यायोपरोधे सति मौनमुद्राम् ॥'' इति ।

प्राचीना वा अर्वाचीना वा शास्त्रकारा वा काव्यकर्तारो वा सर्वेऽपि पकीयेषु प्रबन्धेषु प्रसक्तेषु स्थलेषु मीमांसानैपुणीं प्रदर्शयन्त एव ग्रन्थानारचयन्ति ।

एवं लौकिकेषु काव्यादिष्वपि यथावस्थितार्थविज्ञानसम्पत्तये सैव मीमांसा शरणीकरणीया । नहि उद्देश्यविधेयविभागापरिज्ञानमुखेन निष्कृष्टवाक्यार्थेष्वज्ञातेषु कविहृदयमवगतं स्यात्, येन वयमास्वादितरसा भवेम ।

एवमस्या मीमांसायाः समीचीनानां यथावस्थितार्थनिर्णय-साधनभूतानां अनेकेषां न्यायानां बोधकत्वात् तादृशानां च न्यायानां वाक्यरूपैस्सर्वैरपि निबन्धैरपेक्ष्यमाणत्वात् अत एव च सर्वोपकारकत्वात् इतरापेक्षया वैलक्षण्यं प्रत्यपीपदाम ।

अधुना अन्यदप्यस्या वैलक्षण्यापादकं सर्वाभ्युगतं प्रदर्शयामः । यदनुष्ठानेन वयं स्वर्गादिकमभ्युदयं ऐहिकं च पशुपुत्रादिकं परमपुरुषार्थभूतं निःश्रेयसं च प्राप्नुयामः, यदनुष्ठानेन च महाप्राज्ञाः महनीया जनकादयः सिद्धिमवापुः, यस्मिन् अनुष्ठिते च सर्वात्मा भगवान् नितरां तुष्यति,

तुष्टश्च वृणीते अनुष्ठातॄन्, तादृशो महामहिमा धर्म एव हि भगवत्या मीमांसया न्यायतो निर्णीयते । किमितोऽप्यन्यदस्ति आत्मक्षेम-काङ्क्षिभिरादरणीयम् ।

यद्यपि कुत्रचिद्दर्शनेषु ग्रन्थारम्भे ''अथातो धर्मं व्याख्यास्यामः'' इति निबद्धं सूत्रं पश्यन्तो भ्रमामः, इदमपि दर्शनं धर्मं प्रतिपादयतीति, तथाऽपि तेषां ग्रन्थानामापादचूडं दर्शनेन सामान्यसमवायाभाव-परमाणुप्रभृतीनां पदार्थानां निष्प्रयोजने परीक्षाव्यापारे व्यापृततामवगच्छन्तो वयमनुपदमपनुदेमैवोपक्रदमर्शनजनितां भ्रान्तिम् ।

अतः सर्ववाक्यव्युत्पादकत्वात् वाक्यशास्त्रमिति, अतिरमणीयन्याय-सहस्रबोधकत्वात् न्यायशास्त्रमिति, सर्वतन्त्रेषु विशिष्टत्वात्, तन्त्रमिति, अतिपवित्रवेदार्थभूतधर्मविचारात्मकत्वात् धर्मशास्त्रं मीमांसाशास्त्रमिति च व्यवह्रियमाणमिदमेव मीमांसा (न्याय) शास्त्रं आत्मक्षेमकांक्षिभिः, ऐहिकामुष्मिकफलमपेक्षमाणैः इतरदर्शनान्यधिजिगांसुभिः, सभासु विजिगीषुभिः, सत्काव्यरसमनुबुभूषुभिः, अन्ततः लौकिकवाक्येषु व्युत्पित्सुभिरपि च प्रयत्नेनोपासनीयमितीयमुक्तिः न लेशतोऽप्यत्युक्तिता-मावहेदिति दृढं विश्वसिमः ।

वेदेषु विधिवाक्यानि

जैमिनिव्यासाभ्यां प्रवर्तितेऽस्मिन् पूर्वोत्तरभागभिन्ने मीमांसाशास्त्रे पूर्वभागे जैमिनिर्महर्षिः सहस्रन्यायात्मकसूत्रबृन्देन वेदे कर्मकाण्डे विद्यमानानि यानि विधिमन्त्रनामधेयनिषेधार्थवादात्मकानि वाक्यानि तदर्थविचारप्रवर्तनमुखेन साङ्गं धर्मस्वरूपं निरूपयामास । तत्र विध्यादिषु पञ्चसु वेदभागेषु विधिरेव प्रधानम्, तच्छेषतयैवेतरेषां प्रामाण्यात् । स च विधिः, अपूर्व - नियम - परिसंख्या - भेदेन त्रिविधः इति,

''विधिर्वा स्यादपूर्वत्वात्'', ''नियमार्थो वा पुनः श्रुतिः'' ''परिसंख्या'' इत्यादिसूत्रैरवगच्छामः । एतस्य च सूत्रात्मकस्य मीमांसादर्शनस्य शबरस्वामी भाष्यमारचयामास । तस्य चातिगभीरस्य भाष्यस्य वार्त्तिकनाम्नीं व्याख्यां महामीमांसकः कुमारिलभट्टो निर्ममे ।

वार्त्तिकोक्तविधित्रयलक्षणानि

तत्र च वार्त्तिके मन्त्राधिकरणे (१.२.४) पूर्वोक्तानां त्रयाणां विधीनां

''विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥''

इत्येकया कारिकया लक्षणानि शिक्षितानि । सा च कारिका तत्रैव विवव्रे । ''कस्तर्हि विधिनियमपरिसंख्यानां भेदः? । उच्यते । विधिरेव केनचिद्विशेषेणैवं भिद्यते । तत्र योऽत्यन्तमप्राप्तो न च प्राप्स्यति प्रागवचनादित्यवगम्यते, तत्र नियोगः शुद्ध एव विधिः । यथा ''व्रीहीन् प्रोक्षति'' इति।

यत्र तु प्रागवचनात् पाक्षिकी प्राप्तिः संभाव्यते, तत्राप्राप्तिपक्षं पूरयन् यो विधिः प्रवर्तते स नियन्तृत्वान्नियम इत्युच्यते । यथा ''व्रीहीनवहन्ति'' इति । तण्डुलनिष्पत्त्यर्थाक्षेपादेव तत्सिद्धेः न तत्प्राप्तिमात्रं विधेः फलं, किं तर्हि, अप्राप्तांशपूरणम् । तदप्राप्तिपक्षे च तण्डुलैरुपायान्तराण्याक्षिप्येरन्, पूरणे तु सति या तेषां निवृत्तिः, असावर्थात्, न वाक्यात् । न च तद्वारणं नियमः । परिसंख्या हिं तथा स्यात् । प्रत्यासन्नां वा अवहन्तिनियततामुत्सृज्य नान्यनिवृत्तिफलकल्पनावसरः । तत्प्रसक्तिद्वारा त्ववहन्तेरनियतिरासीदिति नियमान्तर्गतैवार्थान्निवृत्तिर्गम्यते । न च प्राप्ते सति विधिरयं प्रवृत्तः, येनास्यान्यनिवृत्त्यर्थता कल्प्येत । प्रागेव तु प्रवर्तमानेनार्थस्य

प्रापकशक्तिनिरोधात् अन्याप्राप्तिः कृता, सा चार्थलभ्येति न तयैव व्यपदिश्यते ।

यः पुनः प्राङ्नियोगात् तत्र चान्यत्र च प्राप्नुयादिति संभाव्यते, यत्र वा यच्चान्यच्च, सा परिसंख्या। यथा अत्रैवोदाहृते, यथा च गृहमेधीये पञ्चमे पक्षे ।'' इति ।

अप्पयदीक्षितविरचितं विधिरसायनम्

एवं वार्त्तिककारोक्तविधित्रयलक्षणेषु तदुदाहरणेषु च अव्याप्त्यतिव्याप्त्यादिदोषाणां, तथा अन्यासां च बह्वीनामनुपपत्तीनामापाततः प्रतीतेः, तानि लक्षणान्युदाहरणानि चाक्षिप्य क्रीस्तोः पश्चात् षोडश्यां शताब्द्यां [१](1520—1593 A.D.) स्थितैः सर्वतन्त्रनिष्णातैः सुप्रसिद्धवैदुष्यैः महामीमांसकैः अप्पयदीक्षितैः **विधिरसायन**नामकः स्रग्धरावृत्तपद्यमयः कश्चन प्रबन्धः, विधिरसायनसुखोपजीविनीनामकस्तद्व्याख्यानग्रन्थश्च निरमायिषाताम् । तत्र च ''विधिरत्यन्तमप्राप्ते'' इति पूर्वोक्तवार्त्तिकश्लोकोक्तलक्षणानि त्रीण्यपि प्रथमतः बहुत्र अव्याप्त्यतिव्याप्त्यादिदोषोद्भावनेन आक्षिप्तानि । ततः परं तेषां लक्षणानां वार्त्तिकोक्तान्युदाहरणान्यपि आक्षिप्तानि । ततः पूर्वोक्ताक्षेपाक्षेपव्याजेन कृत्स्नस्यापि शास्त्रस्य परस्परविरुद्धार्थत्वशङ्कावहः आक्षेपः चक्रे, यत्र चेमाः पङ्क्तयः उपलभ्यन्ते—

''एवमपूर्वविध्यादिलक्षणोदाहरणगणमाक्षिप्य प्रदर्शितेष्वपि केचिदाक्षेपाः शास्त्रमर्यादामात्रमाश्रित्य प्रदर्शिताः । न तु न्यायमाश्रित्य । न्यायान्वेषणे तु तेऽपि शिथिला इत्याक्षेपाक्षेपव्याजेन तत्तदाक्षेपोपजीव्यशास्त्रमर्यादाक्षेपं कृत्स्नस्यापि शास्त्रस्य परस्परविरुद्धार्थत्वशङ्कावहं स्थालीपुलाकन्यायेन प्रदर्शयिष्यामीति प्रतिजानीते'' इति —

एवमेकचत्वारिंशश्लोकपर्यन्तं सर्वमप्याक्षिप्य द्विचत्वारिंशे तदुपरितने च श्लोके ''एवं प्राप्ते फणामः'' इत्यारभ्य विधित्रयलक्षण-लक्ष्यव्यवस्थाप्रदर्शनपूर्वं, पूर्वोक्ताक्षेपाणां यथोचितं सङ्ग्रहेण परिहाराः प्रदर्शिताः । विधिरसायनग्रन्थः सव्याख्यः काश्यां १९०९ तमे वत्सरे मुद्रितः उपलभ्यते । तत्र च (४३) त्रिचत्वारिंशश्लोकपर्यन्तमेवोपलभ्यते । तावत्पर्यन्ते ग्रन्थे विवक्षिताः विषयास्सर्वे न प्रतिपादिताः । अतः अवशिष्टो भागः लुप्त इति भाति । मद्रनगरीयपुस्तकभाण्डागारे विद्यमानेषु तालकोशेष्वपि तावानेव भागः उपलभ्यते । त्रिचत्वारिंशश्लोक-व्याख्यानावसरे—

''तथा सति क्वचिदंशे अपूर्वविधिरूपाणामंशतो नियमविधिरूपाणां परिसंख्याविधिरूपाणां च विधीनां नियमपरिसंख्याभिन्नत्वाभावेना-सङ्ग्रहप्रसङ्गात् । सन्ति हि तथाभूता विधयः प्रागुदाहृताः, ते चानुपदमेव विवेचयिष्यन्ते'' इति।

तथा — ''अन्यदिह वक्तव्यशेषं लक्षणत्रयसाधारणमग्रे वक्ष्यते'' इति च पङ्क्तयः, अत्र प्रतिज्ञातांशस्योपरि अदर्शनात् इत उपरि पुटद्वयस्यैवोपलम्भात् उपरितनभागस्य लुप्ततामवगमयन्ति ।

अप्पयदीक्षिताः कुमारिलभट्टोक्तलक्षणाक्षेपैदम्पर्येण नेमं ग्रन्थमारचयामासुः, किन्तु आक्षेपव्याजेन स्थूणानिखननन्यायेन तदुक्तार्थं व्यवस्थापयितुमेवेति भाति । यतस्ते ग्रन्थारम्भे एवं प्रतिजानते—

''विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधिस्रोतसां
आचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥

मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु ...... त्रयो विधिप्रकाराः प्रसिद्धाः । अपूर्वविधिः, नियमविधिः परिसंख्याविधिश्चेति । ते च भट्टपादैः परस्परमसंकीर्णविषयतया स्पष्टमेवोपपादिताः । तत्र स्वत एव निरवद्ये ग्रन्थकारैश्च बहुभिर्निष्कर्षं प्रापिते अपूर्वविध्यादिविभागे नूतनं किञ्चिद्विचारणीयं नास्त्येव, यद्यप्येवं, तथाऽप्यपूर्वविध्यादीनां द्वादशस्वप्यध्यायेषु विप्रकीर्णैरिहापूर्वविध्यादिलक्षणविचारव्याजेन तत्र तत्र प्रदर्शनीयैरुदारहणविशेषैस्तमेवार्थमतिस्पष्टीकर्तुं प्रकरणमिदमारभ्यत इत्यर्थः'' इति ।

एवं स्थिते षोडशशताब्द्यां अप्पयदीक्षितसमकालं, तदनन्तरं सप्तदशादिशताब्दीषु च ये तावत् प्रसिद्धाः मीमांसका आसन् — तेषु बहवः विधिरसायनग्रन्थखण्डने प्रवृत्ता दृश्यन्ते । केचन विधिरसायनोपरि आपादितदूषणोद्धारणे च प्रवृत्ता दृश्यन्ते । तथा हि—

खण्डदेवः 1575 — 1665 A.D.

षोडशशताब्द्यां स्थितः खण्डदेवः स्वकीये **मीमांसाकौस्तुभे,** तथा **भाट्टदीपिकायां** च मन्त्राधिकरणे विधिरसायनोक्तानाक्षेपान् खण्डयति । कौस्तुभे तत्तद्विधीनां लक्षणानि तेषां विपुलमुपपादनं च द्रष्टव्यानि । अत्र तदीयानि कानिचन वाक्यान्युदाह्रियन्ते । (१.२.४) ''एतानि च लक्षणानि सुधीभिर्विधिरसायनोक्तोदाहरणेषु योज्यानि'' इति, ''अतश्चोक्तलक्षणानां तदुदाहरणानां च वार्त्तिकाद्युक्तानां अनुपपत्त्यभावात् विधिरसायनोक्तलक्षणाक्षेपः, उदाहरणाक्षेपश्च व सञ्छेते । आक्षेपाक्षेपप्रसङ्गेन न्यायशैथिल्यकरणं तु तत्तदधिकरणप्रसङ्गेन तत्र तत्र प्रायशः निराकारिष्यत इति विधिरसायनोक्तदूषणानामनवकाशः'' इति कौस्तुभे, ''अत एव नियमपरिसंख्याऽतिरिक्तफलविधित्वमपूर्वविधित्वमिति तल्लक्षणमपि सुस्थम् । एतेषां चोपाधीनां क्वचिदुदाहरणे साङ्कर्येऽपि न

दोष इति न विधिरसायनोक्तलक्षणदूषणावकाशः । विस्तरेण चैतत् अस्मत्कृते मीमांसाकौस्तुभे द्रष्टव्यम्'' इति च भाट्टदीपिकायाम् ।

एवं (1600 A.D.) काले स्थितः सोमनाथः स्वकीये शास्त्रदीपिकाव्याख्यानेऽपि तत्रतत्र विधिरसायनोक्ताक्षेपान् प्रतिवदतीति तद्द्रष्टृणां सुज्ञानम् ।

शङ्करभट्टः 1550—1620 A.D.

एवं षोडशशताब्द्यां स्थितः शङ्करभट्टोऽपि **विधिरसायनदूषण**नामानं विधिरसायनीयसर्वश्लोकखण्डनपरं नातिविस्तृतं ग्रन्थमारचयामास । यस्यादर्शः मद्रनगरराजकीयकोशागारे अडयार् कोशागारे च उपलभ्यते । तत्र चादौ अयं श्लोकः दृश्यते—

''विध्यादित्रयलक्षणानि रचितान्याचार्यवर्यैर्निरा-
कुर्वन्तोऽप्पयदीक्षिता व्यरचयन् सिद्धान्तजाते क्वचित् ।
आक्षेपं त्विह कुर्वते बहुमतिं ये तन्निरासाक्षमाः.
तेषामेष कृते तु शङ्करबुधस्यारम्भ उज्जृम्भते ॥'' इति ॥

अपूर्वविधिविचारावसाने दृश्यमाना पङ्क्तिरियम्—

Colophon :— 'इति श्रीमत्पदवाक्येत्यादि श्रीभट्टनारायणात्मज-भट्टशङ्करकृतौ विधिरसायनदूषणे वार्त्तिकोक्तापूर्वविधिलक्षणदूषणोद्धारः ।

विधिरसायनकीर्तितवार्त्तिकोदितजरद्विधिलक्षणदूषणे ।
सुविहितं न विभावनया विना प्रतिविधानमनादरमर्हति ॥ इति ।

रामेश्वरसूरिः

एवं सुब्रह्मण्यसूरिसुतो रामेश्वरसूरिः **विधिविवेक**नामानं ग्रन्थं रचितवान् । यस्यादर्शोऽपि मद्रनगरकोशागारे रक्ष्यते । अस्य कोशस्य

कालः १९७० शकः इति ज्ञायते । यत्र च एकविंशे पुटे (Page 21) — ''एवमुक्तरीत्या अपूर्वविधिलक्षणे निर्दिष्टे संभवति सति, विधिरसायने अप्पयदीक्षितचरणैः ''विधिरत्यन्तमप्राप्ते'' इति वार्त्तिकमुदाहृत्य ''इदं केषाञ्चित् प्रसिद्धविधीनां स्वरूपकथनम्, नतु लक्षणम्, दोषग्रस्तत्वात्'' इति भणितं, तदभिप्रायं न विद्मः'' इति । ग्रन्थावसाने — ''एवं सति वार्त्तिकोपारि, विधिरसायने यानि दूषणानि तेषां निरवकाशत्वेऽपि दीक्षितचरणैर्यल्लिखितं तत् शिष्यपरीक्षार्थमेवेति शिवम् ।'' इति च पङ्क्तयः दृश्यन्ते । एतद्ग्रन्थकारलेखनशैलीपरिशीलने अप्पयदीक्षितेष्वयं मान्यताबुद्धिमुवाहेति ज्ञायते ।

वेङ्कटनारायणः (भारद्वाजः)

एवं रामचन्द्रसुतः मीनाक्षीवल्लभपौत्रः लक्ष्मणशिष्यः दक्षिणमधुरावास्तव्यः वेङ्कटनारायणः विधिभूषणनामकं विपुलं विधिविचारपरं ग्रन्थमारचयामास । यत्र च ''विधिरत्यन्तमप्राप्ते'' इति वार्त्तिककारिकैव व्याख्यायते इति प्रतिज्ञायते ''सेयं कारिका सोदाहरणा संभावितानुपपत्तिनिरासपूर्वकं संक्षेपात् व्याख्यायते'' इति । अयमपि ग्रन्थः अप्पयदीक्षितोक्तदूषणपरिहारपर इति तद्ग्रन्थपरिशीलने ज्ञायते । अयं च सप्तदशशतके स्यादिति विमर्शकानामभिप्रायः । अयमपि कोशः मद्रनगरकोशागारे विद्यते ।

तथा श्रीनिवासार्यसुतो नायनार्यनामा पण्डितः **विधिचमत्कारचन्द्रिकानामानं** ग्रन्थमारचयामास । अयमपि विधिरसायनदूषणपर एव । यत्र ग्रन्थारम्भे इय पङ्क्तिर्दृश्यते —''यत्तु विधिरसायने न्यगादि 'व्रीहीन् प्रोक्षति' 'व्रीहीनवहन्ति' इति विधी नापूर्वनियमविधी; तद्विधेययोर्मन्त्रवर्णत एव प्राप्तत्वादिति । तदापातचमत्कारमात्रम्'' इत्यादि । अत्र अपूर्वविधिविचारावसाने

समाप्तिवाक्यं त्वित्थम्—

Colophon :— ''इति श्रीवत्सकुलतिलकसर्वलोकशरण्यार्यविरुदाङ्क-विराजमानचक्रवर्तिवंशपयःपारावारसुधाकिरणेन श्रीनिवासार्यपुत्रेण नायनार्येण विरचितायां विधिचमत्कारचन्द्रिकायां अपूर्व-विध्याद्युदाहरणसमर्थनम्'' । इति ।

चोलसिंहपुरे अधुना केचन सर्वलोकशरण्यवंश्याः वर्तन्ते । तद्वंशीयोऽयं श्रीवैष्णवः स्यादित्यस्ति मन्तुमवसरः । अयमपि ग्रन्थः मद्रनगरकोशागारे वर्तते ।

कोल्लूरि नारायणशास्त्री 1630-1700 A.D

तथा शास्त्रदीपिकव्याख्यातुः सोमनाथस्य शिष्यः नारायणशास्त्री विधिविचारपरौ द्वौ ग्रन्थौ रचयामास । तत्र विधिविवेकनामकः प्रकृतासम्बद्धः केवलविध्यादिविचारपर इति भाति । यस्तु विधिदर्पणनामकः सः प्रकृतविधिरसायनदूषणपरः । विपुलविचारात्मकः । विधित्रयलक्षणानि निष्कृष्टानि वदति । निरस्यति च विधिरसायनोक्तदूषणानि । अयमपि मद्रनगरकोशागारे रक्ष्यते । यत्रेयं समाप्तिपङ्क्तिः — ''इति कोल्लूरिनारायणशास्त्रिविरचिते विधिदर्पणे विधित्रयनिरूपणं सम्पूर्णम्'' इति ।

एवं गोपालभट्टनाम्ना अष्टादशशताब्दीस्थितेन पण्डितेन मीमांसाविधिभूषणनामकः विधिरसायनदूषणपरः कश्चिद् ग्रन्थः कृतोऽस्तीति सूचीपत्रात्, कीत् - पण्डितकृतकर्ममीमांसाग्रन्थाच्चावगम्यते । अस्य चादर्शो दुर्लभः । एतावता विधिरसायननिरासकाः प्रतिपादिताः । अथ विधिरसायनोपरि समापादितदूषणोद्धारपरौ द्वावधिकृत्य किञ्चिद्वदामः । तत्र प्रथमः अप्पयदीक्षितः—

अप्पयदीक्षितः 1650 A.D.

अयं प्रसिद्धाप्पयदीक्षितज्येष्ठभ्रातुः आच्चादीक्षितस्य पौत्रः । अस्य पिताऽपि अप्पयदीक्षितनामक एव । सः रुक्मिणी-परिणयालङ्कारतिलकादिकर्ता । अनेन दुरूहशिक्षापरनामकः विधिरसायनदूषणोद्धाराख्यः ग्रन्थः रचितोऽस्ति । अयं च ग्रन्थः शङ्करभट्टकृतविधिरसायनदूषणनामकस्य ग्रन्थस्य खण्डनपरः इति बहवो लिखन्ति । परं तु ग्रन्थस्य साक्षाद् दर्शने शङ्करभट्टीयग्रन्थस्थपङ्क्तीनां अनुवादस्य वा खण्डनस्य वाऽत्रादर्शनात् तत्खण्डनपरः न स्यादित्यालोच्यते । परं तु इतः पूर्वः यः कोल्लूरिनारायणशास्त्रिकृतत्वेन निर्दिष्टः विधिदर्पणाख्यः, तद्दूषणपरः स्यादित्यालोच्यते । यतस्तत्रत्या विषया अनूद्यात्र निरस्यन्ते, स्थाप्यन्ते च विधिरसायनप्रतिपादिता विषयाः । एतद्ग्रन्थीयास्सर्वे विषयाः अडयारुपुस्तकालयीय (Catalogue of Mīmāmsa Vol. IX. Adyar) सूचीपत्रे द्रष्टव्याः ।

ग्रन्थकारः ग्रन्थारम्भे अवसाने च स्ववंशपरम्परां तदुत्कर्षं च विस्तरेण प्रतिपादयति । तथाऽत्रारम्भे—

"यद्रसायनसमीरितं विधौ क्षुद्रधीः परिजहार दूषणम् ।
तन्निराकरणकौतुकी जनः सन्निधापयतु मामिकां कृतिम् ॥

यद्यपि न विधिरसायनमास्कन्दति दूषणं गुरूक्तमपि ।
तदपि तदाधुनिकानां मन्दविषन्यायतो निराकुर्मः ॥

प्रायेण सिद्धवत्कृत्य पदार्थान् विलिखामि तान् ।
कृतोपपादना ये स्युः मूले विधिरसायने ॥"

"व्रीहीन् प्रोक्षति" इति विधिः नापूर्वविधिः, ... इत्याक्षिप्तं

विधिरसायने । तत्र केचित् परिहरन्ति ''अयमपूर्वविधिरेव, एतद्विध्यभावे व्रीहिषु प्रोक्षणासिद्धेः । मन्त्रलिङ्गकल्प्यं प्रोक्षणं तु प्रस्तर एव स्यात् ..... इति । तदसारम् । मूल एव ''दर्शपूर्णमासप्रकरणेन तदपूर्वार्थतयाऽवगतस्येति'' उदाहरणाक्षेपप्रथमवाक्यं लिखितमस्ति किल तदर्थानालोचनमूलत्वात्'' । इत्यादिपङ्क्तयः, अवसाने— ''तस्मात् सकलमिव भवेत् दृश्यते येन तन्त्रं (?) इति यदुक्तं दीक्षितैः, तत्तथैव वज्रलेपायते ।

कथं बत निरुध्यतां कमलनालसूत्रैस्त्वया
मदत्रुटितशृङ्खलावलयबन्धनः सिन्धुरः ।
कृतं विधिरसायने तदिह दूषणान्वेषणैः
वरं पुरहरे चिरं मन इदं सखे स्थाप्यताम् ॥''

इति पङ्क्तयश्च दृश्यन्ते ।

द्वितीयः — श्रीनिवासदासः । अयं मद्रनगरसमीपस्थितभूसार-पुरापरनामक - तिरुमलिशैग्रामाभिजनः नृसिंहार्यतनूजः स्वज्येष्ठपितृव्यात् लक्ष्मणार्यादधीतविद्य वाधूलगोत्रश्चेति ग्रन्थान्तविद्यमानवाक्यादवगम्यते । अस्यापि कालः न स्पष्टं ज्ञायते । अनेन विधिरत्नावलीनामकः ग्रन्थः कृतोऽस्ति । अयमपि ग्रन्थः मद्रनगरकोशागारे विद्यते । दुरूहशिक्षावत् अयमपि विधिदर्पणखण्डनात्मकः विधिरसायनस्थापनपरः विपुल-विचाररूपः । असम्पूर्णः । अत्र चारम्भे—

''विधिरसायनविस्तृतयुक्तिभिः
विविधतर्कविकर्कशवर्त्मभिः ।
त्रिविधलक्षणलक्ष्यविधास्वसौ वितनुते विधिदर्पणदूषणम् ॥

विधिरत्नावली सेयं विबुधानन्ददायिनी ।
सुखोपजीविनीकण्ठे भासतां भावुकार्पिता ॥

भूसारपुरवाधूलवंशवारिधिसंभवः ।
श्रीनिवासोऽधुनाऽऽनन्दं कर्तुमारभते सताम् ॥''

इति श्लोकाः उपलभ्यन्ते ।

विधिरसायनदूषणभूषणात्मकेषु एषु ग्रन्थेषु अपूर्वादिविधीनां कथं लक्षणानि निरुक्तानि, विधिरसायनोक्ताक्षेपाणां कया प्रक्रियया समाधानान्वर्णिषत, इत्यादयो विषयाः अत्र विस्तरभिया न प्रतिपादिताः । किञ्च तान् सर्वान् विधिविचारपरान् ग्रन्थान् सम्यक् परिशील्य परिशोध्य एकमालात्मना मुद्राप्य तेषां प्रकाशः कर्तव्य इति अस्ति मनीषा । यत्र समये सर्वं सम्यक् स्फुटीभविष्यति । तादृशमालामुद्रणोपयोगिसाधनसम्पत्तिं भगवान् श्रीनिवासः अनुगृह्णात्विति प्रार्थयामहे । अथ प्रकृतप्रबन्धारमधिकृत्य किञ्चिदावेद्यते ।

वेङ्कटाध्वरी 1590-1660- A.D.

सप्तदशशताब्द्यां स्थितः विश्वगुणादर्शादिनिर्माता वेङ्कटाध्वरीति प्रसिद्धः अरशाणिपालै वेङ्कटाचार्यदीक्षितोऽपि विधिरसायनदूषणपरं विधित्रयपरित्राणनामकं प्रकृतग्रन्थमारचयामास । अत्र वक्तृवैलक्षण्यज्ञापनाय प्रकृतप्रबन्धुर्वंशावलीं पाण्डित्यादिकं चाधिकृत्य किंचित् प्रस्तुमः । अयं काञ्चीमण्डले काञ्चीपुरसमीपे विद्यमाने अरशाणिपालैनामके अग्रहारे अवततार । काञ्चीनगरे यथोक्तकारिदेवालयसमीपे अवसदिति ज्ञायते । अद्यापि तद्वंशीयानां गृहादीनि तत्र वर्तन्ते । विश्वगुणादर्शसमाप्तिवाक्ये (Colophon) काञ्चीपुरवास्तव्यस्येति दृश्यमानं पदं, तथा अनेन कृतः यथोक्तकारिभाण

इति गन्थश्च अस्य काञ्च्यां यथोक्तकारिदेवालयसमीपे वास आसीदित्यत्र गमके भवितुमर्हतः । अयमात्रेयगोत्रोत्पन्नः, अप्पय्यदीक्षितापरनामकस्य श्रीनिवासदीक्षितस्य पौत्रः । श्लेषयमकचक्रवर्तिबिरुदभाजो रघुनाथदीक्षितस्य पुत्रः । माता सीतानाम्नी । अस्य पितामहः श्रीनिवासदीक्षितः सर्वपृष्ठाप्तोर्यामवाजपेयादीनां बहूनां क्रतूनामाहर्ता, अनेकाग्रहारप्रतिष्ठापयिता, दिगन्तविश्रान्तकीर्त्तेः कर्णाटभूभृद्गुरोः पञ्चमतभञ्जनताताचार्यस्य भागिनेयः । अनेनानुष्ठितकर्तुचिह्नभूता यूपस्तम्भादयः अद्यापि तद्वंश्यैः अरशाणिपालै-नल्लूर्-प्रभृतिषु ग्रामेषु परिरक्ष्यमाणा वर्तन्ते । अयं च वेङ्कटाध्वरी तर्कव्याकरणमीमांसावेदान्तादिषु सर्वेष्वपि तन्त्रेषु निरुपमपाण्डित्यशाली । कवितायामन्यादृशी परिपाटी अस्य । पितामहसकाशादधीतविद्य इति भाति । एवमत्र प्रतिपादितविषयेषु विश्वगुणादर्शग्रन्थे विद्यमानानि वाक्यानि प्रमाणम् । यथा—

''काञ्चीमण्डलमण्डनस्य मखिनः कर्णाटभूभृद्गुरोः
तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः ।
अस्तोकाध्वरकर्तुरप्पयगुरोरस्यैष विद्वन्मणेः
पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते ॥

तत्सुतस्तर्कवेदान्ततन्त्रव्याकृतिचिन्तकः ।
व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी ॥''

''इति पञ्चमतभञ्जननिबन्धनविख्याततातयज्वभागिनेय - वाजपेय-सर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवदप्पयार्यतनूभवश्लेषयमकचक्रवर्तिरघुनाथाचार्यतनयस्य श्रीनिवासकृपातिशयसंविदितनयस्य सीताम्बागर्भसंभवस्य श्रीमत्काञ्चीनगरवास्तव्यस्य वेङ्कटार्ययज्वनः कृतिषु विश्वगुणादर्शः सम्पूर्णः ॥'' इति ।

प्रकृतविधित्रयपरित्राणग्रन्थे आरम्भे च—

''प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुनेः
यो माहानसिकः तदुक्तिरसिकः श्रीमान् स यत्राभवत्।
वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाऽभूद् रघुनाथदेशिकमणिः श्रीश्रीनिवासेष्टिनः ॥

तनूभवः कवेस्तस्य तनोत्यत्रिकुलोद्भवः ।
विधित्रयपरित्राणं वेङ्कटाचार्यदीक्षितः ॥''

इति श्लोकाभ्यां स्ववंशमूलपुरुषं प्रणतार्तिहराचार्यं, ततस्तत्रैव प्रसिद्धं वादिहंसाम्बुदाचार्यं स्वपितामहं श्रीनिवासदीक्षितं, पितरं रघुनाथदीक्षितं च निर्दिशति । एतदीयपूर्णवंशावलीज्ञानाय मूलपुरुषात् प्रणतार्तिहराचार्यादारब्धां एतत्पर्यन्तां वंशपरम्परां तद्वंशीयेभ्यः सम्पादितामत्रोपहरामः—

(अत्र निर्दिश्यमाना परम्परा पुत्रपौत्रादिरीत्यैव)

प्रणतार्तिहराचार्यः—	अयं भगवद्रामानुजस्य श्रीभाष्यकर्तुः माहानसिकः ''वेदान्तोदयनः'' इति भाष्यकारैर्दत्तबिरुदः, ''किडाम्बि आचान्'' इति साम्प्रदायिकव्यपदेशवान् ।
रामानुजाचार्यः श्रीरङ्गराजाचार्यः—	अस्य पद्मनाभाचार्य इति नामान्तरम् ।
रामानुजाचार्यः—	अस्य ''वादिहंसाम्बुदाचार्यः'' इति बिरुदनाम । ''किडाम्बि अप्पुल्लार्''

इति सम्प्रदायनामे । अयं
श्रीमद्वेदान्तदेशिकस्य मातुलः
आचार्यश्च ।
न्यायकुलिशादिप्रबन्धकर्ता ।
वात्स्यवरदाचार्यशिष्यः ।

वरदाचार्यः
|
वेङ्कटाचार्यः
|
वेदान्ताचार्यः
|
रामानुजाचार्यः
|
रङ्गनाथाचार्यः
|
रामचन्द्राचार्यः
|
प्रणतार्तिहराचार्यः
|
लक्ष्मणाचार्यः
|
वेङ्कटाचार्यः
|
श्रीरङ्गाचार्यः

|

नरसिंहाचार्यः

|

पद्मनाभाचार्यः

|

सुन्दराचार्यः वरदाचार्यः इष्टि-गोपालाचार्यः

श्रीनिवासाध्वरी —

|

रघुनाथदीक्षितः—

|

वेङ्कटाध्वरी—

अयं वेङ्काटाध्वरी तीर्थयात्राव्याजेन राजकीयसभासु शास्त्रार्थविचारव्याजेन च कृत्स्नां भारतभूमिं सञ्चचारेति, तत्र राजभिर्बहुमानितश्चेति ज्ञायते । एनं अष्टोत्तरशतप्रबन्धनिर्मातेति बिरुदनाम्ना तद्वंशीयाः व्यवहरन्ति । एतत्कृतेषु ग्रन्थेषु नामतोऽपि लुप्ताः बहवः । अवशिष्टाश्चेमे —

महाभाष्यस्फूर्तिः—	व्याकरणम् अधुना नोपलभ्यते ।
यङ्लुक्प्रकाशिका	,, ,,
मणिसारखण्डनम्	तर्कः ,,
व्युत्पित्सुबोध;—	अयं किंविषय इति न ज्ञायते । एते ग्रन्था अधुना अनुपलभ्यमाना अपि तद्वंशीयैः पठ्यमानायां तद्विरुदावल्यां इमे ग्रन्था अपि ग्रथिता इति

	तत्कृतत्वे न विवादः ।
न्यायमकरन्दः—	मीमांसा । भाट्टदीपिकावत् द्वादशस्यप्यध्यायेषु सर्वाधिकरणनिरूपणपरः । तत्र तत्र भाट्टदीपिकाखण्डनमपि दृश्यते । अत्र विधित्रयपरित्राणेऽपि "अस्मत्कृते नवममकरन्दे द्रष्टव्यम्" इति स्थलद्वये इमं ग्रन्थमुदाहरति ।(अमुद्रितम्) ।
न्यायपद्मम्—	मीमांसाप्रकरणग्रन्थः ।
विधित्रयपरित्राणम्—	मीमांसा । प्रकृतप्रबन्धः ।
यतिप्रतिवन्दनखण्डनम् —	धर्मशास्त्रम् । (अमुद्रितम्)
रामायणव्याख्या वाल्मीकिहृदयम्	इतिहासः, नोपलभ्यते
आचार्यपञ्चाशत्—	वेदान्तदेशिकस्तोत्रम् (मुद्रितम्)
लक्ष्मीसहस्रम्—	स्तोत्रम् "
श्रीनिवाससहस्रम्—	" "(अमुद्रितम्)
श्रवणानन्दः—	" (मुद्रितम्)
यादवराघवीयम् (सव्याख्यम्) —	काव्यम् "
सुभाषितकौस्तुभः—	सुभाषितम् "
विश्वगुणादर्शचम्पूः—	काव्यम् "
उत्तरचम्पूः—	रामायणोत्तरकाण्डप्रतिपाद्यकथा-सङ्ग्राहकं काव्यम् । (मुद्रितम्)
वरदाभ्युदयचम्पूः—	हस्तिगिरिचम्पूरिति नामान्तरम् । देवाधिराजस्य (वरदस्य) अवतारप्रतिपादकं काव्यम् ।

	(मुद्रितम्)
प्रद्युम्नानन्दः—	नाटकम् । प्रद्युम्नरत्योः परिणयप्रतिपादकम् । (मुद्रितम्)
सुभद्रापरिणयः—	अस्याङ्कद्वयमुपलभ्यते ।
शृङ्गारदीपिका—	भाणः नोपलभ्यते ।
मुकुन्दविलासः—	भाणः ,,
यथोक्तकारिभाणः—	भाणः ,,

एवमनेन तिरुवाय्मोलि - नामकस्य श्रीशठकोपमुनिकृतस्य द्राविडभाषामयगाथासहस्रस्य संस्कृतभाषायां विवर्तरूपः कश्चन प्रबन्धोऽपि कृतोऽस्तीति शृणुमः । तत्र ग्रन्थे स्थितमेकं पद्यमपि श्रुतमिति डाक्टर् एम् कृष्णमाचार्यैः M. A. स्वकीये संस्कृतग्रन्थजातचरिते (Classical Sanskrit literature) निर्दिष्टं विद्यते । तत्पद्यस्वरूपं त्वित्थम्—

''लोकं पुष्कलमेकनायकतया ये शासितारो नृपाः
श्यामाङ्गेन शुना प्रदष्टचरणाः ते भग्नभिक्षाघटाः ।
अस्मिन् जन्मनि सार्वलौकिकतया भिक्षामटन्ति स्वयं
श्रीनारायणपादसेवनरताः भो भोस्समुज्जीवताम्[त?] ॥'' इति।

''ஒரு நாயகமா யோடவுலகுடனாண்டவர்,
கருநாய் கவர்ந்தகாலர் சிதைகிய பானையர்,
பெருநாடுகாண இம்மையிலே பிச்சை தாம் கொள்வர்,
திரு நாரணன்தாள் காலம்பெறச் சிந்தித்துய் மினோ.'' *(4-1-1)*

अयं वेङ्कटाध्वरी नीलकण्ठविजयचम्पवादिकर्तुः नीलकण्ठदीक्षितस्य

समकालिकः तत्सहाध्यायी चेति वदन्ति । नीलकण्ठविजय-चम्पूनिर्माणकालश्च तेनैव दीक्षितेन "4738 कलिवर्षेषु गतेषु कृतः" इति स्पष्टमुक्तेः A.D. 1638 वर्ष एवेति निश्चेतुं शक्यम् । तदा अस्य वेङ्कटाध्वरिणः अष्टचत्वारिंशत् वत्सरा अतीता इति ज्ञायते ।

एतत्सम्बन्धि ऐतिह्यमपि श्रूयते किंचित् । तदित्थम् — डिल्लीमहाराजेन स्वयोग्यतानुगुणं संभावनायामकृतायां तेन दत्तं स्वल्पमादाय प्रतिनिवर्तमानोऽयं "शाकाय वा स्याल्लवणाय वा स्यात्" इतीदं वाक्यमुच्चरयन्नेव बहिरागतः । तदानीं तत्रत्यैः कैश्चित् राजानमयं धिक्करोतीति बोधितो राजा पुनरेनमाहूय किमुक्तं भवतेति पप्रच्छ । तदा —

"डिल्लीश्वरो वा जगदीश्वरो वा मनोरथं पूरयितुं समर्थः ।
अन्येन केनापि नृपेण दत्तं शाकाय वा स्याल्लवणाय वा स्यात् ॥

इत्युक्तम्" इत्यनेनोत्तरिते एतदीयं पाण्डित्यं दृष्ट्वा विस्मयमापन्नो राजा पुनरस्मै भूरि द्रविणं ददौ इति ।

एवं तत्रैवोत्तरदेशे वेङ्कटाध्वरिणा अज्ञातायां भाषायां द्वौ परस्परं विवदमानौ अन्ततः न्यायस्थलं प्रापितौ । विवादसमये सन्निहितोऽयं वेङ्कटाध्वरी साक्षित्वेन वृतः न्यायस्थलं गत्वा तस्यां भाषायामज्ञातायामपि, या या शब्दानुपूर्वी येन यथा प्रयुक्ता तामानुपूर्वीम् तथैवान्ववादीत् । अहो अस्य पण्डितस्य भाषाज्ञानाभावेऽपि सकृच्छ्रवणेन तदानुपूर्वीधारणकौशलमिति न्यायाधिपतिः परं विस्मयमापेदे, इति च । अथ प्रकृतग्रन्थमधिकृत्य किञ्चिद्वदामः ।

विधित्रयपरित्राणम् (प्रकृतप्रबन्धः)

कुमारिलभट्टोक्तविधित्रयलक्षणान्युदाहरणानि च समीचीनान्येवेति प्रतिपादनाय प्रवृत्तोऽयं ग्रन्थः स्वनामानुगुणं त्रयाणामपि विधीनां

निष्कृष्टानि लक्षणानि प्रदर्श्य तेषां लक्षणानां वार्त्तिककारिकातो लाभप्रकारमुपवर्ण्य विधिरसायनोक्तदूषणान्यनूद्य परिहरति। ग्रन्थस्यानतिविपुलत्वेऽपि प्रधानतया वक्तव्यः विषयाः प्रतिपादिता एव। अत्र नानावृत्ताः त्रिंशच्छ्लोकाः सन्ति। तद्व्याख्यानरीत्यामपि विधिरसायनसरणिरेवानुस्रियते। परिच्छेदत्रयात्मकोऽयम्। एकैकस्मै विधये एकैकः परिच्छेदः। तत्र प्रतिपरिच्छेदं प्रथमतः विधिरसायनोक्ताक्षेपान् अनुवदति। ततः स्वसिद्धान्तं निरूपयति। आक्षिप्तांशः सर्वोऽपि क्रमेण समाधीयते। नातिकर्कशशैली। प्रथमपरिच्छेदे अपूर्वविधिलक्षणाक्षेपान् अनूद्य क्रमशः सर्वान् परिहृत्य स्वाभिमतं अपूर्वविधिनिष्कृष्ट-लक्षणमुदाहरणेषु सङ्गमय्य, अनन्तरं विधिरसायने ग्रन्थान्ते लक्ष्यलक्षणव्यवस्थापूर्वं विधित्रयस्य यानि निष्कृष्टलक्षणान्युक्तानि तेषु सम्भावितानि दूषणान्यपि प्रतिपाद्य, अन्ततः अपूर्वविधेः लघुलक्षणमपि किंचिदुक्त्वा तत्परिच्छेदं समापयति। अत्र विधिरसायनोक्तनिष्कृष्ट-लक्षणदूषणात् पूर्वं प्रसङ्गात् खण्डदेवेन मीमांसाकौस्तुभे प्रतिपादितं अपूर्वविधिलक्षणमनूद्य तस्य लक्षणस्य ''यदि सोमं न विन्देत्'' इति नियमविधावतिव्याप्तिवारणप्रकारः यस्तावत् तेन प्रतिपादितः स सर्वात्मना न सङ्गच्छते, अतिव्याप्तेस्तेन प्रकारेण दुष्परिहरत्वात्, एवं ''हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति'' इत्यत्रापि मीमांसकमर्यादोल्लङ्घनपूर्वकं खण्डदेवकृतं समाधानं न विद्वद्भ्यो रोचेतेति सयुक्तिकं सम्यक् प्रतिपादयति। अत्र विद्यमानो गुणगणः साक्षादेतत्प्रबन्धद्रष्टृणां स्वयमेव स्फुटीभविष्यतीति नेह वितन्यते।

मुद्रणम्

अस्य ग्रन्थस्य पञ्च आदर्शाः तालपत्रमयाः अस्मदीये वेङ्कटेश्वरग्रन्थालये उपलभ्यन्ते। तेषु त्रयः प्रथमपरिच्छेदे ईषद्भागवन्तः

अशुद्धिभूयिष्ठाश्चेति प्रकृतमुद्रणे नोपायुज्यन्त । अवशिष्टयोर्द्वयोरेकः (No. 733) आद्यन्तभागसहितोऽपि मध्ये बहूनां पत्राणां नष्टत्वात् पूर्णतया उपकारको नाभूत् । अवशिष्टः (No. 2839) एक एव समग्रः । परं तु सः अर्धभागः ग्रन्थाक्षरेण, अवशिष्टो भागः आन्ध्राक्षरेण च लिखितः । तालपत्राणां तत्रतत्र अग्रभागेषु त्रुटितत्वात् कानिचन अक्षराणि तत्र लुप्तानि । अस्य ग्रन्थस्य पूर्ण आदर्शः मद्रनगरीयराजकीयकोशागारेऽपि नोपलभ्यते । तत्र विद्यमानः ईषद्भागात्मक एव । अडयार् कोशागारे काकदेषु लिखितः ग्रन्थाक्षरमयः एक आदर्शोऽस्ति । सोऽपि बहुषु स्थलेषु ग्रन्थपातभूयिष्ठः । केनाप्यव्युत्पन्नेन लिखितत्वात् तत्रादर्शे विद्यमाना अशुद्धयः वाचामगोचराः ।

एवं चास्मदीयमेकमेवादर्शमवलम्ब्येदं मुद्रणकार्यं निर्वर्तनीयमासीत् । अत्रापि तत्र तत्र लेखकप्रमादजनिता अशुद्धयस्सन्त्येव । नेदं न जानन्ति प्राचीनग्रन्थमुद्रणे जातपरिचयाः विद्वांसः; यदेतादृशादेकस्मादादर्शात् इदंप्रथमतया ईदृशकठिनतमशास्त्रग्रन्थमुद्रणे महान् श्रमः सञ्जायेतेति । एवं च महता परिश्रमेण तस्मात्तलकोशात् प्रथमतः कंचनादर्शं निर्माय अशुद्धिस्थलेषु यथामति संशोध्य लुप्तस्थलेषु ऊहितांशान् प्रक्षिप्य कथंचिन्मुद्रणार्हां दशामनीनयाम । तालपत्रे विद्यमानः अशुद्धत्वेनास्माकं भातोऽपि पाठः अत्र दर्शितः । अस्मदभ्यूहितपाठश्च [?] एवं चिह्नमध्ये निवेशितः । एवमभ्यूहितानि पदानि कचित्तालकोशे उपलभ्यमानपदप्रतिनिधितया स्युः कचिच्च अधिकतयाऽपि स्युः । उभयत्रापि पूर्वनिर्दिष्टमेव चिह्नं दीयते । यत्र तु प्रश्नचिह्नं विना केवलकुण्डलमात्रं विहितमस्ति, तत्र विधिरसायनादिषु अन्यत्र वा एवमभ्यूहितुमानुकूल्यमस्तीति ज्ञेयम् । अत्रान्ते आकरनिर्देशसहिता विधिवाक्यसूची काचित् पाठकसौकर्याय योजिताऽस्ति ।

ग्रन्थेऽस्मिन् विधिरसायनोक्ताक्षेपानुवादस्थले कचित् शब्दतोऽप्यनुवाददर्शनात् तत्र स्थले सैव पङ्क्तिरुचितेति मत्वा अधस्तात्

''विधिरसायने एवं पाठः'' इति दर्शितम् । विधिरसायनमिति निर्देशः अस्माभिः तत्र तत्र कृतः सुखोपजीविनामकतद्व्याख्याकटाक्षेणैव ।

एवमस्य शोधने एकसंवत्सरात् पूर्वमस्मदध्यक्षैः नियुक्ता वयं तदैव ग्रन्थमिमं मुद्रणार्हमकार्ष्म । तदनु देवस्थानाधिकारिणामाज्ञानुरोधेन मुद्रणमारभ्यत । आरम्भानन्तरं मद्रनगरं गत्वा तत्रत्यराजकीयकोशागारे विद्यमानान् विधिविचारपरान् सर्वान् ग्रन्थान् सकृत् परिशील्य स्थूलतः तेषां गतीः ज्ञात्वा इममुपोद्घातमलिखाम ।

अत्र यस्तावत् समग्रः अस्मदीयः कोशः, स (2839) ''क'' इति निर्दिष्टः । यश्च (733) बहुपत्रविहीनः, स ''ख'' इति निर्दिष्टः ।

कृतज्ञतानुसन्धानम्

अस्मभ्यं परमदयया न्यायमीमांसादिसर्वशास्त्रोपदेष्टॄणां तर्कार्णव - पण्डितरत्न - पूर्वोत्तरतन्त्रप्रदीपेत्याद्यनेकबिरुदभाजां विशिष्टेष्वपि तन्त्रेषु नैकविधप्रबन्धनिर्मातॄणां श्री उ.वे. उत्तमूर् ति. वीरराघवाचार्याणां, तथा मीमांसाकेसरि - पूर्वोत्तरतन्त्रप्रदीप - पण्डितराजेत्यादिबहुविरुदभाजां निखिलतन्त्रनिष्णाततताममहिम्ना विरचितबहुप्रबन्धानां अस्मासु सुतनिर्विशेषं विहितप्रीतीनां श्री उ.वे.डि.टि. ताताचार्याणां च अनुग्रहेणैव अस्माकमीदृशग्रन्थानां शोधने मुद्रणादिषु चाधिकारः संवृत्त इति तेषां विषये सञ्जातमाधमर्ण्यं कथमप्यपनेतुं न शक्यत इति तत्पादारविन्देषु प्रणामसहस्रं समर्पयन्तः कथंचिदाश्वसिमः ।

तथा एतच्छोधनमुद्रणादिविषये अस्मान् नियुक्तावतां अस्मासु विशिष्टानुग्रहवतां एतदपेक्षितसकलसौकर्यसंविधायिनां अस्मत्कला-शालाध्यक्षाणां सद्गुणशेवधीनां श्री उ.वे. P.V. रामानुजस्वामि, M.A. महोदयानां विषये अस्मदीयां कृतज्ञतां परस्सहस्रधन्यवादसमर्पणेन कथंचिन्निवेदयामः । एवमस्य ग्रन्थस्य मुद्रणायानुमतिं दत्तवतां Sri C. Anna Rao, B.A. देवस्थानाधिकारिणां, विना विलम्बं मुद्रणकार्यं

निर्वर्तितवतां मुद्रणालयाधिकारिणां श्री T.R. नरसिंहाचार्याणां च विषये भृशं कृतज्ञा भवामः ।

एवं अस्य ग्रन्थस्य प्रथमतः शिथिलात् तालकोशात् एकमादर्शं यथामातृकं लिखितवतां, तथा अस्मच्छोधनानन्तरं मुद्रणोपयोगिपरिष्कृतमातृकां लिखितंवतां चास्मत्प्रियसुहृदां T.A. कृष्णमाचार्याणां (न्यायाध्यापकानां) श्री S. वेङ्कटरमणभास्कररायाणां च (ग्रन्थागारसंस्कृतपण्डितानां) तथा एतद्ग्रन्थकर्तृवंशावली-वितरणेनोपकृतवतां श्री उ.वे. नल्लूर्. श्रीनिवासाचार्याणां च विषये सर्वदा कृतज्ञैरस्माभिः भाव्यम् ।

एवं बह्ववधानेन शोधनकार्ये निर्वर्तितेऽपि भ्रान्तः पुरुषधर्मत्वात् शोधनविषये नूतनपाठाभ्यूहनविषये टिप्पणीविषये वा यदि दोषा उपलभ्येरन्, तदा सहृदया विद्वांसः कृपया प्रतिबोधनेनास्माननुगृह्णीयुरिति प्रार्थयामहे । येनेदृशदोषाः पुनरवकाशं न लभेरन् ।

"श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः पुमान् ।
अभङ्गुरविभूतिर्नस्तरङ्गयतु मङ्गलम् ॥"

॥ श्रीरस्तु ॥

इति,

विद्वज्जनवंशवदः

कोलियालम् शठकोपाचार्यः,

न्यायमीमांसाध्यापकः,

श्रीवेङ्कटेश्वरप्राच्यकलाशाला.

तिरुपति,

१२—२—१९५४

INTRODUCTION

THE GREATNESS OF THE VEDA-S

Of all countries, our Bhārat stands out as superior to all others. It was here that there occurred the *avatāra* of highly venerated sages such as Vālmiki, Vaśista, Parāśara, Vyāsa Jaimini, Pāṇini, et. al. Their greatness lies in the fact that they swerved not a little bit from the path shown by the *Veda-s* and theri allied literature, which are intrinsically valid and which are the most sacred literature, that show the means for achieving all the goals of human beings. These sages were not only extraordinarily brillant but also extremely compassionate, who determined the exact natures of the *tattva-s* distinguished the *sāra* (worthy) from the *asāra* (worthless for the sake of humanity.

Just as Udayana, the author of Kusumāñjali points out, ther is a general fall in the standards of *dharma,* of late. Nevertheless the prestige of out country will not fall, as long as there continue to live even a handful of people, who follow the path of *dharma.* And even their greatness, eventually, will be only due to the Veda-s, and hence, of all great things, in this world, *Veda-s* will be the foremost.

Nonetheless, the *Veda-s,* which are very abstruse, do not reveal their meanings to one and all. It is for this reason that the great ṛṣis-s (sages), who were full of mercy, who realized the true natures of things, as they are through their yogic powers, compiled the individual *Vidyāsthāna-s,* in respect of specific branches of Vedic leariming, so that they become easily accessible to all. That is why the nature of *Vidyāsthāna-s,* is such that, apart from what is specific to

one particular *Vidyāsthāna,* it also accepts the validity of those that are set forth in other *Vidyāsthāna-s.* This will be evident to those who have put efforts towards learning the *Vidya-s.*

THE DISTINCITON OF MIMĀMSA

Of all these, it is well known that the *Veda-s* are primary and all others are their subsidiaries. The foremost among these subsidiaries, which are helpful for the understanding of the *Veda-s* is nothing but the *mīmāṁsā,* that has been propounded by the sages Jaimini and *Vyāsa,* which goes by the name *vakyaśātra.* This has been well set forth by Kumārila Bhatta thus:

dharme pramīyamāne tu vedena karanātmanā
itikartavyatābhāgaṁ mīmāṁsā pūrayiṣyati

(while *Veda-s* serve as the instruments in knowing is *dharma, mīmāṁsā* serves as the *itikartavyatā* or anga or subsidiary).

This *mīmāṁsā,* serves as a means not only to know meanings of Vedic sentences, which are of the form of *vidhi mantra, nāmadheya, nisedha and arthavāda,* but also of all other *śāstra-s.* In fact, it helps to determine the exact meanings of even common worldly usages *(laukikavākya-s).* This will be well testified to by the minds of those who have learnt *mīmāṁsā* even a little bit.

Nevertheless, we shall now adduce some proofs. The *Veda-s* are of the form of sentences. Hence, the inner purpor of them (the *Veda-s)* can be known only upon knowing the exact meanings of sentence. And the exact meanings of sentences can be known only if they are determind after due deliberations, through the application of proper maxims *(samīcīna nyāya-s).* Thus in the process of deliberation *mīmāṁsā,* actually offers various maxims. For instance, one cannot know the correct meanings of sentences either in

vyākarana or *dharma-śātra* or in other *śāstra-s,* if one is not aware of *nyāya-s* like *utsarga-apavāadanyāya* (the maxim of rule and exception) or *sāmānya-viśeṣa-nyāya* (the maxim of general and particular). Further if one does not know the natures of *śruti, liṅga,* etc., or the nature of *ūha* that is dealt with in the ninth chapter, or of *bādha* dealt with in the tenth chapter or of the other things dealt with in each chapter, can or will one's knowledge become sound? Why so much? In this *mīmāṁsā, (śātra),* there is dervied in each *adhikarana* some beautiful maxim, in consonance with the world. And it is undeniable that one's speech. That is why it has been stated by the author of the present text in his other works as follows:

"be it the logicians or the grammarians or those who have putefforts in the
crowns of the *Veda-s* (i.e, the *Vedāntin-s)* - all of them will bear only the
mauna-mudrā, should there be a conflict with the maxims of Jaimini".

Again, those who compose some texts-whether they be well versed in *śāstra-s or Kāvya-s,* whether they be ancient or modern - all of them compose their texts only exhibitiing their expertise in *mīmāṁsā,* whenever there be an occasion. So also this *mīmāṁsā* alone has to be resorted to to know the actural meanings even in the case of ordinary *kāvya-s,* etc. If we do not know the essential meanings the division of *uddeśa* and *vidheya* (what is already known and what is made known), we cannot know the poet's intention, with the result that we cannot enjoy or relish the *rasa* of the *kāvya.*

In this way, it has been shown so far that, this *mīmāṁsā,* makes known to us several good maxims, which are useful in the determination of the true purports of sentences, due to which, it becomes a necessity for all the *śātra-s* which are in the form of sentences to make use of this *śātra-s*

In other words, it is helpful for all other *śātra-s* due to which it stands out as uniquely superior to all other *śātra-s*.

Now we shall see another distinct aspect of this *śātra*. It is only through the performance of *dharma* that we attain worldly fruits like a cow or a son etc.. other-worldly fruits like *svarga,* etc., and even the highest fruit, *viz., mokṣa.* It is noly through its performance that very highly knowledgeable perosns like Janaka and others accomplished their desired end. Only when this *dharma* is performed, the in-dwelling Lord becomes pleased and accepts the performers. But what exactly constitutes this *dharma* is determined only by this *mīmāṁsā* through the application of *nyāya-s* (maxims). When that is so, what else can be said to be the best resort for those who wish the highest good for the soul?

It is true that there is also another *śātra* which commences with the statement *athāto dharmaṁ vyākhyāsyāmaḥ* (we shall now explain *dharma)* which may rather mislead one to think that this also speaks about *dharma.* But a fuller study of the text will show that it only dwells at length about futile things such as *sāmānya, abhāva, paramāṅu,* etc. And this would dispel the initial misconception, that arises at the outset.

In sum, this *śātra.* (i.e., *mīmāṁsā* is called *vākyaśāstra* because it is very helpful in determining the meanings of sentences, again *nyāa-śāstra,* for it evolves a thousand beautiful maxims, *tantra,* because it stand out distinctly among all other *tantra-s (śāstra-s), dhārmaa-śāstra,* because it is of the form of expounding *dharma,* which is the sacred essence of the *Veda-s* and also *mīmāṁsā-śātra,* for the same reason. Hence it is only this *mīmāṁsā-śātra,* which has to be practiced (i.e., always kept in touch), by those who wish the highest good for the *ātman,* by those who wish the fruits of this world and the other world, by those who wish to learn other *śātra-s* by those who wish to vanquish the

opponents during debates at assemblies, also by those who wish to enjoy honour by others, and even by those who wish to have mastery over worldly usages. We only belive that this is no over-statement, even a bit.

THE VIDHIVĀKYA-S

Jaimini and Vyāsa expounded the *mīmāṁsā-śātra,* consisting of two parts, *viz., pūrva-mīmāṁsā* and uttara *mīmāṁsā.* Of these, in the *Pūrva-mīmāṁsā-śātra,* Jamini deals with the nature of *dharma,* along with all its subsidiaries *(aṅga-s)* which constitutes the essence of the *Veda-vākya-s* which are of the form of *vidhi, mantra, nāmadheya, nisedha* and *arthavāda,* by way of inquiring into their meanings. Of these five, *vidhi* alone is the most important. The othes have validity only by way of their being subsidiaries of this. This *vidhi* is divided into three types as *apūrva, niyama* and *parisaṅkhyā* which would be clear from the *sūtra-s 'vidhir vā syādapurvatvāt', 'niyamārthā vā punaḥ śrutiḥ'* and *'parisaṅkhyā',* For this *mīmāṁsā-darśana,* which is of the form of *sūtra-s a bhāṣya* was composed by Śabaraswāmin. Again, for this very abstruse *bhāṣya,* Kumārila, the great *mīmāṁsaka* composed a commentary, by name *vārttika.*

In this vārttika, the definitions of the above three *vidhi-s* have been set forth as

vidhiratyantamaprapte niyamah pākṣike sati
tatra cānyatra ca prāpte parisaṅkhyeti gīyate.

This *kārikā* has been explained there itself as follows:

"What exactly is the differnce between *vidhi, niyama and parisaṅhyā?* It is this: *vidhi* itself comes to be divided into these three types, virtue of the addition certain specific features. That is, that which is not known previously from any source, which will not be known either, from any source is called an *apūrva-vidhi* or simply *vidhi.* An example will be *"vrihīn prokṣati"* (sprinkle the paddy).

A *vidhi becomes a niyama-vidhi* when what it ordains could be done in a way different from the way in which the rule itself ordains it to be one. In other words, when what could be done in one manner is ordained to be done only in another particular manner then that *vidhi* which ordains so is called the *niyama-vidhi* An example would be *'vrihin avahanti'* (pound the paddy). Here, in order to make the sacrificial cake called *puroḍāśa,* it is essential that rice is extracted from paddy. And for that purpose there need not be any ordination to the effect 'pound the paddy'. But it has been made in order to make it mandatory that rice be extracted only in that manner and not in any other. The idea here is that when more than one manner of performing something are available, the rule that ordains restriction among the available options is called *niyama-vidhi.* Here there is no express negation of the other options, though that results as a matter of course.

If there is a negation then that would become a *parisaṅkhyā-vidhi.* In that case what is directly known is only restriction and hence it cannot be said that this rule is meant for the negation of other things only. It, however, can be agreed that there was necessity for restriction only because of the availability of the other options, and hence the negation of the other options also results implicitly.

A rule is called a *Parisaṅkhyā-vidhi,* where in the absence of the rule, the position will be such that something will be performable at two places, or that two things will be performable. An example would be *'gṛhamedhīye pañcame paksṣe',* etc.

VIDHI-RASĀYANA OF APPAYYA DĪKṢITA

In the above defintions of the three types of *vidhi-s* and in the corresponding illustrations, some defects in the form of *ativyāpti,* etc., were apparently noticed. Hence these definitions and their illustrations were objected to by

Appayya Dīksita (1520-1593 AD) one of the great *mīmāṁsāka-s,* in his work called *Vidhi-rasāyana,* which is in the form of verses, composed in the *sragdharā* metra, and in its commentary named *vidhi-rasāyanasukhopajīkvinī.* In these two, the *vārttika* quoted previously - *vidhiratyantam aprāpte,* etc., - has been objected to citing the defects of *ativyāpti,* etc., at many places. Then the illustrations cited have also been objected. After that, by way of objecting to the objections, the entire *śāstra* is apparently shown to be contradictory, wherein the following passages are seen:

> "though some objections have been pointed out, on the definitions and their illustrations of *apūvra-vidhi,* etc., they have been pointed out adhering to the regulations of sastra *(śāstra-maryadā)* and not to logic. If one were to look for logic in them, even these objections will not stand. Thus the critcisms of these objections will show that the regulations of *śāstra* themselves, which are the grounds for these objections are subject to criticism, which in turn will result in the position that the entire sastra itself is contradictory. A few instances will be cited in order to illustrate this, according to the maxim called *sthālipulāka-nyāya* (i.e., examining one grain of rice to see if all have been cooked)".

Thus recording all objections till the forty first verse, he starts to offer his brief replies to these objections from the forty second verse onwards, after fixing the illustrations for the three types of *vidhi-s.* A text of *Vidhi-rasāyana,* along with its commentary, has been printed at *Kāśi* in the year 1901. In that edition, the text is available only up to the forty third verse. Within that small portion, all those that were intended have not been set forth. It hence seems that the rest of the text has been lost.

In the palm-leaf manuscripts available at Madras also, only this much portion is avaiable. Further, the following

passages are found while commenting the forty third verse:

"In that case, what are *apūvrav-vidhi-s* in some aspects, which are partially *niyama-vidhi-s* or *parisaṅkhyā-vidhi-s,* since they are not different from *niyama or parisaṅkhyā-vidhi-s,* they will cease to be counted as *apūrva-vidhi-s.* But there are *vidhi-s* of such types, which have been quoted already and are also going to quoted, in the sequel".

What remains to be stated here, which is common to all the three definitions, shall be stated later on".

These show that the later protions have been lost, since, only two more pages are available, and since what has been promised to be discussed has not been discussed.

Appayya Dīkaṣita, seems to have written this text, not in order to criticize Kumārila, but only to stregthen his views, by way of apparently raising objections, just like shaking a post after installing it, only in order to make it stronger, which is called the *sthūṇā-nikhanana-nyāy.* This could be known from what he states at the outset of the text, which is as follows:

vikhyātā munivaryasūktiṣu vidhas tisro vidhistrotasām
ācāryair viśadaṁ viviktaviṣayās tāśca vyavasthapitāḥ
kiṁ tatrāsti vicaryam āryamathite mārge nisargojjvale
nānodaharanaistu tāḥ pravisadīśrtuṃ pravartāmahe

"Among the *sūtra-s* of the venerated sage Bhagavan Jaimini, the three types of *vidhi-s, viz, apūrva, niyama* and *parisaṅkhyā* are well-one. They have been well expounded without any overlapping, by the great Kunarila Bhaṭṭa. Of these three types of *vidhi-s,* which are defect-less by nature, and which have also been well established by many authors, there, of course, remains nothing to be discussed. Nevertheless, this work is commenced in order to clarify to clarify the natures of *apūrva-vidhi,* etc., along with the

illustrations, since the discussions about them remain over some twelve chapters".

While the truth remains so, during the sixteenth century, i.e, during the time of Appayya Dīkṣita and during the seventeenth century also, it is seen that some *mīmāṁsaka-s,* who were famous, indulged in the critcism of *Vishi-rasāyāna.*

For instance, Khaṇḍeva (1575-1665 AD), in his *Mīmāṁsā-kaustubha* and also in his *Bhaṭṭa-dīpikā,* criticizes the objections raised in *Vidhi-rasāyana.* Somanatha, (1600 AD) also does so in his *Śātra-dīpikā.* During sixteenth century, another author, *Śaṅkarabhaṭṭa* (1550 - 1620 AD) has written a work called *Vidhi-rasāyana-dūṣaṇa,* exclusively to criticize each and every verse in *Vidhi-rasāyana.*

Another Rāmeśvasuri, one of one Subrahmanyasuri, also mildly criticizes Appayya Diksita, in his *Vidhi-viveka.* But the author seems to have some regard for the latter, as could be seen from what he has written at the end of his work.

Mīnākṣīvallabha, another scholar, who was the son of one Rāmachandra, who probably flourished during the seventeenth century attacks *Vidhi-rasāyana* in his *Vidhi-bhuṣaṇa.*

Another great scholar Nārāyaṇa, who was the son of Śrinvasa, worte a work called *Vidhi-camatkāra-candrikā,* meant to criticize *Vidhi-rasāyana.* It is probable that the author belongs a well-knows family at Colasimhapuram.

Yet another Kolluri Nārāyaṇa Śāstri son of one Somanatha Śāstri, who is the commentator of *Śāstra-dīpikā,* wrote two works dealing whit vidhi-s. Of these, the work *vidhi-viveka,* seems to deal exclusively with the natures of *vidhi-s* and does not speak about *Vidhi-rasāyana* in this. But in the other work *vidhi-dapana,* which consists of extensive discussions, the author criticizes *Vidhi-rasāyana.*

Gopāla Bhaṭṭa, still another scholar, who belonged to the eighteenth century, has written a work by name *mīmāṁsā-vidhi-bhūṣaṇa,* which is also a criticism of *Vidhi-rasāyana.* This is known from the work of A. B. Keith, on *karma-mīmāṁsā* and also from the index about works.

So far, we dealt with works that were criticisms of *Vidhi-rasāyana.* We shall now see two works that aimed at defending it against such criticisms.

The first one is by one whose name is Appayya Dīkṣita itself, who is the grandson of one Accā Dīkṣita, who is the elder brother of the famous Appayya DīksYita. His work *Vidhirasāyana-uddhāra,* is also called by the name *Durūha-sikṣ‾a.* Many people write that this work is a criticism of Śaṅkarabhaṭṭa's *Vidhi-rasāyana-dūṣaṇa,* mentioned above. But a perusal of text shows none of the passages from that text are quoted nor is there any criticism of that text. The text, on the other hand, seems to be a criticism of the text *vidhi-darpaṇa,* of Kolluri Nārāyana Śāstri, referred to above, for, objections from that text are recorded and then refuted.

The next is by one Śrīnvāsadāsa, son of Ṇsimhārya, who belonged to the village Tirumazhisai. His time, however, is not known. His work is called *Vidhi-ratnāvali,* and just like *Durūha-sikṣā* this is also a refutation of *vidhi-darpaṇa.*

ABOUT VEṄKAṬADHVARI

Veṅkaṭādhvari, the author of the famous Viśvaguṇādarśa-campu, flourished during the Seventeenth century. He is the author of the present text *Vidhi-traya-paritrava.* which is a refutation of *Vidihi-rasāyana.* He was born at a place called Araśāṇipalai, near Kāñcī, and it is known that he lived at a place near the temple called Yathoktakari sannidhi, at kāñcī. He was the grand-son of one Śrīnivāsa Dīkṣita, and the son of Raghunātadikṣita, who had the title *śleṣa-yamaka-cakravarti.*

His mother's name was Sītā. His grand-father Śrīnivāsa Diksita, performed so many *yāga-s,* and in remembrance of them many of the sacrificial posts *(yūpa-sthambha-s)* are still being preserved at the places where he perfomed them, *Araśaṇipālai,* Nallur etc.

Veṅkaṭāhvari was a very great scholar in *Tarka, Vyākaraṇa, Mīmāṁsā* and *Vedānta.* And as a poet, his style was uniquely beautiful. It seems that he learnt everything from his grand-father. He belongs to the lineage of Praṇatāritharacar, one of the seventy four *siṁhāsanādhipati-s* appointed by Rāmānuja, for the propagation of *Viśiṣṭadvaita.* We shall now give his lineage starting from Praṇatārtiharācārya.

Praṇatārtiharācārya - He is the famous Kiḍāmbi Accān, who was given the title 'Vedānta Udayana', by Rāmānuja himself.

Rāmānujācārya

|

Sriraṅgarājācārya

|

Rāmānujācārya - He has got the title Vādihaṁsāmbuvāha, and in the tradition he is called Kiḍámbi Appullār. He is the uncle of Vedāt Deśika and also his preceptor. He is the disciple of Vātsya Varadācārya and the author of *Nyāya-kuliśa.*

|

Varadācārya

|

Venkaṭācārya

|

Vedāntācārya

|

Rāmānujācārya
|
Raṅganāthācārya
|
Rāmacandrācārya
|
Praṇatārtiharācārya.
|
Lakṣmanācārya
|
Venkaṭācārya
|
Śrīraṅgarajācārya
|
Narasimhācārya
|
Padmanabhācārya
|
Sundaracāya Varadācārya Iṣṭi-Gopālācārya
|
Śrīnivāsādhvarin - He is known by his other name Appayaguru and is the grand-father of the author of the present text.
|
Raghunāthadīṣita - He has got the title *śleṣa-yamaka-cakravarti* and the father of our author.
|
Veṅkaṭādhvari - Author of the present text.

Veṅkaṭādhvari toured all over Bhārat under the pretext of performing *tīrthayātrā,* and also visiting Royal assemblies, where debates on śāstric matters were held by kings. And of course he was well honoured by kings at every court. His descendantas say that he had composed some one hundred and eight works and hence held the title

Aṣṭottaraśata-prabanadha-nirmātā. But most of the works have been destroyed due the ravages of time. The following are the works that still remain:

Mahābhāṣya-sphūrtiḥ	*Vyākaraṇam*	*available now*
Yaṅluk-prakāśikā	*-do-*	*-do-*
Manisāra-khaṇḍana	*Tarka*	*-do-*
Vyutpitsu-bodhaḥ	It is known what the subject matter of this work is. Though works like this are not found now, there is no doubt that they have been composed by him, since they are included in the *'biruda-s'* sung in his praise by his descendants.	
Nyāya-makaranda	*Mīmaṁsā.* Just like *Bhātta-dīpikā,* this also deals with all the issues in all the twelve chapters. Here and there some criticisms of *Bhātta-dīpikā* are also found. In the present text- *Vidhitraya-dīpikā* he refers to this text at two places.	
Nyāya-Padma	*Mīmāṁsa.*	
Yatiprativandana khandana	*Dharma-śātra* (un-printed)	
Rāmāyaṇa-vyākhyā-Vālmīki-hṛdaya	*Itihāsa. Not extant.*	
Ācārya-pañcāśat	*Vedāta Deśka stotra* (printed)	
Lakṣmīsahasra	*Stotra*	
Śrīnivāsa-sahasra	*Stotra*	
Śravaṇānandaḥ	*Stotra*	
Yādava-rāghavīya (along with its com).	*Kāvya*	
Subhāṣita-kaustubhaḥ	*Subhāṣita-s.*	
Viśvaguṇādarśa-campu	*Kāvya*	
Uttara-campu	*Kāvya* (deals with the *Uttarakaṇda of Rāmāyana)*	

Varadābhyudaya-campu	*Kāvya.* Known by its other name *Hastigiri-campu*
Pradyubhnānandaḥ.	Play
Subhadrā-pariṇyaḥ	Only two acts of this play are available.
Śṛigāra-dīpikā	A play of Bāṇa type. Not extant now.
Mukunda-vilāsaḥ	A play of Bāṇa type. Not extant now.
Yathoktakāri-bāṇaḥ	A play of Bāṇa type. Not extant now.

It is also learnt that our author composed a poetic work in Sanskrit, translanting the great divine Tamil hymn Tiruvaimozhi, of the Dravadian saint Nammalvar.

It is said that Veṅaṭādhvari was a contemporary of Nīlakaṇṭha Dīkṣta who composed the *Nilakṇṭhavijaya-campu* and also a co-student along with him.

VIDHI-TRAYA-PARITRĀṆA

The work is an attempt to show that the definitions of the three types of *vidhi-s* - given by kumārila and also the illustrations given by him are faultless. As the name indicates, the author gives the refined definitions of the three types of *vidhi-s,* showing how they are derived from the *vārttika-s* of Kumārila themselves and also gives his replies to the objections raised in *Vidhi-rasāyana.*

Though the work is not very lengthy, still all the imoportant things that have to be stated have been stated. There are thirty verses in this work, composed in various metres. In his commentary, also he follows the style of *Vidhi-rasāyana.* The work has got three *prriccheda-s* (divisions) - one pariccheda for each *vidhi.* In each *pariccheda,* he first gives the objections raised in *Vidhi-rasāyana.* Then he gives his *siddhānta.* After that he gives his relies to all the objections in order. The style is not too rough.

In the first *pariccheda,* he first records the objections against

the definition of *apūrva-vidhi,* then offers his replies to those objections and then demonstrates that the refined definitions he has framed are well applicable in the illustraitons. In the end, he deals with the natures of *lakṣaṇa* (a definition) and *lakṣya* (what is defined), determining what should be their natures, then discusses the plausible defects in the refined definitions and ultimately concludes the chapter after giving a shorter defintions for *apūrva-Vidhi.*

Incidentally just before criticizing the refined definition given in *Vidhi-rasāyana* he makes a refernce to the definition given by Khaṇḍadeva in his *Mīmāṁsa-kaustubha,* and shows that the way in which Khaṇḍadeva seeks to ward off the defect of ativyapti, in this definition is not proper. He also shows another instance where Khaṇḍadeva transgresses the canons of *Mīmāṁsa.* The merits of this work will be too obvious to those who go through this work and hence is not elaborated here.

विषयसूची

मङ्गलाचरणम्	....	....	1
प्रतिज्ञा	....	....	2
विधिरत्यन्तमिति वार्तिकविवरणम्	....	....	3
विधिरसायनोक्तपूर्वविधिलक्षणाक्षेपानुवादः	....	....	4
तत्रैव आत्यन्तिकत्वस्यनिर्वाच्यत्वम्	....	....	16
अपूर्वविधिलक्षणाक्षेपपरिहारः	....	....	22
अपूर्वविधिनिष्कृष्टलक्षणम्	....	....	22
आत्यन्तिकत्वनिर्वचनम्	....	....	32
कौस्तुभोक्तापूर्वविधिलक्षणानुवादः	....	....	38
तन्निरासः	....	....	39
विधिरसायनोक्तनिष्कृष्टलक्ष्यलक्षणव्यवस्थानुवादः	....	....	40
विधिरसायनोक्तपरिसंख्याविधिलक्ष्यव्यवस्थादूषणम्	....	....	45
विधिरसायनोक्तापूर्वविधिनिष्कृष्टलक्षणदूषणम्	....	....	47
विधिरसायनोक्तनियमविधिनिष्कृष्टलक्षणदूषणम्	....	....	52
विधिरसायनोक्तपरिसंख्याविधिनिष्कृष्टलक्षणदूषणम्	....	....	56
अपूर्वविधेर्लघुलक्षणम्	....	....	57
विधिरसायनोक्तनियमविधिलक्षणक्षेपानुवादः	....	....	59
तदाक्षेपपरिहारः	....	....	63
नियमविधिनिष्कृष्टलक्षणम्	....	....	63
विधिरसायनोक्तपरिसंख्याविधिलक्षणाक्षेपानुवादः	....	....	74
तदाक्षेपपरिहारः	....	....	79
परिसंख्याविधिनिष्कृष्टलक्षणम्	....	....	82
विधित्रयपपरित्रापणश्लोकसूची	....	....	87
विधित्रयपरित्राणोदाहृतानां विधिवाक्यानां सूची	....	....	88

विधित्रयपरित्राणश्लोकानां सूची।

अत्र यद्यपि पद्यानां	...	...	...	2
अप्यार्थं चेन्निषेधं	...	...	...	45
अप्राप्ताशप्रापण	...	...	...	57
अमीषां त्रिप्रकाराणां	...	...	...	3
अव्याप्तिश्चातिहायेड	...	...	...	50
आत्यन्तिकत्वमिह	...	...	...	32
एवान्यान्यानपेक्ष	...	...	...	82
किंच प्राक्तनदेवता	...	...	...	51
किचं प्रोक्षणमेकदेश	...	...	...	49
जैमिनिमुनिः	...	...	...	1
तत्काले यस्य बुद्धिषः	...	...	...	56
तनूभवः कवेः	...	...	...	2
नियमलक्षणमादिम	...	...	...	59
परभाषितदूषणापहर्तृ	...	...	...	85
पाक्षिकत्वमिदं	...	...	...	34
पारिसंख्यविधिलक्षणस्य	...	...	...	74
प्रख्यातः प्रणतार्तिहृद्गुरुः	...	...	...	2
प्राप्तेः किञ्चिन्निवृत्त्या	...	...	...	47
भद्रं तनोतु	...	...	...	1
विदधानमनन्यलभ्यं	...	...	...	1
विधित्रितयलक्ष्भणां	...	...	...	2
विस्तरो विधिरसायने	...	...	...	2
व्याप्तिष्षोडश्यभिख्य	...	...	...	53
शंय्वन्ता प्रायणीयेति	...	...	...	55
श्रुत्या ग्राह्ये	...	...	...	1
सत्कारं विरचय्य	...	...	...	2
स्वस्वव्यावर्तनीय	...	...	...	35
स्वाभावे तुल्यविध्यन्तर	...	...	...	22
स्वाभावे स्वनिवर्त्त्य	...	...	...	63

॥ श्रीरस्तु ॥

श्रीश्रीनिवासपरब्रह्मणे नमः

आत्रेय श्रीवेङ्कटाचार्यदीक्षितविरचितं

विधित्रयपरित्राणम्

श्रुत्या ग्राह्ये जन्म यस्मिन् विधीनां
सर्वे वर्णाः सिद्धिमन्तो यदङ्गे ।
भक्त्या ध्येये[1] तत्र नित्ये परस्मिन्
देवे वेदेऽप्यायतन्ते धियो मे ॥ १ ॥

भद्रं तनोतु परमं परमेष्ठियज्ञे[2]
-क्लृप्तोदयं वरदनाम किमप्यपूर्वम् ।
आत्मन्यवस्थितमिदं निजकीर्तनेन
दत्ते स्थिरं फलमथापि यदव्यपायम् ॥ २ ॥

विदधानमनन्यलभ्यमर्थं
नियमं चाभ्युदयाय निर्वहन्तम् ।
परिक्लृप्त[3]निवृत्तिधर्मबोधं
प्रभुमान्यं [द्यं?] परिचिन्तये विधिं च ॥ ३ ॥

जैमिनिमुनिः स भगवान्
जयति प्रज्ञानिधिर्जगत्पूज्यः ।
अकृतकसरस्वतीनां
मङ्गलसूत्राणि यस्य सूत्राणि ॥ ४ ॥

---

1. वेदपक्षे अध्येये इति छेदः । 2. यज्ञक्लृप्तेति समस्ततया पाठः क कोशे ।
3. परिक्लृप्ति इति क पाठः ।

प्रख्यातः[1] प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुने-
यो माहानसिकस्तदुक्तिरसिकः श्रीमान् स यत्राभवत् ।
वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाऽभूद् रघुनाथदेशिकमणिः श्रीश्रीनिवासेष्टिनः ॥ ५ ॥

तनूभवः कवेस्तस्य तनोत्यत्रिकुलोद्भवः ।
विधित्रयपरित्राणं वेङ्कटाचार्यदीक्षितः ॥ ६ ॥

विधित्रितयलक्ष्मणां विधिरसायने दूषणं
न्यगादि तदुदाहृतिष्वपि निरूपिता दुष्टयः ।

परीक्षकमुदे रमापतिदयोदयोद्यद्बला
प्रवक्ति मम तन्निराकरणमुत्तरं भारती ॥ ७ ॥

सत्कारं विरचय्य वेङ्कटकविः श्रद्धानिबद्धाञ्जलिः
साधून् वो विबुधाः ! समीहितमहं सप्रश्रयं प्रार्थये ।
हर्षोदग्रमनुग्रहं मयि जडेऽप्याधाय मेधाविनो
युक्तीरत्र विमृश्य पश्यत ततो निन्देत नन्देत वा ॥ ८ ॥

विस्तरो विधिरसायने कृतो नानुभाष्यत इहाखिलो मया ।
तत्र क्लृप्तमुपपादनं बुधैर्वीक्ष्य दूषणसमाधिरीक्ष्यताम् ॥ ९ ॥

अत्र यद्यपि पद्यानाम् अभिप्रायो न दुर्ग्रहः ।
तथाऽपि बालबोधाय तन्वे तद्विवृतिं स्वयम् ॥ १० ॥

इह खलु निखिलनिगमनिचयहृदयविशदविलोकनसाधननयन-नयनसहस्रप्रणयनसमुज्जीवितवैदिकलोकस्य भगवतो जैमिनि-मुनिसत्तमस्य सूत्राण्यधीयानाः श्रोत्रियधूर्वहाः अपूर्वविधिनियमविधि-

1. प्रज्ञातः इति क पाठः ।

परिसंख्याविध्यभिधानान् त्रिविधान् विधीनधीयते — [1]''विधिर्वा स्यादपूर्वत्वात्'', [2]''नियमार्था वा पुनःश्रुतिः'', [3]''परिसंख्या'' इत्येवमादिभिः ।

अमीषां त्रिप्रकाराणां विधीनामवबुद्धये ।
विस्पष्टं भट्टचरणा लक्षणान्याचचक्षिरे ॥ ११ ॥

''विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥'' इति॥

अस्यायमभिप्रायः — ''व्रीहीन् प्रोक्षती''त्यपूर्वविधिः । तदभावे दार्शपूर्णमासिकेषु व्रीहिषु प्रोक्षणस्य कुतोऽप्यप्राप्तेः । ''व्रीहीनवहन्ती''ति नियमविधिः । तदभावे पुरोडाशार्थमुपात्तानां व्रीहीणां तुषविमोकसिद्ध्यर्थं लोकसिद्धतत्कारणतार्केषु अवहनननखविदलनादिषु समानपक्षपातादाक्षेपादवघातस्यापि विदलनादिवत् पक्षत एव प्राप्तेः । ''इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते'' इति परिसंख्याविधिः । तदभावे अगृभ्णन् रशनामित्यग्निचयनप्रकरणाम्नातस्य मन्त्रस्य तत्प्रकरणस्थाश्वरशनाग्रहण इव तथाभूतगर्दभरशनाग्रहणेऽपि लिङ्गाविशेषेण प्राप्तेः । मन्त्रस्य तत्र चान्यत्र च प्राप्तिसत्त्वात् । न चोक्तयोर्नियमपरिसंख्याविध्योः प्रत्यक्षत्वादाक्षेपमन्त्रलिङ्गयोर्नावतारः; प्रत्यक्षविहितेनावघातेन तथाभूतेनाश्वरशनाग्रहणविनियोगेन च पुरोडाशार्थोपात्तानां व्रीहीणां मन्त्रस्य च निराकांक्षत्वादिति वाच्यम् । तर्कितायामेतद्विध्यप्रवृत्तौ

1. मी.सू. 1-2-2-19.
2. मी.सू. 4.2.9.24. मुद्रितभाष्यादिकोशेषु पुनःपदं न दृश्यते ।
3. मी.सू. 1-2-4-34.

आक्षेपलिङ्गावतारसम्भवात् । [ततश्च?] तयोर्नियमपरिसंख्या-फलकत्वेनात्यन्ताप्राप्तार्थप्राप्तिफलकादपूर्वविधितः फलतो भेदो [1]वा [बो?]ध्यः ।

न चैवमपि नियमपरिसंख्याविध्योः फलतो न मिथो भेदः; नियमविधौ नखविदलनादिनिवृत्तेः परिसंख्याविधौ गर्दभरशनानिवृत्तेश्च फलत्वेनेतरनिवृत्तिफलकत्वाविशेषादिति वाच्यम् । नियमविधाव-प्राप्तांशपूरणरूपस्य नियमस्यैव फलत्वम्; तस्योपायान्तरनिवृत्त्युप-जीव्यत्वेन प्रथमोपस्थितत्वाद् विधेयगतत्वेन प्रत्यासन्नत्वाच्च । न तूपायान्तरनिवृत्तेः; तस्याश्चरमोपस्थितत्वादविधेयगतत्वेन विप्रकृष्ट-त्वाच्च । परिसंख्याविधौ तु इतरनिवृत्तिरेव फलं, तत्र विधिविषयस्य नित्यप्राप्ततया स्वरूपप्राप्तेः नियमस्य च फलत्वायोगादित्याहुः (?) ॥

[अपूर्वविधिलक्षणाक्षेपानुवादः]

अत्रापूर्वविधिलक्षणं तावदित्थं दूषितं **विधिरसायने** – 'अप्राप्ते' इति किमेषा विषयेसप्तमी? उत ''पाक्षिके सती'त्येत्रेव सतिसप्तमी? । आद्येऽपि विधिविषयस्य किं स्वरूपेणाप्राप्तिर्विवक्षिता? उद्देश्य-सम्बन्धित्वेन वा? । नाद्यः, ''अथातोऽग्निमग्निष्टोमेनानु-यजन्ति'', ''यावज्जीवमग्निहोत्रं जुहोति'', ''चित्रया यजेत पशुकामः'', ''अक्षैर्दीव्यती''त्यादिष्वपूर्वविधिष्वव्याप्तेः; तत्र विधि-विषयाणामग्न्यग्निहोत्रप्राजापत्ययागाक्षदेवनादीनामेतद्विध्यप्रवृत्तावपि ''य एवं विद्वानग्निं चिनुते'', ''अग्निहोत्रं जुहोति'' ''दधि मधु घृतमापो धानाः (उदकं) तण्डुलास्तत्संसृष्टं प्राजापत्यम्'' इत्यादिवाक्यैर्लोकतश्च स्वरूपेण प्राप्तत्वात् । द्वितीये यद्यपि

1. अत्र भेदो बाध्यः इत्यनोर्मध्ये ततश्चेत्यधिकं सर्वकोशेषु दृश्यते । तदत्रानन्वितं वाक्यारम्भे आवश्यकं चेत्यालोच्य तत्र [ ] एतच्चिह्नमध्ये निवेशितम् । तथा च फलतो भेदोऽबाध्यः इत्येवात्र भवति । बोध्य इति पाठस्तु युक्ततरः ।

नोक्तस्थलेष्वव्याप्तिः; स्वरूपेण प्राप्तानामप्यग्र्यादीनामुक्तविध्यभावे अग्निष्टोम - जीवनरूपनिमित्त - पशुलक्षणफलराजसूयरूपोद्देश्य-संबन्धित्वेनाप्राप्तेः; तथापि ''तं द्विरात्रेण तं त्रिरात्रेणे''त्यादिषु वैकृताग्निविधिषु ''उक्थ्ये गृह्णीयाद् विश्वजिति ग्राह्या'' इत्याद्यति-ग्राह्यविधिषु चाव्याप्तिः स्यात् । वैकृताग्निविध्यभावेऽपि ''अथातोऽग्नि-मग्निष्टोमेनानुयजन्ती''ति प्रकृतौ विहितस्याग्र्याधारस्थण्डिल-रूपस्याग्नेश्चोदकत एव द्विरात्राद्युद्देश्यसंबन्धित्वेन प्राप्तिसंभवात्; ''उपस्तम्भनं वा एतद् यज्ञस्य यदतिग्राह्या'' इति प्रकृतौ विहितानाम् अतिग्राह्यनामकानां ग्रहाणामपि चोदकत एवोक्थ्यादि-रूपोद्देश्यसम्बन्धित्वेन प्राप्तिसंभवाच्च । न चैवं 'तं द्विरात्रेणे'त्यादेः 'उक्थ्ये गृह्णीयात्' इत्यादेश्चाप्राप्तप्रापकत्वाभावेनानुवादकत्वापत्त्या विधित्वस्यैवाभावात् तेष्वव्याप्त्युद्भावनमनुचितमिति वाच्यम् । वैकृताग्र्यतिग्राह्यविधीनामग्र्यतिग्राह्यप्राप्त्यर्थत्वाभावेऽपि तदाश्रितगुण-कामप्राप्त्यर्थत्वेन विधित्वस्य सम्प्रतिपन्नत्वात् । तथाहि -''श्येनचितं चिन्वीत स्वर्गकामः'' इत्यादयो ह्यग्न्याद्याश्रितगुणकामाः श्रूयन्ते । ते च चोदकात् द्विरात्रादिविकृतिषु न प्राप्नुवन्ति । अङ्गस्य सतश्चोदकात् कथंभावाकाङ्क्षाकल्प्यात् प्राप्तिः न त्वङ्गाश्रितानां फलार्थगुणानां, तथैव [1]''गुणकामेष्वाश्रितत्वात्'' इत्यष्टमाध्यायाधिकरणे निर्णीतम् । एवं चाग्र्यतिग्राह्याणां प्रकृतौ कासुचिद् विकृतिषु चोपदेशेन तासां प्रकृतेश्च सामानविध्ये सति तदाश्रिताः फलार्थगुणाः प्रकृताविव तासु विकृतिष्वपि प्राप्नुवन्ति । ततश्चाग्र्यतिग्राह्यविधयो द्विरात्रादिविकृतिषु गुणकामप्राप्तिफलकाः । व्यवस्थापितं चैवम् [2]''अग्र्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्ति''रिति दाशमिकाधिकरणे । ततश्चातिदेश-

1. मी.सू. 8-1-13-23. 2. मी.सू. 10-8-11-23.

प्राप्तविषये [यत्वे?] नाप्राप्तविषयत्वाभावात् तेषु लक्षणस्या[1]व्याप्तिः । न चैते मा भूवन्नपूर्वविधय इति वाच्यम् । नियमेतरनिवृत्तिफलरहितानामप्राप्तगुणकामप्राप्तिफलकानामेतेषां नियमपरिसंख्याविध्यनन्तर्भाविणापूर्वविधावेवान्तर्भावनीयत्वात् । अन्यथा विधित्रैविध्यभङ्गापत्तेः ।

अस्तु तर्हि सतिसप्तमीति द्वितीयः पक्षः; तथा सति विधिविषये तदविषये वा लक्षणीयविध्युद्देश्यमप्राप्ते सति तत्प्राप्तिफलको विधिरपूर्वविधिरिति फलितम् । एवं च न वैकृताग्र्यतिग्राह्यविधिष्वव्याप्तिः; तदभावे फलार्थानां श्येनाकृत्यादिगुणानां द्विरात्रादिविकृतिष्वप्राप्तेः । न च तत्प्राप्तिफलकत्वपर्यन्तविवक्षां विनाऽप्युक्ताव्याप्तिनिरासे तद्विवक्षावैयर्थ्यमिति शङ्क्यम् । तद्विवक्षाविरहे 'व्रीहीनवहन्ती'ति नियमविधावतिव्याप्तेः । आज्यादिधर्मे विलापनादौ लक्षणीयविध्युद्देश्यभूतान् व्रीहिन् अप्राप्ते सत्येव लक्षणीयविधिप्रवृत्तेरिति चेन्न ।

एवं सति द्वादशाहिकंत्र्यनीकान्तर्गतैन्द्रवायवाग्रताशुक्राग्रताविध्योरव्याप्तिः । तत्र प्रायणीयोदयनीयदशमाहेतरेषां नवानामह्नां मध्ये प्रथमद्वितीययोरह्नोः रथन्तरबृहत्सामकत्वेन चोदकादेव रथन्तरबृहत्सामकत्वनिमित्तकयोः ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः प्राप्तिसंभवात्; ''यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्'' इति प्रकृतौ ज्योतिष्टोमे श्रवणात् । न चैवमनयोर्वाक्ययोरप्राप्तप्रापकत्वाभावान्न तत्राव्याप्तिर्दोषायेति वाच्यम् । ''ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रम्'' इत्यनयोर्वाक्ययोः

1. लक्षणाव्याप्तिरिति क पाठः ।

द्वादशाहेऽनैमित्तिकाग्रताद्वयप्राप्त्यर्थत्वात् । नचाग्रताद्वयस्यानैमित्तिकत्वं किमर्थमिति वाच्यम् । द्वादशाहे तस्य प्रयोजनाभावेऽपि तद्विकृतिषु रथन्तरबृहत्सामत्वाभावेऽप्यैन्द्रवायवाग्रत्वशुक्राग्रत्वसिद्धेः अतत्फलत्वात् । गर्गत्रिरात्रे हि द्वितीयमहर्वामदेव्यपृष्ठं, तत्र बृहत्सामत्वाभावेऽप्यनैमित्तिकी शुक्राग्रता द्वादशाहतोऽतिदेशात् प्राप्नोति । तददिदं [1]"त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यादि"ति दाशमिकाधिकरणे निरूपितम् । एवं च सति ऐन्द्रवायवशुक्राग्रतारूपे विधेये प्रकृतविध्युद्देश्यं द्वादशाहिकमाद्यमहर्द्वयमप्राप्ते सति[2] तत्प्राप्त्यर्थे [3]ऐन्द्रवायवशुक्राग्रताविध्योः प्रवृत्तिर्न भवतीति अनिवार्या तयोरव्याप्तिः ।

तथा गवामयने आद्ययोरह्नोरैन्द्रवायवाग्रत्वविधी श्रूयेते; तयो[4]रव्याप्तिः । गवामयने द्वादशाहवत् हि "ऐन्द्रवायवाग्रं प्रथममहरथशुक्राग्रमथाग्रयणाग्रम्" इत्यादिभिः त्र्यनीका समाम्नायते । तस्याश्च स्वस्थानविवृद्धिरूपाऽऽवृत्तिः [5]"एकादशिनीवत् त्र्यनीकापरिवृत्तिः स्यात्" इति दाशमिकाधिकरणे सिद्धान्तितम् [ता?] । ततश्च पूर्वस्मिन् पक्षस्याद्यायामह्नां विंशतौ त्र्यनीकोपदेशात् ऐन्द्रवायवाग्रत्वसिद्ध्या प्रथमद्वितीययोरप्यह्नोस्तत एव तत्प्राप्तेः पुनस्तत्रैन्द्रवायवाग्रत्वश्रवणं तत्तदहरपूर्वप्रयुक्तत्वसिद्ध्यर्थं; तत्फलं तद्विकारेष्वेकाहक्रतुषु रथन्तरसामत्वाभावेऽपि ऐन्द्रवायवाग्रत्वप्राप्तिरिति प्रतिपादितं तन्त्ररत्ने । [6]तयोरप्यैन्द्रवायवाग्रत्वविध्योरनिवार्यैवाव्याप्तिः ।

---

1. मी.सू. 10-5-23-77. 2. अत्र तत्रेत्यधिकं विधिरसायने।
3. तत्प्राप्त्यर्थेयमैन्द्रवायवेति विधिरसायने पाठः । 4. तयोरप्यव्याप्तिरिति विधिरसाधने । 5. मी.सू. 10-5-25-83. ऐकादर्शनवदिति मुद्रितशाबरभाष्यपुस्तके पाठः । 6. ततश्चेत्यधिकं विधिरसायने ।

नन्वत्रोद्देश्यतावच्छेदकावच्छिन्ने विधेयस्याप्राप्तिर्विवक्षिता; तथा च नोक्तस्थलेऽव्याप्तिः । द्वादशाहत्र्यनीकान्तर्गतयोराद्ययोरह्नोः [रग्रतयोः?] परमापूर्वसाधनत्वावच्छिन्ने आद्येऽहर्द्वये विधीयमानतया प्रकृतितस्तद-वच्छिन्ने तयोरप्राप्तेः । एवं गावामयनिकैन्द्रवायवाग्रताद्वयविध्योरपि नाव्याप्तिः । त्र्यनीकोपदेशबलेन परमापूर्वसाधनत्वावच्छिन्नयोराद्ययोरह्नो-स्तत्प्राप्तावपि अवान्तरापूर्वसाधनत्वरूपोद्देश्यतावच्छेदकावच्छिन्नस्तयोः तदप्राप्तेरिति चेन्न । तथा सति 'व्रीहीनवहन्ती' त्यादिनियमविधावतिव्याप्तिः; तत्रापि विधिविषयस्यावघातस्या-पूर्वसाधनत्वरूपोद्देश्यतावच्छेदकावच्छिन्नेषु व्रीहिष्वत्यन्तमप्राप्तेः । किं च "खादिरो यूपो भवती"ति प्रकृतिद्रव्यनियमविधावतिव्याप्तिः । यूपत्वस्योद्देश्यतावच्छेदकस्यालौकिकत्वेन तदवच्छिन्ने खादिरलक्षण-प्रकृतिद्रव्यस्य कदाचिदपि लोकतः प्राप्त्यभावात् । नन्वाहव-नीयोद्देशेनाधानविधिवद् यूपोद्देशेन खादिरविधिरपि अपूर्वविधिरेवास्तु; यूपाहवनीययोरलौकिकत्वाविशेषात्; तथा च तस्य लक्ष्यत्वात् तत्राति-व्याप्तिर्न दोषायेति चेन्न । प्राकृतयूपोद्देशेन प्रकृतिद्रव्यविधिरपि हि नियमविधिरेव । "खादिरो यूपो भवती"त्येतदभावे तक्षणादि-वाक्यपर्यालोचनया दारुमयत्वेनावगतस्य यूपस्य प्रकृत्याकांक्षायाम् अनियतानेकद्रव्याक्षेपस्यानिवार्यत्वात्; तक्षणाष्टाश्रीकरणादिविशिष्टे यूपस्य दृष्टरूपे खादिरादीनां प्रकृतित्वयोग्यतायाः लोकतोऽवधारितत्वात् । आधानं तु आहवनीयादीनां दृष्टे ज्वलनाकारे न निष्पादकं; किन्तु तन्निष्ठापूर्वसंस्कार इति युक्तं तद्विधेः प्रोक्षणादिविधेरिवापूर्वविधित्वम् । तस्मात् 'खादिरो यूपो भवति' इत्यत्रातिव्याप्तिरनिवार्या ।

अपि च रूपभेदविवक्षया उक्ताग्रताविधिचतुष्टयेऽव्याप्तिनिरासेऽपि "तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्" इत्यपूर्वविधौ तद्विवक्षायामप्यव्याप्तिरनिवार्या । तथाहि – अस्मिन् हि

वाक्ये पौर्णमासीकाले उपांशुयाजो विधीयते। तत्र पौर्णमासीत्वरूपोद्देश्यतावच्छेदकावच्छिन्ने काले उपांशुयाजः ''उपांशुयाजमन्तरा यजति'' इत्युत्पत्तिवाक्यादेव प्राप्तः; आग्नेयाग्नीषोमीयपुरोडाशद्वयान्तरालकालस्योत्पत्तिवाक्ये श्रुतस्य पौर्णमासीरूपत्वादुद्देश्यतावच्छेदकावच्छिन्ने विधिविषयस्य प्राप्तत्वात् तत्राव्याप्तिः स्यादेव। न चैवमस्य विधेर्वैफल्यं स्यादिति वाच्यम्; आग्नेयादेरिवोपांशुयाजस्यापि प्रत्यक्षश्रुतपौर्णमासीकालतामापाद्य तद्द्वारेणाधिकारवाक्यस्थपूर्णमासशब्देन ग्रहणं सम्पाद्य फलसंबन्धसम्पादकत्वेनास्य विधेस्साफल्यात्। अपि च ''द्वे आहवनीये जुहोति'' इति विधावग्निहोत्रप्रकरणगतेऽव्याप्तिः। आहुतिद्वये विधिविषयाहवनीयसंबन्धस्य ''यदाहवनीये जुहोती''ति सामान्यशास्त्रादेव प्राप्तेः। न चैवं सति अस्य वैफल्यं शङ्कनीयम्; आपराग्निकहोमानां फलसंबन्धप्रापणार्थत्वेनास्य सार्थक्यात्। किं च ''वैश्वदेवीं सांग्रहिणीं निर्वपेद् ग्रामकामः'' इति ग्रामरूपफलोद्देशेन सांग्रहिणीविधावव्याप्तिः। एतदभावेऽपि ''त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति'' इत्यर्थवादत एव साङ्ग्रहिण्या विधिविषयभूतायाग्रामत्वरूपोद्देश्यतावच्छेदकावच्छिन्ने फले प्राप्तेः। न चैवमस्य वैफल्यं; सन्निधिश्रुतानाम् आमनहोमानां साङ्ग्रहिण्यङ्गत्वसंपादनार्थत्वेन सार्थक्यात्।

ननु लक्षणे प्रकृतविध्युद्देश्यमप्राप्ते सतीति न निवेश्यते; किन्तु विधिविषयेऽन्यस्मिन् वा प्रकृतविध्युद्देश्यमन्यद् वा किंचिदप्राप्ते सतीति। तथा च नैतासामव्याप्तीनामवकाश इति चेत्; एवं हि 'व्रीहीनवहन्ती'त्यादिषु नियमविधिष्वतिव्याप्तिः। दार्शपूर्णमासिके प्रयाजादौ सौर्यादिविकृतिमप्राप्ते सति तद्विधिप्रवृत्तेः। अतस्तथा विवक्षानौचित्यादव्याप्तिः स्यादेव।

स्यादेतत् । यस्मिन्कस्मिंश्चिद् यत्रकुत्रचिदप्राप्ते सति तत्प्राप्तिफलको विधिरपूर्वविधिरिति लक्षणं विवक्षितम् । एवं च नावघातविधावतिव्याप्तिः; तस्य सौर्यादिषु प्रयाजादिप्राप्ति-फलत्वाभावात् । नाप्युक्ताव्याप्तीनामवकाशः । तथाहि — वैकृताग्र्यतिग्राह्यविधीनां हि उद्देश्यभूतासु विकृतिषु अप्राप्त-गुणकामप्राप्तिः [1]फलं, द्वादशाहिकगावामयनिकत्र्यनी-कान्तर्गताग्रताविधीनां द्वादशाहादिविकृतिष्वैन्द्रवायवप्राप्तिः, 'उपांशु पौर्णमास्यां यजन्'' इति विधेः उपांशुयाजस्य स्वर्गसंबन्धप्राप्तिः; 'द्वे आहवनीये' इति विधेरापराग्निकहोमानां स्वर्गसंबन्धप्राप्तिः; साङ्ग्रहिणीविधेः आमनहोमानां सांग्रहिण्यङ्गत्वप्राप्तिश्च फलमिति उक्तस्थले सर्वत्रापि यस्मिन्कस्मिंश्चिद् यं कंचित्पदार्थमप्राप्ते सति तत्प्राप्तिफलको विधिरपूर्वविधिरिति लक्षणमनुगतमेवेति चेन्मैवम्—

''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'', ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यनयोः स्वर्गकामवाक्ययोरव्याप्तेः; ''सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ'' ''सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः'' इति वाक्याभ्यामेव, दर्शपूर्णमासयोर्ज्योतिष्टोमस्य च स्वर्गसम्बन्धप्राप्तेः; अन्यस्य चार्थस्य तद्वाक्यप्रापणीयस्यानुपलम्भात् । किं च नानाशाखाम्नातेष्वग्निहोत्रादिविधिष्वव्याप्तिः । एकशाखागतविध्य-प्रवृत्तावपि शाखान्तरीयाग्निहोत्रादिविधितोऽग्निहोत्रादिप्राप्तिसंभवात्। यदभावे यस्यकस्यचिदर्थस्य क्वचिदप्राप्तिः तत्प्राप्तिफलको यः, सोऽपूर्वविधिरिति लक्षणस्य तत्राभावात्।

नन्वभ्युदयशिरस्कप्राप्तिसंभवराहित्यमप्राप्त इत्यनेन विवक्षितम्। ततश्च ''स्वाध्यायोऽध्येतव्यः'' इति नियमविधिबलादध्ययनगृहीतस्व-

1. उत्तरवाक्यानामनुसारेण फलमिति अत्रापि पदं न स्यादिति भाति ।

शाखान्तर्गतवाक्यजन्यतदर्थज्ञानस्यैवाभ्युदयकारित्वेन स्वशाखान्तर्गतवाक्यसद्भावे शाखान्त [रान्त?] र्गतवाक्यजन्यज्ञानस्याभ्युदयकारित्वाभावात् तत्तच्छाखाध्यायिपुरुषापेक्षया सर्वेषामग्निहोत्रादिविधीनामप्राप्तप्राप्तिफलकत्वमस्त्येवेति न नानाशाखाग्निहोत्रादिविधिष्वव्याप्तिः। नापि स्वर्गकामवाक्याव्याप्तिः। तत्रापि साप्तदश्यवाक्यन्यायेनाभ्युदयफलकप्राप्त्यभावसत्त्वात्। तथाहि — "सप्तदश सामिधेनीरनुब्रूयात्" इति अनारभ्य श्रूयते। मित्रविन्दादिप्रकरणेऽप्येतद्वाक्यं श्रुतम्। तथाच वाक्यद्वयाम्नानबलात् प्राकरणिकवाक्येन साप्तदश्यस्य क्रतुसम्बन्धज्ञानं, अनारभ्याधीतवाक्येन सामिधेनीसम्बन्धज्ञानं चाभ्युदयकारीति यथा कल्प्यते; तथा स्वर्गकामवाक्यतः स्वर्गसम्बन्धज्ञानं, सर्वकामवाक्यतः तदितरफलसम्बन्धज्ञानं चाभ्युदयकारीति कल्पनात्। स्वर्गकामवाक्याभावेऽभ्युदयशिरस्कस्वर्गसम्बन्धप्राप्तिर्नास्तीति तत्र लक्षणानुस्यूतिरस्त्येवेति चेत्।

तर्हि नियमपरिसंख्याविध्योरत्यन्तमप्राप्त इति विशेषणाभ्यां व्यावृत्तिर्न सिद्ध्येत्। तत्रापि स्वाध्यायनियमविधिबलादेवार्थाक्षेपमन्त्रलिङ्गाभ्यामवघातादिप्राप्तेरभ्युदयकारित्वाभावस्य वक्तुं शक्यत्वात्। तस्मादन्यतः प्राप्त्यभावमात्रमिहाप्राप्तिरिति वक्तव्यमिति उदाहृतस्थलेष्वव्याप्तिस्सुदृढैव।

ननु विध्यन्तराप्रवृत्तिसहितायां केवलायां वा तद्विध्यप्रवृत्तौ यः प्राप्त्यभावः स सर्वोऽपि अप्राप्तिविशेषणार्थः; एवं च नानाशाखाग्निहोत्रादिविधिषु नाव्याप्तिः; शाखान्तरीयविध्यप्रवृत्तिसहितायां तच्छाखागतविध्यप्रवृत्तावग्निहोत्रादीनामत्यन्ताप्राप्तिसत्त्वात्। नापि स्वर्गकामविध्योरव्याप्तिः; सर्वकामवाक्याप्रवृत्तिसहितायां तदप्रवृत्तौ दर्शपूर्णमासादेः स्वर्गसंबन्धस्यात्यन्ताप्राप्तत्वात्। न च सर्वकामविधेः स्वर्गकामविधेश्चाप्रवृत्तावपि दर्शपूर्णमासादेः विश्वजिन्न्यायेन स्वर्गसंबन्धप्राप्तिरस्त्येवेति वाच्यम्; "वसन्ते वसन्ते ज्योतिषा यजेत",

''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति विधिभ्यां दर्शपूर्णमासादेः प्रत्यवायपरिहारार्थत्वावगमेन फलाकांक्षाविरहेण तत्र विश्वजिन्याया-प्रवृत्त्या सर्वकामविध्यप्रवृत्तिसहितायां स्वर्गकामविध्यप्रवृत्तौ स्वर्ग-सम्बन्धाप्राप्तिसत्त्वादिति चेन्न।

एवमव्याप्तिपरिहारार्थमनियमेनैकानेकविध्यप्रवृत्तौ अप्रा(प्तेरपूर्व-[1] विधिलक्षणनिविष्टत्वकल्पनायां उपहव्यादिविकृतिषु प्रकृतितो विकल्पेन प्रा) प्तयोः बृहद्रथन्तरयोरन्यतरनियमार्थे ''बृहत्पृष्ठं भवति, रथन्तरं पृष्ठं भवती''ति विधौ, विकृत्यतिरात्रे प्रकृतितो विकल्पेन प्राप्तयोः षोडशिग्रहतद्वर्जनयोः षोडशिग्रहनियमार्थे ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इति विधौ, गृहमेधीये प्रकृतितस्समुच्चित्यप्राप्ताज्य-भागतदितराङ्गकलापमध्ये चोदकलोपकतया तदितराङ्गपरिसंख्यारूपे ''आज्यभागौ यजती'' ति विधौ चातिव्याप्तिः स्यात्। बृहद्रथन्तरपृष्ठयोः षोडशिग्रहस्याज्यभागयोश्च प्राकृतवैकृतविध्यभावे सर्वदैवाप्राप्तिसत्त्वात्। किंच ''व्रीहिभिर्यजेत, यवैर्यजेत'' इति नियमविध्योरतिव्याप्तिः। व्रीहिशास्त्राप्रवृत्तौ व्रीहीणामत्यन्ता-प्राप्तत्वात्। तदानीं यवशास्त्रेण यवानामेव नियमिततया व्रीह्यादिद्रव्यान्तराणां पक्षेऽपि प्राप्त्यसंभवात्। एवं यवशास्त्राप्रवृत्तावपि यवानामत्यन्ताप्राप्तिर्द्रष्टव्या। एवं ''औदुम्बरो यूपो भवती''ति नियमविधावतिव्याप्तिः; एतदभावे बैल्वखादिरपालाशानामेव प्रकृतितः प्राप्त्या औदुम्बरत्वस्य सर्वदैवाप्राप्तेः। नचायमपूर्वविधिरेवास्त्विति वाच्यम्। 'सर्वे द्रव्यविधयो नियमविधय' इति मीमांसक-मर्यादाभङ्गप्रसङ्गात्।

1. कुण्डलितभांगं विनैव सर्वत्र मातृकासु पाठो दृश्यते । तच्चानन्वितम् । ततश्च विधिरसायने दृश्यमाना पङ्क्तिरेवात्र लेखकप्रमादाद् गलिता स्यादित्यालोच्य साऽत्र कुण्डलमध्ये योजिता ।

एवं मित्रविन्दाध्वरकल्पा—पश्वाग्रयणादिप्रकरणश्रुते ''साप्तदश सामिधेनीरनुब्रूयादि''ति परिसंख्याविधातिव्याप्तिः। मित्रविन्दागत-साप्तदश्यविध्यभावे मित्रविन्दायां साप्तदश्यस्यात्यन्ताप्राप्तत्वात्। तदानीमध्वरकल्पादिगतसाप्तदश्यविधिना विकृत्यन्तर इव मित्रविन्दाया-मपि साप्तदश्यस्य परिसंख्याततत्वात्। एवमध्वरकल्पागतसाप्तदश्य-विध्यभावेऽप्यध्वरकल्पायां साप्तदश्यस्यान्ताप्राप्तिर्द्रष्टव्या। तथा गृहमेधीये श्रुतेषु ''अग्नये स्विष्टकृते समवद्यति'' ''इडामुपह्वयते'' इत्यादिविधिषु चोदकपरिलोपकतयाऽङ्गान्तरपरिसंख्यारूपेष्वति-व्याप्तिः। एतदभावे स्विष्टकृदादेर्गृहमेधीये सर्वदैवाप्राप्तेः। गृहमेधीयगतेन 'आज्यभागौ यजती'ति विधिना चोदकपरिलोपकेन तत्राङ्गान्तराणामिव स्विष्टकृदादेरपि परिसंख्यानात्। न चोक्तविधीनां कथं नियमविधित्वं परिसंख्याविधित्वं वा? तदभावे तद्विषयाणामत्यन्ताप्राप्तेरुपपादिततत्वेन पाक्षिक्या नियतायाश्च प्राप्तेरभावादिति वाच्यम्। केवलवि [तद्वि?] ध्यप्रवृत्त्यपेक्षया तत्र तद्विषयाणामत्यन्ताप्राप्तावपि विध्यन्तराप्रवृत्तिसहिततद्विध्यप्रवृत्तौ पाक्षिक्या नियतायाश्च प्राप्तेस्संभवात्। तथाहि - व्रीहियव-शास्त्रयोरुभयोरप्यप्रवृत्तौ व्रीहियवानामनियतप्राप्तिरस्त्येव; तदा कस्यचिद् द्रव्यस्य प्रमाणान्तरेण नियमितत्वाभावात्। एवं प्राकृतवैकृतयूपप्रकृतिद्रव्यविध्यप्रवृत्तावुदुम्बरस्यानियतप्राप्तिरस्त्येव। तथा प्राकरणिकसाप्तदश्यविधीनां सर्वेषामप्रवृत्तावनारभ्याधीतसाप्तदश्य- विधिना पाञ्चदश्यावरुद्धायाः प्रकृतितो निवृत्तेन विकृत्यन्तरेष्विव मित्रविन्दादिष्वपि नियमेन साप्तदश्यप्रापणात् तत्र साप्तदश्यनियत-प्राप्तिरप्रत्यूहा। इत्थं गृहमेधीयगतानां ''आज्यभागौ यजति'' ''स्विष्टकृते समवद्यति'' ''इडामुपह्वयते'' इति विधीनां सर्वेषामप्रवृत्तौ

चोदकपरिलोपाभावादाज्यभागादीनामतिदेशतो नियतप्राप्तिरस्त्येव। न चानेकविध्यप्रवृत्त्यपेक्षयैवाप्राप्तिरपूर्वविधिलक्षणे निवेश्यत इति नियन्तुं शक्यते। तथा सति ''व्रीहीन् प्रोक्षति'' इत्याद्यपूर्वविधावप्राप्तेः तद्विधिमात्राप्रवृत्त्यपेक्षत्वेन तत्राव्याप्तिः स्यादिति तत्परिहारार्थम्-अनियमेनैकानेकविध्यप्रवृत्त्योस्तल्लक्षणे निवेशनीयत्वात्।

अपि च ''यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, यदुपभृति प्रयाजानुयाजेभ्यस्तद्'' इत्यनयोर्नियमविध्योरतिव्याप्तिः। एतदभावे जौहवौपभृताज्ययोः प्रयाजानुयाजेषु सर्वदैवाप्राप्तेः; तदा सर्वयज्ञार्थतया विहितेन ध्रौवाज्येनैव प्रयाजानुयाजानां द्रव्याकांक्षाशान्त्या जौहवादेस्सदनकरणादिष्वयज्ञरूपेष्वेव प्राप्तेः। न चैवं पाक्षिकप्राप्त्यभावे कथं तयोर्नियमविधित्वमिति वाच्यम्। ''सर्वस्मै वा एतद् यज्ञाय गृह्यते'' इति विध्यप्रवृत्तिसहितायां जौहवौपभृताज्यविध्यप्रवृत्तौ द्रव्याकांक्षाशान्त्यभावेन प्रयाजानुयाजेषु जौहवादेः पक्षप्राप्तिसत्त्वात्। तस्मादतिव्याप्त्यावहत्वादनियमेनैकानेकविध्यप्रवृत्त्योरपूर्वविधि-लक्षणानुप्रवेशकल्पनमयुक्तम्।

ननु प्रागुदाहृतेषु रथन्तरादिविधिष्वेकानेकविध्यप्रवृत्तिभ्यां विधिनियमादिलक्षणसंकरो न दोषाय। ततश्च नानालक्षण-समावेशानुसारेण तेषामनेकविधिरूपत्वाङ्गीकारे बाधकाभावः। तावता रथन्तरपृष्ठादिषु अनुष्ठानभेदाप्रसङ्गात्। उपधेयसङ्करेऽपि त [त्त?] ल्लक्षणोपाधीनामसाङ्कर्याच्च। एकस्यैव वाक्यस्यापूर्वविधित्वपरिसंख्या-विधित्वादेः क्वचित्क्वचिद्दर्शनात्। यथा ''उपांशु पौर्णमास्यां यजन्'' इत्येकस्यैव वाक्यस्याप्राप्तस्वर्गसंबन्धप्रापकत्वादपूर्वविधित्वं, अमावास्या-व्यावर्तकत्वात् परिसंख्याविधित्वं च। एवमुदाहरणान्तराणि द्रष्टव्यानीति चेत् - सत्यम्; उपहव्यगतरथन्तरपृष्ठादिविधेः अपूर्वविधित्वनियम-

विधित्वादिस्वीकारेऽनुष्ठानभेदाभावेऽपि सङ्करोपगमे कचिदनुष्ठानभेदः प्रसज्यते। तथाहि – ''दण्डी प्रैषानन्वाह'' इत्यत्र तद्विधिमात्राप्रवृत्तौ परिसंख्याविधिः [धिलक्षणं?] प्रवर्तते । तथा (दा?) हि ''क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति'' इति विधिना मैत्रावरुणार्थत्वेन सिद्धस्य दीक्षितदण्डस्य प्रयोजनाकाङ्क्षायां तदीयानि दण्डापेक्षाणि [सर्वाणि] कार्याणि समुच्चित्य प्राप्नुवन्ति । ''क्रीते सोमे'' इत्यादिविधेरप्यप्रवृत्तौ न तल्लक्षणं प्रवर्तते; तदा दीक्षाभिव्यञ्जकस्य दण्डस्य यावद्दीक्षानुवृत्ति दीक्षितेनैव धारणीयतया प्राप्तेः । किन्तु तदा नियमविधिलक्षणं प्रवर्तते । स्थित्वोच्चैरनवानं कर्तव्ये प्रैषानुवचने किंचिदालम्बनसौकर्यापेक्षायामनियमेन यस्य कस्यचिदालम्बनस्य प्राप्तेः । ततश्च तत्र तद्विधिमात्राप्रवृत्त्यपेक्षया परिसंख्यालक्षणानुगमने दीक्षितदण्ड एव प्रैषानुवचने योजनीयः । ''क्रीते सोमे'' इति विधेरप्यप्रवृत्त्यपेक्षया नियमविधिलक्षणानुगमने निरूढपशाविव दैक्षपशावपि दीक्षितदण्डादन्य एव कश्चिद्दण्डो योजनीयः । न चैतदुपपद्यते । नचोभयमपि विकल्पेन योजयितुं शक्यत इति वाच्यम्। वस्तुतः ''क्रीते सोम'' इति विधेस्सत्त्वेन तद्वशान्मैत्रावरुणार्थत्वेन सिद्धस्य प्रयोजनाकांक्षस्य दीक्षितदण्डस्यैव तत्र योजनीयत्वात् । अतस्तत्र तद्विध्यप्रवृत्तिमात्रापेक्षया परिसंख्यैव केवलमेष्टव्येति तत्र ''क्रीते सोमे'' इति विधेरप्यप्रवृत्त्यपेक्षया समापतन्नियमविधिलक्षण-साङ्कर्यमनिष्टमेव ।

तथा ''यद्योन्यां तदुत्तरयोर्गायति'' इति नियमविधिः । तत्र ''एकं साम तृचे क्रियते स्तोत्रीयम्'' इति ''विधेरप्यप्रवृत्तौ'' यद्योन्याम् इति वचनं क्रतुसाम्नां तत्तद्योनेराच्छिद्योत्तरयोरेव गानप्राप्त्यर्थमिति प्रसज्येत । न चैतदिष्टम् । वस्तुतस्तृचगानप्रापकविधिसत्त्वात्

यद्योन्याम् इति विधानस्य योनेरनाच्छिद्य क्रतुसाम्नामुत्तरयोरपि प्राप्ति-नियमार्थत्वात् । तस्माद् विध्यन्तराप्रवृत्तिसाहित्यस्य लक्षणीयविध्य-प्रवृत्तिविशेषणत्वे वैकृतरथन्तरपृष्ठादिनियमविधिष्वतिव्याप्तिः प्रसज्येत। तद्विशेषणादाने स्वर्गकामवाक्याव्याप्तिः स्यात् ।

किंच ''विधिरत्यन्तमप्राप्ते'' इत्यत्र 'अप्राप्त' इत्यनेन परिसंख्याव्यावृत्तिः, 'अत्यन्त' मित्यनेन नियमविधिव्यावृत्तिरिति खल्वभिमतम् । तत्र परिसंख्याव्यावृत्तिस्तावन्न लभ्यते । परिसंख्याविधेरप्यपूर्वविधिवदत्यन्ताप्राप्तेतरनिवृत्तिप्राप्तिफलकत्वात् । नचात्यन्ताप्राप्तभावप्राप्तिफलकत्वं विवक्षितमिति वाच्यम् । तथा सति ''दीक्षितो न जुहोति'' ''न तौ पशौ करोति'' ''नातिरात्रे षोडशिनं गृह्णाति'' इत्यादिषु सर्वेष्वप्यपूर्वविधिष्वव्याप्तिः स्यात् । तेषां दीक्षामध्यपश्वतिरात्राद्यप्राप्तपुरुषार्थ- होमाज्यभागषोडशिनिवृत्त्यादि-रूपाभावप्राप्तफलकत्वात् । किं चैवमपि

''सूतिकोच्छिष्टभाण्डस्य सुरा[1]मद्यहतस्य च ।
त्रिःसप्तमार्जनात् शुद्धिर्न तु कांस्यस्य तापनम् ॥''

''न नीलवसनं धार्यं न भूपालैरनुत्सवे ॥''

इत्यादिपरिसंख्याविधिष्वतिव्याप्तिर्दुर्वारा; तत्रेतरनिवृत्तेः तापन-नीलवस्त्रधारणात्मिकाया भावरूपत्वात् ।

अपि च नियमविधिव्यावर्तकमप्राप्तेरात्यन्तिकत्वं किं नाम? न तावत् सर्वोद्देश्यानुवृत्तिः । यद्यपि 'व्रीहीनवहन्ति' इति

1. सुराद्युपहतस्येति क पाठः ।

नियमविधिविषयावघाताप्राप्तेः सर्वोद्देश्यानुवृत्तिर्नास्ति; केषुचिद्दार्शपूर्णमासिकव्रीहिष्ववघातस्य प्राप्तेः; ततश्चावघातादिनियमविधिव्यावृत्तिरनेन लभ्यते; तथाऽपि विकल्पासहमेतत् । तथाहि - किमत्रोद्देश्यपदेन प्रापणीयोद्देश्यं विवक्षितं? प्रकृतविध्युद्देश्यं वा? । नाद्यः ''तं द्विरात्रेण - तं त्रिरात्रेणे''त्यादिवैकृताग्निविधिष्वव्याप्तिप्रसङ्गात् । तत्र प्रापणीयानां श्येनाकृत्यादिगुणानां स्वस्वोद्देश्येषु स्वर्गादिषु प्राप्तत्वेन काचित्काप्राप्तेरप्यभावेन सार्वत्रिकाप्राप्तेर्दूरापास्तत्वात् । न द्वितीयः; अग्रताविध्युद्देश्येषु द्वादशाहिकगावामयनिकेष्वाद्यद्वितीयेष्वहस्सु अग्रतानां प्राप्तत्वेन काचित्क्याः अप्यप्राप्तेरभावेन सर्वोद्देश्यानुवृत्ताप्राप्तिवार्ताया अपि दुर्लभत्वात् तेष्वग्रताविधिष्वव्याप्तेः । अपि च ''सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ'' ''सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः'' इति विध्योरव्याप्तिः । एतदभावेऽपि स्वर्गकामविधिभ्यां दर्शपूर्णमासज्योतिष्टोमानां स्वर्गा[1]दिरूपोद्देश्यैकदेशे प्राप्तत्वेन सर्वोद्देश्यानुवृत्ताप्राप्तेरभावात् । तथा ''त्रेधा तण्डुलान् विभजेत्'' इत्यत्राव्याप्तिः । अत्र तण्डुलशब्दो दार्शिकहविर्मात्रोपलक्षणार्थः । तण्डुलानां दधिशृतयोश्च वक्ष्यमाणदेवतासंयोजनबलादेव पूर्वदेवताभ्योऽपनयरूपस्य विभागस्य प्राप्तत्वादुपां[2]शुयाजाज्यमात्रेऽस्य विधेश्चारितार्थ्यम् । ततश्चैतद्विध्यभावे विभागस्योपांशुयाजाज्यमात्रेऽप्राप्तावपि सर्वोद्देश्यानुवृत्ताप्राप्तेरभावात् तत्राव्याप्तिः स्यादेव ।

ननु अप्राप्तेरात्यन्तिकत्वं नाम एकस्यामप्युद्देश्यव्यक्तौ व्यापकत्वं, तथा च न सार्वकाम्यविध्यव्याप्तिः । तदभावे ज्योतिष्टोमाद्यप्राप्तेः स्वर्गेतरफलव्यापिकायाः सत्त्वात् । नाप्यवघातादिनियमविध्यतिव्याप्तिः; तदभावे एकस्यामपि दार्शपूर्णमासिकव्रीहिव्यक्तावुद्देश्यभूतायां

1. अत्रादिपदमधिकमिति भाति । स्थितं तु क्लिष्टगत्या योजनीयम् ।
2. बह्वृचब्राह्मणानुसारेणामावास्यायां उपांशुयाजसत्तामभ्युपेत्येदमुक्तम् ।

व्यापिकाया अवघाताप्राप्तेरभावात् । न हि सार्वकाम्यविध्यभावे दर्शपूर्णमासादेः स्वर्गे प्राप्तिः तदितरफलेष्वप्राप्तिरितिवत् अवघात-विध्यभावे केषुचित् व्रीहिष्ववहननप्राप्तिः केषुचित् विदलनादिप्राप्त्या तदप्राप्तिरिति नियन्तुं शक्यते; येन कचिदुद्देश्ये [1]तदप्राप्तिर्व्यापिका स्यात् । किं तु सर्वेष्वपि व्रीहिष्ववहननेन वा वैतुष्यं कार्यं? विदलनादिना वा? इति तदुभयमपि पक्षे प्राप्यत इति चेन्न – एवमपि प्रागुक्ताग्रताविध्यव्याप्तेरपरिहारात्; तत्रोद्देश्ये विधेयाप्राप्तेरेवाभावात् । किं च गवामयने ''पृष्ठ्यषडहो बृहद्रथन्तरसामा कार्यः'' इत्यत्राव्याप्तिः; तदभावेऽपि द्वादशाहत आद्यस्याह्नो रथन्तरं- द्वितीयस्य बृहदित्येवम् अद्यद्वितीययोरुद्देश्ययोः रथन्तरसामत्वबृहत्सामत्वप्राप्त्या उक्थ्यादिष्वेव तदप्राप्तेः षडहरूपोद्देश्यव्यापिकाया रथन्तर — बृहत्सामत्वा-प्राप्तेरभावात् । अपि च ''यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीयात्'' इत्यत्रातिव्याप्तिः; तदभावे ऐन्द्रवायवाग्रत्वस्य नैमित्तिकत्वेन रूपेणात्यन्ताप्राप्तत्वात् [किंच?] ''उच्चैः ऋचा क्रियते'' इत्यादिनियमविधिष्वतिव्याप्तिः; उच्चैस्त्वादेर्नियम्यस्य उद्देश्यभूतेषु ऋग्वेदविहितकर्मादिष्वत्यन्ताप्राप्तत्वात् । नचैतेषामपूर्वविधित्वमेवा-स्त्विति तत्रातिव्याप्तिर्न दोषायेति वाच्यम् । तथाऽपि तादृशकर्माङ्गभूतेषु मन्त्रेष्वनियतस्वरप्राप्तौ स्वरविशेषनियमलम्भकानामेतेषां नियम-विधित्वमप्यस्तीति तत्रातिव्याप्तिर्दोष एव ।

ननु त्रैकालिकत्वमप्राप्तेरात्यन्तिकत्वमिति चेन्मैवम् । प्रतिप्रसवरूपेषु ''कृष्णलं श्रपयति'' इत्यादिष्वपूर्वविधिष्वव्याप्तेः । तत्रार्थलोपपर्यालोचनात् प्राक् श्रपणस्य कृष्णलेषु प्राप्तिसत्त्वेनाप्राप्तेस्त्रै-कालिकत्वाभावात् । एवमवभृथप्रकरणश्रुते ''अपबर्हिषः प्रयाजान्

1. अत्र तत्प्राप्तिरित्येव सर्वेषु कोशेषु दृश्यते । तदनन्वितमिति तदप्राप्तिरिति शोधितम् ।

यजति'' ''अपबर्हिषावनूयाजौ यजति'' इत्याद्यपूर्वविधावव्याप्तिः । ''अप्सुमन्तावाज्यभागौ यजति'' इति चोदकपरिलोपकाज्यभाग-विध्यभावे तत्र बर्हिर्व्यतिरिक्तानामपि प्रयाजानां चोदकात् प्राप्तेर्भविष्यत्त्वेन त्रैकालिकाप्राप्त्यभावात् । एवमपवादापवादेषु सर्वत्रा-व्याप्तिर्बोध्या ।

ननु तत्रात्यन्तिकत्वमपाक्षिकत्वमस्तु; युज्यते च नियम-विधिव्यावृत्त्यर्थस्य तस्य तथा निर्वचनं, 'नियमः पाक्षिके सती'ति नियमविधिलक्षणकरणादिति चेन्न — पाक्षिकत्वस्य [1]दुर्निर्वचत्वेना-पाक्षिकत्वमात्यन्तिकत्वमिति निर्वचनानुपपत्तेः । तथाहि - किमिदमप्राप्तेः पाक्षिकत्वं, प्राप्तिशबलितत्वं वा, अवच्छेदकभेदं विना प्राप्तिशबलितत्वं वा, उपायान्तरप्राप्तितद्विरहभिन्नावच्छेदकभेदं विना प्राप्त्यप्राप्त्योः करम्बितत्वं वा, आश्रयभेदं विना तयोर्मिलितत्वं वा? । **नाद्यः;** सार्वकाम्यविधिबृहद्रथन्तरसामत्वादिविधिष्व्याप्तेः; तत्र प्राप्त्यप्राप्त्योः करम्बितत्वस्योक्तत्वात् । एवं द्वादशाहिकगावा-मयनिकाग्रताविधिष्वव्याप्तेः; द्वादशाहगवामयनयोरग्रताप्राप्तेस्त-द्विकृतिष्वप्राप्तेश्च ।

न द्वितीयः; स्वर्गत्वावच्छेदेन प्राप्तिः तदितरफलत्वावच्छेदेन च ज्योतिष्टोमादेरप्राप्तिरित्येवमवच्छेदकभेदमादायैव प्राप्त्यप्राप्त्योः करम्बि-तत्वादुक्तविधिष्वव्याप्तिनिरासेऽपि अवघातादिनियमविधिष्वतिव्याप्तेः; तत्रापि विदलनाद्युपायान्तरप्राप्त्यवच्छेदेन व्रीहिष्ववघातस्याप्राप्तिः, तद्विरहावच्छेदेन प्राप्तिरित्येवमवच्छेदकभेदमादायैव प्राप्त्यप्राप्त्योः करम्बितत्वात्, तं विना तदभावात् ।

न तृतीयः; एतावतोपायविषयनियमविध्यतिव्याप्तिनिरासेऽपि कार्यादिविषयनियमविध्यतिव्याप्तेरपरिहारात् । तथाहि — ''यद्योन्यां

1. दुर्वचत्वेनेति ख पाठः ।

[गायति] तदुत्तरयोर्गायति''ति कार्यनियमविधिः; उत्तरयोस्साम-संस्कार्ययोरेवात्र नियमनात् । अतस्तत्र कार्यान्तरप्राप्तितद्विरहरूपावच्छेदकभेदमादाय प्राप्यप्राप्तिसंबलनेनोपायान्तरप्राप्त्यादिभिन्नावच्छेदक- भेदं विना प्राप्त्यप्राप्त्योः करम्बितत्वाभावस्यापाक्षिकत्वस्य सत्त्वादतिव्याप्तिः स्यादेव । तथा प्रकृत्यतिरात्रे विकल्पितस्य षोडशिग्रहस्य ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इति विकृतिविशेष[षे?]नियमोऽपि उपायद्वयप्राप्तावेकोपायनियमो न भवति । षोडशिग्रहाभावेऽपि क्रतोरवैगुण्ये षोडशिग्रहोपदेशो निरर्थकः स्यादिति तत्सार्थक्याय षोडशिग्रहसाध्यतया कल्पनीये फलभूम्नि तदभावस्योपायान्तरत्वाभावात् । अतस्तत्रापि पूर्ववदतिव्याप्तिः स्यात् । तथा ''ऋतावुपेयात्'' इति ऋतूपगमननियमे कदाचिदृतावनिच्छयाऽनुपगमनमपि प्राप्नुयादिति तदर्थं प्रवृत्ते, अनुपगमनस्योपगमनसाध्यं पुत्रोत्पादनं प्रत्युपायान्तरत्वाभावादतिव्याप्तिः स्पष्टैव । तथा ज्योतिष्टोमे ''बृहत्पृष्ठं भवति, रथन्तरं पृष्ठं भवति'' इति बृहद्रथन्तरसाधनके पृष्ठाख्ये द्वे स्तोत्रे विहिते; तयोः [1]स्तुतशस्त्राधिकरणन्यायेनादृष्टार्थतया प्रजाजानूयाजवद्भिन्नकार्ययोरपि वचनाद् विकल्पः; न तु व्रीहियवादिवदेककार्यत्वात् । ततश्चोपहव्यादि-विकृतिषु श्रुते ''बृहत्पृष्ठं भवती''ति नियमविधावतिव्याप्तिः, तत्र बृहत्पृष्ठकार्यमदृष्टं प्रति रथन्तरपृष्ठस्योपायान्तरत्वाभावात् ।

न चतुर्थः; उक्तविधिषु वैकल्पिकप्राप्तितद्विरहरूपावच्छेदकभेदमादायैव प्राप्त्यप्राप्त्योः करम्बितत्वेन तद्भिन्नावच्छेदकभेदं विना प्राप्ति-करम्बितत्वरूपस्याप्राप्तेः पाक्षिकत्वस्य सत्त्वादतिव्याप्तिनिरासेऽपि वैकल्पिकत्वस्य पाक्षिकत्वानुप्रवेशरहितस्य निर्वक्तुमशक्यत्वेनात्माश्रयात् । विधित्सितेन सह पाक्षिकत्वं विधित्सितस्य पाक्षिकत्वापादकत्वमित्यादिरूपेणैव वैकल्पिकत्वस्य निर्वाच्यत्वात् ।

1. मी.सू. 2.1.5

न पञ्चमः; यद्येप्येवं सति नियमविधिषु नातिव्याप्तिः; नियम्याप्राप्तेरेकस्मिन्नेवाश्रये प्राप्तिशबलितत्वात् ।। नापि सार्वकाम्यविध्याद्यव्याप्तिः; तत्र सर्वत्रापि स्वर्गाद्याश्रयव्यक्तिभेदेनैव प्राप्त्यप्राप्त्योः करम्बितत्वात् । तथाऽपि उपहव्यप्रकरणश्रुते ''अश्वःश्यावो दक्षिणा, स ब्रह्मणे देयः'' इति श्यावाश्वस्य क्रतुदक्षिणाभूतस्य कात्स्न्र्येन ब्रह्मसम्बन्धविधौ, ऋतपेयगते ''औदुम्बरस्सोमचमसो दक्षिणा, स प्रियाय सगोत्राय ब्रह्मणे देयः'' इति तादृशस्य सोमचमसस्य कात्स्न्र्येन ब्रह्मसम्बन्धविधौ चातिव्याप्तिः [चाव्याप्तिः?] । एकस्मिन्नेव श्यावाश्वरूपे सोमचमसरूपे चाश्रये ब्रह्मणः प्राप्त्यप्राप्त्योर्मिलितत्वेनाश्रयभेदं विना प्राप्त्यप्राप्त्योः करम्बितत्वरूपस्य पाक्षिकत्वस्यैव सत्त्वात् । तथा ''प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः'' इति विहितेष्टिसन्निधौ श्रुते ''सर्वं ब्रह्मणे परिहरति'' इतीडाहविश्शेषस्य कात्स्न्र्येन ब्रह्मसम्बन्धविधावतिव्याप्तिः [वव्याप्तिः?] तत्र एकस्मिन्नेव हविश्शेषरूपाश्रये ब्रह्मणः प्राप्त्यप्राप्त्योर्मिलितत्वात् ।

वस्तुतस्तु ''यदि सोमं न विन्देत्, पूतीकानभिषुणुयात्'' इति नियमविधावतिव्याप्तिः। एतद्विध्यभावे मन्दसदृशानां पूतीकानां यागे सर्वदैव प्राप्त्यभावात्। सुसदृशेषु सत्सु बह्ववयवानुग्रहाय तेषामेवोपादानप्राप्तेः। तथा वायव्यपशुगते ''हिरण्यगर्भस्समवर्तताग्र इत्याघारयति'' इत्यैन्द्राघारमन्त्रनियमविधावतिव्याप्तिः। एतद्विध्यभावे ''इन्द्र ऊर्ध्वोऽध्वरः'' इति मन्त्रस्यैव प्रकृतितः प्राप्त्या हिरण्यगर्भ इति मन्त्रस्य प्राप्तिकथाया अप्यभावात्। न च विकृतौ मन्त्रान्तरविधानसमये प्राप्त्यभावेऽपि प्रकृतौ ''इन्द्र ऊर्ध्वोऽध्वर'' इति मन्त्राविधानसमये सर्वेषामुपायान्तराणां पक्षे प्राप्तिरस्तीति सैवार्थतो विकृतावपि प्राप्तिरिति

वाच्यम्। तदानीमपि ब्राह्मणकल्पसूत्रादीनामिन्द्रप्रकाशकमन्त्राणा[1]ञ्च पक्षे प्राप्तावपि प्रजापतिलिङ्गकस्यास्य मन्त्रस्य ''प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय'' इति वाक्यशेषेण प्रजापतिपरतया विवृतहिरण्यगर्भशब्दयुक्तस्य प्राप्त्यसंभवात्। एवमन्येष्वपि एतादृशेषु नियमविधिष्वतिव्याप्तिरूहनीया। तस्मादप्राप्त्यात्यन्तिकत्वयोर-निर्वचनादयुक्तमपूर्वविधिलक्षणमिति॥

[॥ अपूर्वविधिलक्षणाक्षेपपरिहारः ॥]

अत्र ब्रूमः –

स्वाभावे तुल्यविध्यन्तरविरहयुते केवले वाऽपि यस्य
क्वाप्यत्यन्तानवाप्तिः स्वविषयगमकस्पृग्विरोधीतरस्य ।
स्वार्थानित्याप्तिनित्याधिगतिकरनिजाभावमानाप्रयुक्ता
तस्मिंस्तत्प्राप्तिकारी तदितरफलतावर्जितो वा विधिः
स्यात् ॥ १२॥

अस्यार्थः – तुल्यविध्यन्तराप्रवृत्तिसहितायां केवलायां वा स्वाप्रवृत्तौ यस्यार्थस्य स्वविषयप्रापकप्राप्यविरोधिभिन्नस्य यत्रात्यन्ता-प्राप्तिः स्वाप्रवृत्तिकालीनस्वविषयनियमा [ता?] नियतान्यतर-प्राप्तिप्रयोजकाभावप्रतियोगिमानान्तरा [प्रयुक्ता?] तस्मिंस्तत्प्राप्ति-फलको वा, तत्प्राप्तीतरफलकत्वरहितो वा विधिरपूर्वविधिरिति ।

अत्र स्वाप्रवृत्तौ यस्य यत्रात्यन्ताप्रवृत्तिः [प्राप्तिः?] तत्र तत्प्राप्तिफलको विधिः अपूर्वविधिरित्येतावतैव न वैकृताग्र्यतिग्राह्य-विधिष्वव्याप्तिः । तेषां द्विरात्रादिविकृतिषु श्येनाकृत्यादिगुणका-

1. मंत्रान्तराणां चेति विधिरसायने ।

मानामत्यन्ताप्राप्तौ सत्यां तत्र तत्प्राप्तिफलकत्वात् । नापि द्वादशाहिकगावामयनिकत्र्यनीकान्तर्गताग्रताविधिष्वव्याप्तिः; तेषां द्वादशाहगवामयनविकृतिविशेषेषु ऐन्द्रवायवाग्रत्वादीनामत्यन्ताप्राप्तौ सत्यां तत्र तत्प्राप्तिफलकत्वात् । नापि ''उपांशु पौर्णमास्यां यजन्'' इत्यत्राव्याप्तिः; तस्य स्वर्गे उपांशुयाजाप्राप्तौ सत्यां तत्र तत्प्राप्तिफलकत्वात् । नापि ''द्वे आहवनीये जुहोती''ति विधावव्याप्तिः; तस्यापराग्निकहोमानामत्यन्ताप्राप्तस्वर्गसम्बन्धप्राप्तिफलकत्वात् । नापि ''वैश्वदेवीं सांग्रहिणीं निर्वपेद् ग्रामकाम'' इति सांग्रहिण्याः फलविधावव्याप्तिः; तस्यात्यन्ताप्राप्तसन्निधिश्रुतामनहोमाङ्गत्व-प्राप्त्यर्थत्वात् । नापि ''व्रीहीनवहन्ती' त्यादिनियमविधिष्वतिव्याप्तिः; तेषां स्वाप्रवृत्तिकालीनात्यन्ताप्राप्तिकार्थप्राप्तिफलकत्वाभावात् । अवघातादीनामप्राप्तांशपरिपूरणफलकत्वात् ।

एवं सति स्वर्गकामविध्योरव्याप्तिः; तदप्रवृत्तावपि सार्वकाम्य-विधिभ्यां दर्शपूर्णमासज्योतिष्टोमानां स्वर्गसम्बन्धप्राप्तेरित्यत उक्तं–विध्यन्तराप्रवृत्तिसहितायां केवलायां वा तद्विध्यप्रवृत्ताविति । तेन न तत्राव्याप्तिः । सार्वकाम्यविध्यप्रवृत्तिसहितायां स्वर्गकामविध्यप्रवृत्तौ दर्शपूर्णमासादेः स्वर्गसम्बन्धाप्राप्तिसत्त्वात् । एवं तदप्राप्त्युपपादनेऽपि स्वर्गकामविध्योस्तत्प्राप्तिफलकत्वं नास्त्येव । न हि येन विनाऽपि यल्लभ्यते तत् तत्फलमिति वक्तुं शक्यते । अतस्तयोर-व्याप्तिस्तदवस्थैवेत्यत उक्तं — तत्प्राप्तीतरफलकत्वरहितो वेति । अत्रेतरशब्देनाप्राप्तांशपरिपूरणान्यनिवृत्ती विवक्षिते । ते च स्वर्गकाम-विध्योर्न फलमिति तयोरुक्तलक्षणानुमितिः ।

अत एव नानाशाखाग्निहोत्रादिविधिष्वव्याप्तिः परिहृता । तत्र केवलद्विध्यप्रवृत्तौ अग्निहोत्रादेरत्यन्ताप्राप्त्यभावेऽपि शाखान्तरगत-

विध्यन्तराप्रवृत्तिसहितायां तद्विध्यप्रवृत्तौ तदप्राप्तिसत्त्वात्; विनिगमना-विरहेण सर्वशाखागतानामप्यग्निहोत्रादीनां तत्प्राप्तिफलकत्वाच्च ।

उपहव्यादिविकृतिविशेषगते ''बृहत्पृष्ठं भवती''त्यादिनियम-विधावपि नातिव्याप्तिः । तत्र प्राकृतवैकृतविध्यप्रवृत्तिमादाय नियम्यस्यात्यन्ताप्राप्तेः कथञ्चिदुपपादनेऽपि तस्य तत्प्राप्तिफलकत्वा-भावात् । तदप्रवृत्तावपि चोदकत एव बृहत्पृष्ठप्राप्तिसंभवेन वस्तुतस्तस्य तन्नियमफलकत्वात् । एवं ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इति षोडशिग्रहनियमविधावपि नातिव्याप्तिः। तत्रापि प्राकृतवैकृतविध्य-प्रवृत्तिमादाय षोडशिग्रहस्यात्यन्ताप्राप्त्युपपादनेऽप्यतिदेशतः संभवत् -प्राप्तिकषोडशिग्रहप्राप्तिफलकत्वाभावेन तन्नियमफलकत्वात् । अतस्तत्रोभयत्रापि तत्प्राप्तिफलकत्वस्य तदितरफलकत्वरहितस्य चाभावेन नातिव्याप्तिवार्ताऽपि ।

एवं च केवलतद्विध्यप्रवृत्तिविवक्षायामपि प्रसिद्धनियमविध्यति-प्रसङ्गपरिहारार्थमवश्यविवक्षणीयेन तत्प्राप्तिफलकत्वेन तत्प्राप्तीतर-फलकत्वराहित्येन वा पृष्ठस्तुत्यादिनियमविध्यतिप्रसङ्गे निरस्तेऽपि अनेकविध्यप्रवृत्तिपक्षे तत्रातिप्रसङ्गोद्भावनं **विधिरसायनकृता** कथं कृतमिति विस्मयामहे । एतावतैव—पृष्ठस्तुत्यादिनियमविधौ लक्षणसाङ्कर्यं संपाद्य ग्रन्थविस्तरं महान्तमारचय्य ''दण्डी प्रैषानन्वाह'' इत्यादावनिष्टापादनं च कथं तेन कृतमित्यपि विस्मयामहेतराम् ।

यदि च पृष्ठस्तुत्यादिनियमविधिस्थले विध्यन्तराप्रवृत्ति-मादायात्यन्ताप्राप्तिरपि नियम्यस्य परिहर्तव्येत्याग्रहः; तदा विध्यन्तरे तुल्यत्वं विशेषणं देयमित्यभिप्रायेण श्लोके **तुल्यविध्यन्तरविरहयुत** इत्युक्तम् । विध्यन्तरस्य तुल्यत्वं च लक्षणीयविधिप्रवृत्ति-प्रयुक्तस्वबोध्यसम्बन्धप्राप्तिकाप्रवृत्तिदशाकत्वम् । तच्च शाखान्तर-

गताग्निहोत्रविधावस्ति । तदप्रवृत्तिदशायां तद्बोध्याग्निहोत्रसम्बन्धप्राप्तेः तैत्तिरीयशाखागताग्निहोत्रवाक्यरूपलक्षणीयविधिप्रवृत्तिप्रयुक्तत्वात् । शाखान्तरगताग्निहोत्रवाक्यस्य लक्षणीयत्वे तैत्तिरीयगताग्निहोत्रवाक्य-रूपस्य विध्यन्तरस्य निरुक्तं लक्षणीयविधितुल्यत्वं द्रष्टव्यम् । एवं सार्वकाम्यवाक्यस्वर्गकामवाक्ययोरपिं निरुक्तं परस्परतुल्यत्वमस्ति । तयोरन्यतराप्रवृत्तिदशायां तद्बोध्यस्वर्गसम्बन्धप्राप्तेरन्यतरप्रवृत्ति-प्रयुक्तत्वात् । वैकृतपृष्ठस्तुतिनियमविधिस्थले विध्यन्तरत्वेन त्वयोक्तस्य प्राकृतपृष्ठविधेः न निरुक्तं लक्षणीयविधितुल्यत्वमस्ति । प्राकृत-बृहत्पृष्ठविध्यप्रवृत्तिदशायां तद्बोध्यस्य ज्योतिष्टोमबृहत्पृष्ठसंबन्धस्य वैकृतबृहत्पृष्ठविधिना प्राप्त्यभावात् ।

एवं ''उत्तरेऽहन्द्विरात्रस्य गृह्यते'' इत्यत्र विध्यन्तरत्वेन त्वयोक्तस्य ''अतिरात्रे षोडशिनं गृह्णाती''त्यस्य न निरुक्तलक्षणीय-षोडशिग्रहनियमविधितुल्यत्वम् । तदप्रवृत्तौ तद्बोध्यस्यातिरात्रे षोडशिग्रहसंबन्धस्य विकृतिविशेषगतषोडशिग्रहनियमविधिना प्राप्त्य-भावात् ।

नापि गृहमेधीयगते ''आज्यभागौ यजती''त्यत्र चोदकलोपकत्वेन परिसंख्यारूपेऽतिव्याप्तिः; तस्याङ्गान्तरनिवृत्ति-फलकत्वेनाज्यभागप्राप्तिफलकत्वाभावात् । आज्यभागयोश्चोदकतः संभवत्प्राप्तिकत्वात् । किञ्च तत्र विध्यन्तरत्वेन त्वयोक्तस्य दार्शपूर्णमासिकाज्यभागविधेर्न लक्षणीयविधितुल्यत्वम्; तदप्रवृत्तौ तद्बाध्यस्य दर्शपूर्णमासाज्यभागसम्बन्धस्य लक्षणीयगृहमेधीय-गताज्यभागविधिना प्राप्त्यभावात् निरुक्तात्यन्ताप्राप्तेरपि तत्रा-भावान्नोक्तपरिसंख्याविधावतिव्याप्तिः ।

नापि ''व्रीहिभिर्यजेत, यवैर्यजेते''ति विध्योरतिव्याप्तिः; तयोरप्राप्तांशपरिपूरणफलकत्वेन वस्तुतस्तत्प्राप्तिफलकत्वाभावात् । यदि च तत्र व्रीहियवयोरत्यन्ताप्राप्तिरपि परिहर्तव्येति कुतूहलं? तदानीमत्यन्ताप्राप्तेर्विशेषणं स्वाप्रवृत्तिकालीनस्वविषयनियतप्राप्त्य-नियतप्राप्त्यन्यतरप्रयोजकाभावप्रतियोगिमानान्तराप्रयुक्तत्वरूपं दातव्यम् । तच्च व्रीहियवनियमविधिस्थले नास्ति । व्रीहिशास्त्रमात्रा-प्रवृत्तिकालीनायाः व्रीहिद्रव्यात्यन्ताप्राप्तेः व्रीहिशास्त्रविषयव्रीहि-द्रव्यानियतप्राप्तिप्रयोजकाभावप्रतियोगियवशास्त्ररूपमानान्तरप्रयुक्तत्वात् । एवं यवशास्त्रस्यापि लक्ष्यत्वे द्रष्टव्यम् । अत एव ''औदुम्बरो यूपो भवती'' त्यादिनियमविधावतिव्याप्तिरिति निरस्तम्। औदुम्बरत्वविध्य-प्रवृत्तिकालीनायाः औदुम्बरत्वात्यन्ताप्राप्तेः एतद्विधि-विषयौदुम्बरताऽनियतप्राप्तिप्रयोजकाभाव - प्रतियोगिप्राकृतबैल्वादि-विधिरूपमानान्तरप्रयुक्ततया तत्र निरुक्तात्यन्ताप्राप्त्यभावात् ।

अत एव ''यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, यदुपभृति प्रयाजानूयाजेभ्यस्तत्'' इति जौहवौपभृताज्यनियमविध्योरति-व्याप्तिरित्यपि प्रत्यक्षेपि । उक्तनियमविध्यप्रवृत्तिकालीनायाः प्रयाजानूयाजेषु जौहवौपभृताज्यात्यन्ताप्राप्तेरेतद्विधिविषयभूतजौह-वाद्याज्यद्रव्यानियतप्राप्तिप्रयोजकाभावप्रतियोगिना ''सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्य''मिति विधिना प्रयुक्तत्वात् । उक्तनियमविध्योः नियमफलकत्वेन वस्तुतोऽप्राप्तजौहवादिप्राप्ति-फलकत्वभावाच्च ।

अत एव मित्रविन्दादिप्रकरणगतसाप्तदश्यविधौ परिसंख्या-रूपेऽतिव्याप्तिरित्यपि निर्धूतम् । तत्रोक्तरीत्या साप्तदश्यस्यात्यन्ता-प्राप्त्युपपादनेऽपि तस्य विधेः साप्तदश्यस्य विकृत्यन्तरनिवृत्ति-

फलकत्वेन तत्प्राप्तिफलकत्वाभावात् । किञ्च तत्र निरुक्तात्यन्ताप्राप्तिरपि नास्त्येव । मित्रविन्दागतसाप्तदश्यविध्यप्रवृत्तिकालीनायाः तत्र साप्तदश्यात्यन्ताप्राप्तेरेतद्विधिविषयभूतसाप्तदश्यनियतप्राप्तिप्रयोजकाभावप्रतियोग्यध्वरकल्पानिरूढपश्वाग्रयणादिगतसाप्तदश्यविधिरूपमानान्तरप्रयुक्तत्वात् । एवमध्वरकल्पादिगतसाप्तदश्यविधिष्वप्यतिव्याप्तिर्निरसनीया ।

अत एव गृहमेधीयगतेषु ''अग्नये स्विष्टकृते समवद्यति'' ''इडामुपह्वयत'' इत्यादिपरिसंख्याविधिष्वतिव्याप्तिरित्यपि प्रत्याख्यातम् । तेषामप्यङ्गान्तरनिवृत्तिफलकत्वेन तत्प्राप्तिफलकत्वाभावात् । अन्यथा परिसंख्याविधित्वभङ्गात् । वस्तुतस्तु तत्र निरुक्तात्यन्ताप्राप्तिर्नास्त्येव । एतद्विध्यप्रवृत्तिकालीनायाः अत्यन्ताप्राप्तेरेतद्विधिविषयभूतस्विष्टकृदादिनियतप्राप्तिप्रयोजकाभावप्रतियोगिगृहमेधीयगताज्यभागविधिप्रयुक्तत्वात् ।

नन्वेवं सति प्रतिप्रसवरूपेषु अपूर्वविधिषु अव्याप्तिः स्यात् । तथाहि – प्रतिप्रसवस्थले हि तदप्रवृत्तिकालीनात्यन्ताप्राप्तिर्निषेधशास्त्रादिकृता । तदभावे प्रतिप्रसवविधिविषयस्यार्थस्य प्रतिप्रसवविधिं विनैव प्रापकप्रमाणेन प्राप्तिसम्भवात् । तथा च प्रतिप्रसवविधिविषयार्थनियतप्राप्तिप्रयोजकाभावप्रतियोगिनिषेधशास्त्रादिप्रयुक्ता प्रतिप्रसवविषयात्यन्ताप्राप्तिरिति तदप्रयुक्तात्यन्ताप्राप्त्यभावात् उक्तपरिसंख्याविधिष्विव तत्रापूर्वविधिलक्षणाननुगतिः स्फुटेति चेन्मैवम् — अत्यन्ताप्राप्तिविशेषणान्तर्भूतनियतप्राप्तौ स्वाफलीभूतेति विशेषणं दीयते । ततश्च परिसंख्यास्थले नियतप्राप्तिर्लक्षणीयविधिफलीभूता न भवतीति तदप्रवृत्तिकालीनायास्तद्विषयाप्राप्तेः स्वाफलीभूतनियतप्राप्तिप्रयोजकाभावप्रतियोगिविकृत्यन्तरगतसाप्तदश्यविध्यादिप्रयुक्तत्वान्न

तत्रापूर्वविधिलक्षणानुगतिः । प्रतिप्रसवस्थले तु नियतप्राप्तिर्लक्षणीय विधिफलीभूतेति तद्विध्यप्रवृत्तिकालीनायास्तद्विषयात्यन्ताप्राप्तेस्तत्फली भूतनियतप्राप्तिप्रयोजकाभावप्रतियोगिनिषेध- शास्त्रादिप्रयुक्तत्वेऽपि तदफलीभूतत्प्रयोजकाभावप्रतियोगिमाना- [न्तरा?] प्रयुक्तत्वात्तत्र लक्षणानुगतिरप्रतिहतेति दिक् ।

ननु स्वाप्रवृत्तिकालीनस्वविषयनियतप्राप्त्यनियतप्राप्त्यन्यतर-प्रयोजकाभावप्रतियोगिमानान्तराप्रयुक्तत्वं यद्यत्यन्ताप्राप्तेर्विशेषणं, तदा "न तौ पशौ करोती"[1] त्यादिनिषेधरूपापूर्वविधावव्याप्तिः । एतद्विधिविषयीभूताज्यभागाभावात्यन्ताप्राप्तेः एतदप्रवृत्तिकालीनायाः एतद्विधिविषयनियतप्राप्तिप्रयोजकाभावप्रतियोगिप्राकृताज्यभागविधि-प्रयुक्तत्वात् । न च स्वानुपजीव्यत्वं मानान्तरविशेषणम् । तेन न तत्राव्याप्तिः । प्राकृताज्यभागविधेः प्रतियोगिप्रसञ्जकत्वेन निषेधशास्त्रं प्रत्युपजीव्यत्वादिति वाच्यम्; हन्तैवं "औदुम्बरो यूपो भवती"ति नियमविधावतिव्याप्तिस्स्यात् । प्राकृतखादिरादियूपविधेर्यूपरूपोद्देश्य-समर्पकत्वेनोक्तनियमविध्युपजीव्यत्वात् तद्विषयात्यन्ताप्राप्तेरपि स्वानुपजीव्यमानान्तरप्रयुक्तत्वाभावादिति चेन्मैवम्—

स्वविरोधिप्रसञ्जकतावच्छिन्नस्वोपजीव्यताकत्वराहित्यं मानान्तर-विशेषणम् । तेन "न तौ पशौ करोती"त्यत्र नाव्याप्तिः । प्राकृताज्यभागविधेर्लक्षणीयविधिविषयविरोधिप्रसञ्जकत्वेनैवोपजीव्यतया स्वविरोधिप्रसञ्जकतावच्छिन्नस्वोपजीव्यताकत्वरहितत्वाभावादाज्यभागाभावा-त्यन्ताप्राप्तेस्तादृशमानान्तराप्रयुक्तत्वसत्त्वात् । नापि "औदुम्बरो यूपो भवती"त्यत्रातिव्याप्तिः; प्राकृतयूपविधेरुक्तनियमविधिं प्रति स्वाविरोधि-यूपसमर्पकत्वेनोपजीव्यत्वेऽपि स्वविरोधिप्रसञ्जकतावच्छिन्नस्वोप-

1. आदिपदं क कोशे नास्ति ।

जीव्यताकत्वरहिततया तद्विषयात्यन्ताप्राप्तेस्तादृशमानान्तरप्रयुक्तत्वादिति सकलं विकलङ्कम् ।

अत्यन्ताप्राप्तार्थप्राप्तिफलकत्वरूपमपूर्वविधिलक्षणं अत्यन्ताप्राप्तेतरनिवृत्तिप्राप्तिफलके परिसंख्याविधावतिव्याप्तमिति दूषणपरिहारार्थं स्वविषयप्रापकप्राप्यविरोधीतरत्वं अत्यन्ताप्राप्तार्थविशेषणं दत्तम् । तेन परिसंख्याविधौ नातिव्याप्तिः । तथा हि— यद्यपि गर्दभरशनातो मन्त्रस्य निवृत्तिरत्यन्ताप्राप्ता, तत्फलकत्वं च "इत्यश्वाभिधानीमादत्त" इति शास्त्रे वर्तते, तथाऽपि मन्त्रस्य निवृत्तिः स्वविषयप्रापकप्राप्यविरोधिनी; स्वशब्देन लक्षणीयविधिरुच्यते, तद्विषयो मन्त्रः, तत्प्रापकं मन्त्रलिङ्गं, तत्प्राप्यो मन्त्रः, तद्विरोधिनी मन्त्रनिवृत्तिरिति । एवं च "इत्यश्वाभिधानीमादत्त" इत्यस्य स्वविषयप्रापकप्राप्यविरोधिमन्त्रनिवृत्तिरूपार्थप्राप्तिफलकत्वेऽपि स्वविषयप्रापकप्राप्यविरोधीतरार्थप्राप्तिफलकत्वाभावान्न तत्रातिव्याप्तिः । "व्रीहीन् प्रोक्षती"त्यत्र तूक्तलक्षणमस्ति । तत्र स्वविषयः प्रोक्षणं, तत्प्रापकं "व्रीहीन् प्रोक्षती' ति शास्त्रमेव; तत्प्राप्यं प्रोक्षणं, तद्विरोधी प्रोक्षणाभावः, तदितरत्वं प्रोक्षणे वर्तत इति तत्प्राप्तिफलकत्वात्तस्य ।

ननु स्वविषयविरोधीतरत्वविशेषणदानेनैव परिसंख्याविधावतिव्याप्तिर्निरस्यते । मन्त्रनिवृत्तेर्लक्षणीयविधिविषयमन्त्रविरोधित्वात् । ततश्च किमुक्तकुसृष्टचेति चेत्— सत्यम् । तावता कतिपयपरिसंख्याविधिष्वतिव्याप्तिर्न वार्यते । [1]तत्फलीभूताया अङ्गान्तरनिवृत्तेस्तद्विषयभूताज्यभागादिविरोधित्वाभावेन स्वविषयविरोधीतराङ्गान्तरनिवृत्तिप्राप्तिफलकत्वात्तेषाम्; अतस्तत्रातिव्याप्तिवारणाय स्व-

1. अत्र तत्पदेन पूर्ववाक्योपात्तपरिसंख्याविधयः गृह्यन्ते । अतोऽत्र ग्रन्थपातशङ्का न कार्या ।

विषयप्रापकप्राप्यविरोधीतरत्वं विशेषणमुपात्तम् । तेन च तत्र नातिव्याप्तिः । तथाहि — स्वविषयः आज्यभागादिरूपः, तत्प्रापकः चोदकः, तत्प्राप्याण्यङ्गान्तराणि; तद्विरोधिनी अङ्गान्तरनिवृत्तिरिति तदितरार्थप्राप्तिफलकत्वं गृहमेधीयाज्यभागादिविधौ नास्तीति बोध्यम् ।

नन्वेवमपि "[1]पञ्च पञ्चनखा भक्ष्या" इत्यादिप्राप्तपरिसंख्यास्वतिव्याप्तिः; तत्र हि गोधादिपञ्चनखपञ्चकभक्षणं न विधीयते; रागप्राप्तत्वात् । न च प्रसिद्धपरिसंख्यास्थल इव प्रत्यक्षविधिना रागतः प्राप्तेः पूर्वं झटिति तद्भक्षणं विधीयत इति वाच्यम् । फलकल्पनागौरवप्रसङ्गात् । एतेन कदाचित् पञ्चनख[पञ्चक?] भक्षणस्याप्राप्तिसंभवेनावहननविधिवदस्य नियमविधित्वमस्त्विति निरस्तम्; नियमफलकल्पनागौरवप्रसङ्गात् । अतो वानरादिभक्षणनिवृत्तिरेव लक्षणयाऽत्र विधीयत इत्याश्रयणीयम् । ततश्चोक्तनिवृत्तेरेव लक्षणीयविधिविषयत्वेन [तस्याः?] तद्विरोधित्वाभावात् तत्रातिव्याप्तिरुक्तविशेषणेन दुर्वारेति चेत् — सत्यम् । तद्वारणाय त्रैदोष्यरहितो विधिरित्येवं विशेषणं लक्षणे प्रवेश्यते । प्राप्तपरिसंख्यासु च त्रैदोष्यनियमान्न तास्वतिव्याप्तिः । अपूर्वविधिषु च त्रैदोष्यप्रसक्त्यभावात् तत्र लक्षणानुगतिरिति दिक् । प्राप्तपरिसंख्यासु च सर्वासु त्रैदोष्यनियमं परोक्तदूषणनिरासपूर्वकमग्रे प्रदर्शयिष्यामः ।

अथ त्रैदोष्यरहितत्वं विधिविशेषणं न देयम् । वानरादिभक्षणनिवृत्तेरुक्तविध्यभावे अत्यन्ताप्राप्त्यभावादेव तत्रातिव्याप्तिविरहात्; वानरादिभक्षणेनेव तन्निवृत्त्याऽपि पुरुषस्येप्सितसिद्ध्या तन्निवृत्तेरपि कदाचित् प्राप्तिसंभवादिति चेत् —सत्यम् । तथाऽपि

1. पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ।
शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः ॥ रामा-किष्किन्धा-१७-३६.

अङ्गिरसां द्विरात्रप्रकरणश्रुते ''षोडश्युत्तरे'' इति प्राप्तपरिसंख्याविधावतिव्याप्तिस्स्यादेव । एतदभावे द्विरात्रान्तरेषु ''उत्तरेऽहन् द्विरात्रस्य गृह्यत'' इत्यनेन प्राप्तस्य षोडशिग्रहनियमस्य निवृत्तेरत्यन्ताप्राप्तिसत्त्वात् । न च तदत्यन्ताप्राप्तिः स्वविषयषोडशिग्रहनियमनिवृत्तिनियतप्राप्तिप्रयोजकाभावप्रतियोगिनिरुक्तषोडशिग्रहनियमविधिरूपमानान्तरप्रयुक्ता, ततश्च तादृशमानान्तराप्रयुक्तात्यन्ताप्राप्त्यभावात् षोडशिग्रहनियमनिवृत्तेः, नोक्तपरिसंख्यायामतिव्याप्तिरिति वाच्यम् । प्रतिप्रसवविध्यव्याप्तिवारणाय हि स्वाफलीभूतत्वं स्वार्थनियतप्राप्तिविशेषणं दत्तम् । प्रकृतविधिफलीभूता चेयं द्विरात्रान्तरेभ्यः षोडशिग्रहनियमनिवृत्तिनियतप्राप्तिरिति स्वाफलीभूततन्नियतप्राप्तिप्रयोजकाभावप्रतियोगिमानान्तराप्रयुक्तत्वं तदन्त्यन्ताप्राप्तेरस्तीति ''षोडश्युत्तर'' इति परिसंख्यायामतिप्रसक्तिः स्यादेव । सा मा भूदिति त्रैदोष्यरहितत्वं विधिविशेषणमावश्यकमेव ।

ननु ''तत्प्राप्तीतरफलकत्वरहित'' इत्येतावतैव तत्प्राप्तिफलकानामपूर्वविधीनां संग्रहाल्लक्षणे 'तत्प्राप्तिफलक' इति किमर्थं निवेश्यते । न च वैपरीत्यं शक्यशङ्कम्; स्वर्गकामविध्योस्तत्प्राप्तिफलकत्वाभावेन तत्संग्रहाय तत्प्राप्तीतरफलकत्वराहित्यस्यावश्यं निवेशनीयत्वादिति चेत् — न । तथा सति ''उपांशु पौर्णमास्यां यजन्'' इत्यादिषु परिसंख्यादिसंकीर्णापूर्वविधिषु अव्याप्तिस्स्यात् । तेषु तत्तत्प्राप्तीतरामावास्याव्यावर्तनादिफलकत्वसत्त्वेन तद्राहित्याभावात् । 'अतस्तत्संग्रहाय तत्प्राप्तिफलकत्वमपि निवेशितम् । तत्र तत्प्राप्तीतरफलकत्वेऽपि तत्प्राप्तिफलकत्वमस्तीति लक्षणानुवृत्तिरप्रत्यूहा ॥ १२ ॥

यत्तु अप्राप्तेरात्यन्तिकत्वस्य नियमविधिव्यावर्तकस्य निर्वक्तुमशक्यत्वाल्लक्षणमिदमयुक्तमिति विधिरसायनकृता भणितं —तत्रोच्यते —

आत्यन्तिकत्वमिह बोध्यमपाक्षिकत्वम्
अप्रापणस्य खलु पाक्षिकतां च तस्य ।
प्राप्त्या निजाधिकरणक्षणभिन्नकाल-
संभूतया शबलितत्वमुदीरयामः ॥ १३ ॥

अप्राप्तेरात्यन्तिकत्वं नाम पाक्षिकत्वाभावः । ''नियमः पाक्षिके सती''ति नियमविधिलक्षणे पाक्षिकत्वस्य निवेशिततया तदभावस्यैवापूर्वविधिलक्षणे निवेशयितुमुचितत्वात्। सर्वोद्देश्यानुवृत्त्यादिकमात्यन्तिकत्वमित्याशङ्क्य तत्र दूषणोद्भावनं **विधिरसायनकारस्य** ग्रन्थविस्तरमात्रफलकम् ।

''[1]उद्देश्येऽन्यत्र वा यद्विधिपदमितरद्वाऽपि न प्राप्तिमत् स्यात्तत्प्राप्तिं तत्र तन्वन् विधि''रिति विवक्षानन्तरं सर्वोद्देश्यानुवृत्तिरात्यन्तिकत्वमिति निर्वचनशङ्कायाः अचतुरस्याप्यनुन्मेषात् ।

यत्तु पाक्षिकत्वं दुर्वचमि[2]त्युक्तं, तन्न । अप्राप्तेः पाक्षिकत्वं स्वाधिकरणक्षणभिन्नक्षणाधिकरणया प्राप्त्या शबलितत्वमिति निर्वचनसंभवात् । दार्शपूर्णमासिकव्रीहिषु कदाचिदवघातस्य प्राप्तिः कदाचिदप्राप्तिरित्येवं सर्वैरपि पाक्षिकत्वोपपादनेन निरुक्तरूपमेव पाक्षिकत्वमिति स्फुटं प्रतीयमानत्वात् । एवं च न सार्वकाम्यविध्यव्याप्तिः । ज्योतिष्टोमादेः सार्वकाम्यविधिमात्राप्रवृत्तौ यदा स्वर्गेतरफलेऽप्राप्तिः, तदैव स्वर्गे प्राप्तिरिति अप्राप्त्यधिकरणक्षणाधिकरणया प्राप्त्या तत्राप्राप्तेर्मिलितत्वेऽपि स्वाधिकरणक्षणानधिकरणप्राप्तिमिलितत्वाभावेन निरुक्तपाक्षिकत्वाभावात् । नियमविधिस्थले त्वस्ति निरुक्तं पाक्षिकत्वम् । ''व्रीहीनवहन्ती''ति

1. विधिरसायनीयसप्तमश्लोकैकदेशानुवादोऽयम् ।
2. दुर्वचमितीत्युक्तमिति खादिकोशेषु पाठः ।

विध्यभावे यस्मिन् क्षणेऽवघातस्याप्राप्तिस्तस्मिन्नेव क्षणे तत्प्राप्तेरभावेन तत्राप्राप्तेः स्वाधिकरणक्षणभिन्नक्षणाधिकरणप्राप्तिशबलितत्वात् । ''पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्यः'' इत्यत्रापि नाप्राप्तेः पाक्षिकत्वम् । वैरूपादियुक्तेष्वहस्सु रथन्तरबृहत्सामत्वाप्राप्तेः आद्यद्वितीययोरह्नोः तत्प्राप्तेश्चैकक्षणाधिकरणत्वेनावघातप्राप्त्यप्राप्त्योरिव भिन्नकालीनत्वाभावात् । तथा ''त्रेधा तण्डुलान् विभजेद्'' इत्यत्र पूर्वदेवताऽपनयनरूपाविभागाप्राप्तेर्न पाक्षिकत्वम् । तण्डुलदधिशृतेषु उपांशुयाजाज्ये च तद्विध्यप्रवृत्तिदशायां विभागप्राप्त्यप्राप्त्योरेक-कालीनत्वेन भिन्नकालीनत्वाभावात् ।

एवं द्वादशाहिकगावामयनिकाग्रताविधिस्थले द्वादशाहगवामयन-योस्तद्विकृतिषु चाग्रताविशेषप्राप्त्यप्राप्त्योरेकक्षणाधिकरणत्वेन भिन्न-कालीनत्वाभावान्न पाक्षिकत्वम्। ''यद्योन्यां तदुत्तरयोर्गायती'' ति कार्यनियमविधिस्थले तु अस्ति पाक्षिकत्वम्। तद्विध्यभावे तृचगानप्रापिप्रमाणानुरोधेन कदाचिदुत्तरयोः प्राप्तिः कदाचिदन्ययो-रित्येवमुत्तराप्राप्त्यप्राप्त्योः भिन्नक्षणाधिकरणत्वात्। ''उत्तरेऽहन् द्विरात्रस्य गृह्यत'' इति षोडशिग्रहनियमस्थले तद्विध्यभावे षोडशिग्रहाप्राप्तेः निरुक्तं पाक्षिकत्वमस्त्येव। तदा षोडशिग्रहतदभावयोः विकल्पेन चोदकतः प्राप्त्या षोडशिग्रहप्राप्त्यप्राप्त्योः भिन्नकालीनत्वात्। ''ऋतावुपेया'' दिति ऋतूपगमननियमस्थले ऋतूपगमनतदभावयोः भिन्नकालीनत्वादस्त्येव नियम्याप्राप्तेः पाक्षिकत्वम्। तथा विकृति-विशेषगतपृष्ठस्तुतिनियमस्थलेऽपि तद्विध्यभावे बृहद्रथन्तरपृष्ठयोर्वि-कल्पेन चोदकतः प्राप्त्या नियम्यबृहद्रथन्तरपृष्ठप्राप्त्यप्राप्त्योर्भिन्न-कालीनत्वादक्षतं पाक्षिकत्वम्। अत एव ''अश्वः श्यावो दक्षिणा, स ब्रह्मणे देयः'' ''औदुम्बरस्सोमचमसो दक्षिणा, स प्रियाय सगोत्राय ब्रह्मणे देयः''; ''सर्वं ब्रह्मणे परिहरति'' इति विधिष्वव्याप्तिरिति

परास्तम्। श्यावाश्वसोमचमसहविश्शेषेषु ब्रह्मणः प्राप्त्यप्राप्त्योः करम्बितत्वेऽपि तयोरेककालीनतया अवघातप्राप्त्यप्राप्त्योरिव भिन्नकालीनत्वभावेन पाक्षिकत्वाभावात्॥ १३ ॥

यदि च **विधिरसायने** उत्प्रेक्ष्य दूषित एव पक्षस्समर्थनीय इति कुतूहलं, तदानीमित्थमुच्यते—

पाक्षिकत्वमिदमाश्रयभेदं रूपभेदमपि खल्वपहाय।
प्राप्तितद्विरहयोर्मिलितत्वं नात्र दूषणगणोऽस्ति परोक्तः ॥ १४ ॥

इदमपूर्वविधिलक्षणनिविष्टात्यन्तपदविवक्षितपाक्षिकत्वाभावप्रति-योगित्वरूपं पाक्षिकत्वं नाम आश्रयभेदं रूपभेदं च विना प्राप्त्यप्राप्त्योः करम्बितत्वम्। तच्च नियमविधिस्थले जागर्ति। एकस्मिन्नेव दार्शपूर्णमासिके व्रीहिद्रव्ये कात्स्न्यार्कात्स्न्यार्दिरूपभेदं विनैव तत्रावघातप्राप्त्यप्राप्त्योः करम्बितत्वात्। सार्वकाम्यादिविधिषु च तन्नास्ति। स्वर्गतदितरफलरूपव्यवस्थिताश्रयि [य?] भेदमादायैव तेषु प्राप्त्यप्राप्त्योः करम्बितत्वस्य परेणैवोपपादितत्वात्। "अश्वः श्यावो दक्षिणा, स ब्रह्मणे देय" इत्यादिकेषु त्रिषु विधिषु न निरुक्तं ब्रह्मसम्बन्धाप्राप्तेः पाक्षिकत्वम्। ब्रह्मणो हि कात्स्न्र्यरूपावच्छिन्नेषु श्यावाश्वसोमचमसहविश्शेषेष्वप्राप्तिः, अकात्स्न्र्यरूपावच्छिन्नेषु तु तेषु प्राप्तिरिति व्यवस्थितरूपभेदमादायैव प्राप्त्यप्राप्त्योः करम्बितत्वादिति दिक्।

यत्तु "यदि सोमं न विन्देत् पूतीकानभिषुणुया" दिति नियमविधावतिव्याप्तिः, एतदभावे सुसदृशानामेव न्यायतः प्राप्त्या मन्दसदृशानां पूतीकानामत्यन्ताप्राप्तेरिति दूषणमुक्तम् — तन्न। स्वाप्रवृत्तिकालीनस्वविषयनियतानियतान्यतरप्राप्तिप्रयोजकाभाव-

प्रतियोगिमानान्तराप्रयुक्तत्वरूपेणात्यन्ताप्राप्तिविशेषणेनैवोक्तातिव्याप्ति-निरासात्। ''यदि सोमं न विन्दे'' दित्यादिविध्य-प्रवृत्तिकालीनायाः पूतीकानामत्यन्ताप्राप्तेरेतद्विधिविषयपूतीकाऽनियत-प्राप्तिप्रयोजकाभावप्रतियोगिसुसदृशद्रव्यनियामकन्यायरूपमानान्तर-प्रयुक्तत्वात्। इदं चाभ्युपेत्योक्तम्। वस्तुतस्तु उक्तनियमविधेः पूतीकानियमफलकत्वेन तत्प्राप्तिफलकत्वाभावादेव तत्र नातिव्याप्तिरिति मन्तव्यम्॥ १४ ॥

यदपि वायव्यपशुगते ''हिरण्यगर्भस्समवर्तताग्र इत्याघार-माघारयति'' इत्यैन्द्राघारमन्त्रनियमविधावतिव्याप्तिः। एतद्विध्यभावे ''इन्द्र ऊर्ध्वोऽध्वरः'' इति मन्त्रस्यैव प्रकृतितः प्राप्त्या हिरण्यगर्भ इति मन्त्रस्य प्राप्तिकथाया अप्यभावादित्युक्तम्; अत्र ब्रूमः—

स्वस्वव्यावर्तनीयान्यतरविषयविध्यप्रवृत्तिक्षणोद्यत्-
पक्षत्प्राप्त्यर्थकार्यक्षमपरिकलनावर्जितात्यन्तिकी, या।
सेहाप्राप्तिप्रविष्टा, न भवति विकृतिस्थोत्तराघारशाखा-
संमार्गच्छेदमन्त्रोत्करपरिधिविधिष्वप्यतोऽतिप्रसक्तिः॥ १५ ॥

अस्यार्थः—

स्वस्वबाध्यान्यतरविषयकविध्यप्रवृत्तिकालीनानियतप्राप्तिकपदार्थकार्य-कारिप्राप्त्यसंवलितत्वमप्यत्यन्ताप्राप्तेरेतल्लक्षणप्रविष्टाया विशेषणम्। अनियतप्राप्तिकपदार्थकार्यकारी च कचिदनियतप्राप्तिकपदार्थ एव। कचित्तत्कार्यजननक्षमोऽन्य इत्युभयसाधारणमनियतप्राप्तिकपदार्थ-कार्यकारित्वम्। तेन ''हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयती'' त्यत्र नातिव्याप्तिः। एतद्विध्यभावे हिरण्यगर्भलिङ्गकमन्त्रात्यन्ताप्राप्तेः स्वबाध्यप्राकृतमन्त्रविषयकविध्यप्रवृत्तिकालीनानियतप्राप्तिककल्प-सूत्रोपद्रष्टृवचना[?] दिकार्यकरप्राकृतमन्त्ररूपपदार्थप्राप्तिसंवलितत्वेन

तदसंवलितत्वाभावात्। अत एव ''इषे त्वेति शाखामाच्छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि'' इति नियमविध्योर्नातिव्याप्तिः। एतद्विध्यप्रवृत्तिकालीनायाः ''इषे त्वोर्जे त्वे'' ति मन्त्रयोरत्यन्ताप्राप्तेः स्वविषय [क?] शाखाच्छेदनादिवाक्यरूपविध्यप्रवृत्तिकालीनानियतप्राप्तिककल्पसूत्रादि पदार्थप्राप्तिसंवलितत्वेन तदसंवलितत्वाभावात्।

केचित्तु इषे त्वेत्यस्य ऊर्जे त्वेत्यस्य च क्रियापदाध्याहारं विना निराकांक्षत्वायोगेन यत्किञ्चित्क्रियापदाध्याहारे कर्तव्ये सति कदाचिच्छेदनानुमार्जनवाचकयोरपि क्रियापदयोरध्याहारसंभवात्तदेकवाक्यतादशायां छेदनानुमार्जनयोः प्रकाशकत्वेन मन्त्रप्राप्तिसंभवेनात्यन्ताप्राप्त्यभावात् ''इषे त्वेति शाखामाच्छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि'' इति विध्योर्नाव्याप्तिरित्याहुः।

अत एव च — ''उत्करे वाजिनमासादयति, परिधौ पशुं नियुञ्जीते''ति नियमविध्योरतिव्याप्तिः; एतद्विध्यभावे सूक्ष्माग्रस्योत्करस्य वाजिनासादने, तनीयसः परिधेः पशुनियोजने चात्यन्ताप्राप्तत्वादित्यपास्ततमा। उत्करस्या (रात्य?) त्यन्ताप्राप्तेरुक्तविशेषणविशिष्टत्वाभावात् । स्वशब्दविवक्षितेन हि उत्करेण बाध्या वेदिः; तद्विषयकविधिः ''वेद्यां हवींष्यासादयति'' इत्ययम्; तदप्रवृत्तिकालीनानियतप्राप्तिका वेदिः, तत्प्राप्तिसंवलितात्यन्ताप्राप्तिक उत्करः इति तदत्यन्ताप्राप्तेः तादृशपदार्थप्राप्त्यसंवलितत्वा [भावा?] न्न तत्रातिव्याप्तिः। परिधिविधावपि नातिप्रसङ्गः। परिधिविध्यप्रवृत्तिकालीनायाः परिध्यत्यन्ताप्राप्तेः बैल्वखादिरपालाशयूपरूपानियतप्राप्तिकपदार्थप्राप्तिसंवलितत्वात्॥ १५ ॥

यत्तु — ''यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीयात्'' इत्यत्राप्रवृत्तिविशेषकरप्राप्तिपूर्विका परिसंख्या। इदं हि न

तावद्रथन्तसाम्नि ज्योतिष्टोमे ऐन्द्रवायवाग्रत्वस्य प्राप्त्यर्थम्; पाठक्रमादेव तत्र तत्प्राप्तेः सिद्धत्वात्। नापि बृहत्साम्नि ज्योतिष्टोमे तन्मा भूदित्येतदर्थम्; "यदि बृहत्सामा शुक्राग्रान्" इति बृहत्सामंत्वपक्षे शुक्राग्रत्वविधानादेव ततस्तद्व्यावृत्तिसिद्धेः। किन्तु नैमित्तिकत्वार्थं तस्येदं पुनर्विधानम्। पाठाद्धि ऐन्द्रवायवाग्रत्वमनैमित्तिकं प्राप्तम्; तदेव रथन्तरसामत्वनिमित्तकं क्रियते। तेन च नैमित्तिकीकरणेन ज्योतिष्टोमे न कश्चिदनुष्ठानविशेषो लभ्यते। किन्तु तस्मिन् पाठप्राप्तस्यैन्द्र-वायवाग्रत्वस्याविशेषेण सर्वासु विकृतिषु चोदकात् प्राप्तौ बृहद्रथन्तरान्यसामभ्यस्तदुभयसामभ्यश्च विकृतिभ्यो निमित्तराहित्येन तद्व्यावृत्तिर्लभ्यत इत्येवमत्राप्रवृत्तिविशेषकरनैमित्तिकत्वप्राप्तिपूर्विकैन्द्र-वायवाग्रत्वस्य निमित्तरहितविकृतिभ्यः परिसंख्या। तस्मिन् परिसंख्याविधावतिव्याप्तिः; तदभावे ऐन्द्रवायवाग्रत्वस्य नैमित्तिकत्व-रूपेणात्यन्ताप्राप्तत्वादिति —तन्न; तत्प्राप्तिफलत्वाभावात्। अत्र हि तत्प्राप्तिशब्देन प्रवृत्तिविशेषकरप्राप्तिरेव विवक्षिता। न त्वन्याऽपि; नैमित्तिकत्वेन प्राप्तेश्चाप्रवृत्तिविशेषकरत्वमिति त्वयैवोपपादितमिति नास्माभिस्तत्र यतितव्यम्। ततश्च "यदि रथन्तरसामा सोमः स्यादि"ति विधेः प्रवृत्तिविशेषकरात्यन्ताप्राप्तार्थप्राप्तिफलकत्वाभावात् तदितरपरिसंख्याफलकत्वाच्च तद्राहित्याभावान्न तत्रातिव्याप्तिः।

यदपि — "उच्चैर्ऋचा क्रियते" इत्यादिनियमविधिष्वतिव्याप्तिः, उच्चैस्त्वादेर्नियम्यस्योद्देश्येषु ऋग्वेदादिविहितकर्मसु अत्यन्ताप्राप्तत्वा-दित्युक्तम् — तदपि न; अस्यापि विधेः तत्प्राप्तिफलकत्वाभावादेव। तथा हि — ऋग्वेदादिविहितकर्मसु तावदुच्चैस्त्वं बाधितम्। शब्दादन्यत्र स्वरविशेषान्वयासंभवात्। बाधितं च न विधिवाक्यफलम्। तथा सत्यप्रामाण्यापत्तेः। अतोऽस्य विधेः ऋग्वेदादिविहितकर्माङ्गभूतमन्त्रेषु स्वरविशेषनियम एव फलम्। ततश्चास्मिन् विधौ यत्र

यस्यात्यन्ताप्राप्तिस्तत्र तत्प्राप्तिफलकं [त्वं?] तदितरफलकत्वराहित्यं वा नास्तीति नातिव्याप्तिः। कि[1]ञ्च [तत्प्रा?] प्राप्तिशब्देन प्रवृत्तिविशेषकरप्राप्तिरेव विवक्षितेत्युक्ततया ऋग्वेदादिविहितकर्मसु च तत्प्राप्तेः प्रवृत्तिविशेषकरत्वाभावेन प्रवृत्तिविशेषकरात्यन्ताप्राप्त्यार्थ-प्राप्तिफलकत्वाभावान्नोक्तविधावतिव्याप्तिः।

नन्वेवं द्वादशाहिकगावामयनिकाग्रताविधिष्वव्याप्तिः; तत्रोद्देश्येऽ-नैमित्तिकाग्रताप्राप्तेः प्रवृत्तिविशेषकरत्वाभावेन प्रवृत्तिविशेषकरात्यन्ता-प्राप्तार्थप्राप्तिफलकत्वाभावादिति चेत् – भ्रान्तोऽसि। नहि वयं उद्देश्ये प्रवृत्तिविशेषकरा ([2]रत्वाभावोऽ) त्यन्ताप्राप्तार्थप्राप्तिफलकत्वं लक्षणे निवेशयामः, येनोक्तदोषः स्यात्। किन्तु यत्र यस्यात्यन्ताप्राप्तिः तत्र प्रवृत्तिविशेषकरतत्प्राप्तिफलकत्वम्। ततश्च द्वादशाहादिविकृतिषु गर्गद्वि[त्रि?]रात्रादिषु यास्वग्रताविशेषाणामत्यन्ताप्राप्तिः तासु प्रवृत्तिविशेषकरतत्प्राप्तिफलकत्वमग्रताविधीनामस्तीति न तेष्वव्याप्तिः। यद्वा उक्ताग्रताविधिषु तत्प्राप्तीतरफलकत्वराहित्यस्य सत्त्वात्तत्र लक्षणानुवृत्तिरप्रत्यूहेति सर्वं समञ्जसम्॥

॥ कौस्तुभोक्तापूर्वविधिलक्षणानुवादः ॥

कौस्तुभकारस्तु — नियमपरिसंख्यातिरिक्तफलकविधित्वम-पूर्वविधित्वम्। तच्च सर्वेष्वपूर्वविधिष्वनुगतम्। न च ''यदि सोमं न विन्देत्पूतीकानभिषुणुयादि''त्यत्र सोमाभावे मन्दसदृशानां पूतीका-नामत्यन्ताप्राप्त्या तत्प्राप्तिफलकत्वस्यैव वक्तव्यतया नियमपरिसंख्याति-रिक्तफलकत्वमपूर्वविधिलक्षणं तत्रातिप्रसक्तमिति वाच्यम्। एतद्वचनस्य सुसदृशप्राप्तिन्यायप्रवृत्त्युत्तरप्रवृत्तौ प्रमाणाभावेन पूर्वप्रवृत्तस्यास्य पूतीकप्रापकत्वानुपपत्तेः। यत्र तु ''हिरण्यगर्भस्समवर्तताग्र

1. किन्त्वप्राप्तिशब्देन इति ख पुस्तकपाठः।
2. सर्वमातृकासु उपलभ्यमानोऽप्ययं पाठः अनन्वित इत्यालोच्य कुण्डलितः।

इत्याघारमाघारयति'' इत्यादौ हिरण्यगर्भप्रकाशकस्य मन्त्रस्यैन्द्राघारे कथमपि प्राप्त्यसंभवः, तत्र सत्यपि क्लृप्तनियमादृष्टजनकत्वेन उत्तराघारे मन्त्रविधौ ''औदुम्बरो यूपो भवती'' तिवदपूर्वविधित्वेऽपि न क्षतिः। ''सर्वे द्रव्यविधयो नियमविधय'' इति वादस्तु हीषादीनां वृष्ट्यादिफलार्थत्वेऽपूर्वविधित्वापत्तेरित्यादिव्यवहारवदौत्सर्गिकः। अत एव सर्वेष्वेव वाक्येषु विषयभेदेन विषयैक्येन वा क्रमेण यौगपद्येन वाऽनेकफलतात्पर्यकत्वेऽपि क्वचित् केनचिद् व्यवहारो मूले नानुपपन्नः इत्यवर्णयत् —

॥ कौस्तुभोक्तापूर्वविधिलक्षणनिरासः ॥

तन्न; ''यदि सोमं न विन्देत्'' इति नियमविधावतिव्याप्तेर्दुष्परिहरत्वात्। तथा हि — सुसदृशप्राप्तिन्यायात् पूर्वमेव तद्वचनस्य प्रत्यक्षसिद्धतया झटिति प्रवृत्तिरिति स्वीकृत्य त्वया[1] खलु मन्दसदृशानामपि पूतीकानामप्राप्तिरुपपादिता। एवं सति मुख्यालाभे तत्सदृशद्रव्यमुपादेयमिति न्यायप्रवृत्तेः पूर्वमपि उक्तवचनस्य झटिति प्रवृत्तिरस्तीति सोमाभावे सति अभावे विधिरूपं पूतीकानां यागसाधनत्वविषयमिदं वचनमपूर्वविधित्वमेवापद्येत। नहि सोमाभावे द्रव्यान्तराक्षेपादनन्तरं सुसदृशप्राप्तिन्यायप्रवृत्तेः पूर्वमवान्तरवेलायामेतस्य वचनस्य प्रवृत्तिरित्यत्र किंचित् प्रमाणं पश्यामः। एवं चैतस्य वचनस्य सर्वन्यायप्रवृत्तेः पूर्वं प्रवृत्तिस्वीकारे तदुत्तरं प्रवृत्तिस्वीकारेऽपि पूतीकानामत्यन्ताप्राप्तिरेवेति तत्रातिव्याप्तिस्त्वदुक्तगत्या दुर्निवारा। ''हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति'' इत्यत्रापि अस्मदुक्तरीत्याऽतिव्याप्तिनिवर्तनसंभवे लक्षणकरणासामर्थ्येन ''सर्वद्रव्यविधयो नियमविधयः'' इति मीमांसकमर्यादाया

1. खलु त्वयेति पाठः स्वरसः।

औत्सर्गिकत्वमंगीकृत्य ''औदुम्बरो यूपो भवति'' ''हिरण्यगर्भ-स्समवर्तताग्र इत्याघारमाघारयती'' त्यादेरपूर्वविधित्वमेव, न नियमविधित्वमिति तत्रातिव्याप्तिरदोष इति वर्णनमनुपपन्नमिति दिक्।

अस्मदीये लक्षणे स्वाप्रवृत्तिकालीनस्वविषयनियतानियतान्यतर-प्राप्तिप्रयोजकाभावप्रतियोगिमानान्तराप्रयुक्तत्वरूपविशेषणं, तादृश-मानस्य ''व्रीहीन् प्रोक्षति'' इत्यादावप्रसिद्धतया प्रोक्षणाद्यत्यन्ताप्राप्तौ दुर्ग्रहमिति न शङ्कनीयम्। तादृशमानप्रयुक्तेतरत्वस्य तदर्थतया तादृशमानप्रयुक्तत्वं पूतीकव्रीह्याद्यत्यन्ताप्राप्तौ गृहीत्वा तदितरत्वस्य प्रोक्षणाद्यत्यन्ताप्राप्तौ गृहीतुं शक्यत्वादिति न काऽप्यनुपपत्तिः।

॥ विधिरसायनोक्तनिष्कृष्टलक्ष्यलक्षणव्यवस्थानुवादः ॥

यत्तु स्वयं **विधिरसायनकृता**[1]

''[2]एवं प्राप्ते फणामस्त्रिविधविधिजुषां लक्षणानां विभागं
दृष्टार्थो यस्य सर्वो भवति नियम इत्यभ्युपेत्य व्यवस्थाम्।
अर्थाद्वा शब्दतो वा स्वविषयगलितादेवकारान्नञो वा
यस्स्यात् कस्यापि बाधस्स भवति परिसंख्येति रीतिं च कृत्वा॥''

इति श्लोकेन[3] — दृष्टार्थविधिस्सर्वोऽपि नियमविधिः। न चैवं पुत्रेष्टिकारीर्यादिविधेर्नियमविधित्वप्रसंगः। अदृष्टाद्वारकत्वस्यापि विवक्षि-तत्वात्। तथा अर्थाद्वा, स्वविषयप्रच्युताल्लाक्षणिकशब्दाद्वा, एवकाराद्वा, नञ्पदाद्वा लभ्यो यस्य कस्यापि भावस्याभावस्य वा यो बाधः, स सर्वोऽपि परिसंख्येति मर्यादां कुर्महे। तत्र ''अतिहायेडो बर्हिः प्रतिसमानयति जुह्वामौपभृतम्'' — इत्यत्र अर्थादुपरितनप्रयाजद्वये

1. अस्य ''अपूर्वविध्यादिलक्षणान्युक्तानी''त्युत्तरत्र अन्वयः। 2. विधिरसायने द्विचत्वारिंशः (४२) श्लोकोऽयम्। 3. अस्य ''लक्ष्यव्यवस्थां कृत्वा'' इत्यत्रान्वयः।

जौहवाज्यस्य प्राचीनप्रयाजत्रये औपभृताज्यस्य [च?] बाधः। ''द्वे आहवनीये'' इत्यत्र ''यदाहवनीये जुहोती''ति सामान्यशास्त्रप्रा[1]प्त- [प्तेः] विधिरूपस्वविषयप्रच्युतादप्राप्तनिषेधरूपार्थान्तरलक्षकात् तस्मादेव शब्दादग्निहोत्राहुत्यन्तराभ्यासेष्वाहवनीयबाधः। ''अत्र ह्येवावपन्ती'' त्यत्र एवकारेण पवमानातिरिक्तस्तोत्रेषु आवापबाधः। ''न तौ पशौ करोति'' इत्यत्र नञ्पदेन पशावाज्यभागबाधः। तस्मादार्थः, लक्ष्यः, एवकारप्रतिपाद्यः, नञर्थभूतश्च सर्वोऽपि निषेधः परिसंख्येति युक्तमित्येवं लक्ष्यव्यवस्थां कृत्वा—

[2]''नित्योदासान्यकिंचिद्विगलननियतं यस्य वा प्राप्तिमात्रं
तत्कालं यस्य वा धीस्समुदयति निवृत्त्यात्मनाऽवश्यमेव।
प्राप्तिं भिन्नस्य ताभ्यां कथमपि विदधत् स्यादपूर्वो विधिर्नः
कुर्वन् प्राप्तिं तयोस्स्यात् स नियमपरिसंख्याभिधानः क्रमेण॥''

इति श्लोकेन — नियम [म्य?] परिसंख्यान्यप्राप्तिकारी विधिरपूर्वविधिः। नियम्यप्राप्तिकारी विधिर्नियमविधिः। परिसंख्याप्राप्तिकारी विधिः परिसंख्याविधिः। अत्र किंचिद्विषयकयत्प्राप्तित्वावच्छिन्नं नित्यप्राप्तौदासीन्यभिन्नकिंचिन्निवृत्तिनियतं न भवति तन्नियम्यान्यदिति विवक्षितम्। यस्य यद्विधिकाले निवृत्त्यात्मना धीर्नियता सा तस्मिन् विधौ परिसंख्या नाम, तदन्यत्परिसंख्यान्यदिति। एवं च नोक्ताव्याप्त्यतिव्याप्त्यवकाशः। ननु बृहद्रथन्तरयोः प्रकृतौ विकल्पितत्वात्तयोः प्राप्तिरन्योन्यनिवृत्तिनियतैव। तथा च रथन्तरबृहत्पृष्ठयोर्नियम्यान्यत्वभावेन तत्प्राप्तिकारिविध्योरपूर्वविधित्वं न स्यादिति चेन्न। ''रथन्तरं पृष्ठं भवति, बृहत्पृष्ठं भवती''ति वाक्याभ्यां

1. प्राप्तेरिति पाठः विधिरसायने उपलभ्येत । 2. विधिरसायने त्रिचत्वारिंशः (४३) श्लोकोऽयम् । तत्र ''नित्यौदास्यान्यकिंचिद्विगलितनियतं यस्य तत्प्राप्तिमात्रं तत्कालं यस्य बोधः'' इति पाठभेदमिलितो दृश्यते (मुद्रितकोशे) ।

तयोज्योतिष्टोमे प्राप्तिः न परस्परव्यावर्तिका। अपूर्वसाधनयोस्तयोस्समुच्चयस्यैव ततः प्राप्तेः। किंतु उत्पत्तिवाक्यसिद्धं तदुभयमनूद्य साक्षादेव विकल्पं विदधता वचनान्तरेण रथन्तरं पृष्ठं बृहत्पृष्ठं वा कर्तव्यं, न तूभयमिति सिद्धे तदपेक्षा ये निर्देशाः ''यदि रथन्तरसामा, यदि बृहत्सामा'' इत्यादयः, तैरनूद्यमान एव रथन्तरादिसम्बन्धः परस्परव्यावर्तकः। अतस्तत्र रथन्तरप्राप्तित्वावच्छिन्नस्य बृहत्प्राप्तित्वावच्छिन्नस्य च यत्किंचिन्निवृत्तिनियतत्वाभावान्नाव्याप्तिः।

एवं नित्यप्राप्तौदासीन्यभिन्नकिंचिन्निवृत्तिनियतं यस्य यद्विषयप्राप्तित्वावच्छिन्नं तत्र तत्प्राप्तिकारी विधिः नियमविधिरिति लक्षणमपि युक्तमेव। अवहननस्य हि दार्शपूर्णमासिकेषु व्रीहिषु या प्राप्तिराक्षेपिकी वैधी वा सा द्विविधाऽपि नित्यप्राप्तौदासीन्याद्भिन्नस्य विदलनादेर्निवृत्त्या नियतैव। इयांस्तु विशेषः — वैधी प्राप्तिः नियतया विदलनादिनिवृत्त्या नियता। आक्षेपिकी तु पाक्षिक्येवेति; अवहननादिप्राप्तित्वावच्छिन्ने विदलनादिनिवृत्तिनियममात्रमविशिष्टम्। यद्यप्यवहननप्राप्तित्वावच्छिन्नं विदलनादिनिवृत्तिनियतं न भवति। अग्निचयने ''औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वाऽऽवहन्ति, अथैतदुपदधाती''ति उपधेयोलूखलसंस्कारत्वेन विहितस्यावहननस्यावैतुष्यार्थत्वाद्विदलनादिप्रसक्त्यभावेन तत्र तन्निवृत्त्यभावात्। तथाऽपि दार्शपूर्णमासिकव्रीहिविषयप्राप्तित्वावच्छिन्नस्य विदलनादिनिवृत्तिनियतत्वमस्तीति लक्षणानुगतिः।

अत एव किंचिद्विषयकत्वं प्राप्तिविशेषणमर्थवत्। एवं च वैकृतेषु रथन्तरपृष्ठादिनियमविधिष्वपि नाव्याप्तिः। प्र [प्रा?] कृतोत्पत्तिवाक्यतः प्राप्तौ व्यभिचारेण रथन्तरप्राप्तिमात्रस्य बृहदादिनिवृत्ति-

नियतत्वाभावेऽपि उपहव्यादिविकृतिषु या चोदकात् पाक्षिकी रथन्तरादिप्राप्तिः, या च वैशेषिकेण नियमविधिना [[1]वैशेषिकी तत्प्राप्तिः, तस्याः द्विविधाया अपि बृहदादिनिवृत्तिनियतत्वात्। न चैवं विकृतिषु बृहदादि] [निवृ[2]त्ति?] नियतप्राप्तिकस्य रथन्तरादेः प्रकृतौ प्राप्तकारी विधि [[3]रपि नियमविधिः स्यादिति वाच्यम्। नहि यस्य किञ्चिद्विषयप्राप्तित्वावच्छिन्नमुक्तरूपनिवृत्तिनियतं तस्य यत्र क्वचित् प्राप्तिकारित्वं नियमविधिलक्षणमुक्तम्। किन्तु यस्य यद्विषय-प्राप्तित्वावच्छिन्नमुक्तरूपनिवृत्तिनियतं तस्य तत्प्राप्तिकारी विधि] र्नियमविधिरित्युक्ततया विकृतौ तत्प्राप्तिकारिण एव नियमविधित्वात्। ननु ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इति षोडशिग्रहनियमविधौ लक्षणाव्याप्तिः। तत्र षोडशिग्रहप्राप्तिव्यतिरिक्तायाः तेन सह प्रकृतौ विकल्पितस्य षोडशिग्रहाभावस्य निवृत्तेरभावेन षोडशिग्रहप्राप्तौ तदभाव- [निवृत्ति?] नियतत्वासंभवादिति चेन्न। भेदेऽपि व्याप्तिसत्त्वेन तत्संभवात्; भेदगर्भव्याप्तेरविवक्षितत्वात्।

नियम्यपरिसंख्यान्यप्राप्तिकारी विधिरिति लक्षणे तत्प्राप्तिकारित्वं यथाकथंचिद्विवक्षितम्। न तु तत्र [4]किंचिद्विशेषो विवक्षितः। तेन विधिविषयस्य वाऽन्यस्य वा प्राप्तापोदितस्य, अत्यन्ताप्राप्तस्य वा कस्यचित्, स्वरूपेण, किंचिद्विशेषणा[5]वच्छिन्नत्वेन वा, येन केनचि[6]त्स्वरूपेण, प्रकृतविध्युद्देश्येऽन्यत्र वा यत्र कुत्रचित्, प्रकृत-

1. अत्र कुण्डलितांशः सर्वेषु तालकोशेषु न दृश्यते । तत्र चानन्वयः स्फुट एव विदुषाम् । अतो विधिरसायने उपलभ्यमानः पाठः उपरि दर्शितः ।
2. इदं निवृत्तिपदं विधिरसायनेऽपि नास्ति । औचित्यपर्यालोचनया योजितम् ।
3. अयमपि कुण्डलितः पाठः विधिरसायनस्य एव ।
4. ''कश्चिदिति''विधिरसायनपाठः ।
5. ''विशेषणान्तरे''ति विधिरसायने ।
6. येन केनचिद्रूपेणेति विधिरसायने ।

विध्युद्देश्येऽपि सर्वत्र, क्वचिदेव वा, क्वचिदपि कियत्याम[1]प्राप्तौ सत्यामसत्यां वा, यथाकथंचित्प्राप्तिं कुर्वन्नित्यर्थो लभ्यते। तेन पूर्वोद्भाविताग्र्यतिग्राह्यादिविधावव्याप्त्यभावः स्फुटः। स्वर्गकामवाक्ययोः नानाशाखाग्निहोत्रादिविधिष्वपि नाव्याप्तिः, तेषां स्वरूपेण प्राप्तिकारित्वाभावेऽपि अभ्युदयशिरस्कत्वेन प्राप्तिकारित्वात्।

ननु स्वरूपेण यदप्राप्तं तदेव प्रापणीयं, न तु तत् प्राप्तमपि अप्राप्तविशेषणवत् [2]तद्विशिष्टतामात्रेण स्वयं प्रापणीयतां लभते। तत्र विवक्षितविवेकेन विशेषणमात्रे प्रापणीयत्वपर्यवसानादिति चेन्न। ''पृष्ठैरुपतिष्ठते'' इत्यत्रोपोपसृष्टस्थाधातुवाच्ये समीपावस्थाने अग्न्यभिधानशिरस्कत्वविशिष्टरूपेण मन्त्रकार्यत्वमुपपद्यत इति [3]सप्तमे समर्थितत्वेन तद्वत्, फलभावनायाः यागकार्यत्ववच्च स्वरूपेणाप्रापणीयस्यापि अप्राप्तविशेषणविशिष्टतया प्रापणीयत्वोपपत्तेः। ननु तथाऽपि स्वरूपेण [4]प्रापण एव विधिव्यापार इति चेन्न; तथा नियमाभावात्। [5]आघाराग्निहोत्राधिकरणवार्त्तिके ''दध्ना जुहोती''त्यादीनां प्राप्तहोमविषयत्वेऽपि दध्यादिविशिष्टरूपेण होमप्राप्तिकारितया विधित्वस्य स्वीकृतत्वात्। अनुपादेयफलकालादिविधीनां प्राप्तकर्मविषयत्वेऽपि फलकालादिसंबन्धित्वरूपेण कर्मप्राप्तिकारितया विधित्वस्य स्वीकृतत्वाच्च निषेधरूपापूर्वविधिष्वव्याप्तिरिति शङ्कायाश्च नावकाशः। निषेधानां परिसंख्यारूपत्वस्य समर्थितत्वात्। प्रतिप्रसवविधिषु [6]ब्रह्मसम्बन्धविधिषु च नाव्याप्तिः। त्रिकालाप्राप्तस्येति विशेषस्य [7]कियत्यामपि प्राप्तावसत्यामेवेति विशेषस्य चाविवक्षणात्।

1. प्राप्ताविति विधिरसायने । 2. विशेषणविशिष्टतामात्रेणेति विधिरसायने । 3. मी.सू. ७-३-१४-३५. 4. ''स्वरूपेणाप्राप्तपण एव'' इति विधिरसायने । 5. मी.सू. २-२-५-१३. 6. ''सार्वकाम्यविधिषु''इत्यधिकं विधिरसायने । 7. ''उद्देश्ये सर्वत्रेति विशेषस्य'' इत्यधिकं विधिरसायने ।

एवं च सर्वस्मिन्नपि नियमविधौ परिसंख्याविधौ चातिव्याप्ति-रापतिताऽवशिष्यते। तन्निरासाय नियम्यपरिसंख्यान्यत्वं प्रापणीय-विशेषणं कृतम्।

ननु उक्तलक्षणमयुक्तं; प्राकृतपृष्ठविध्योरव्याप्तेः। ताभ्यां विधिभ्यां प्रापणीययोः बृहद्रथन्तरसाधनकपृष्ठाख्यस्तोत्रयोर्विकृतिविशेषेषु उपह-व्यादिषु विध्यन्तरैर्नियम्यत्वेन नियम्यान्यत्वाभावात्। नच प्रकृतविध्यनियम्यत्वं विवक्षितं; प्रकृतपृष्ठविधिनियम्याप्रसिद्ध्या तदन्यत्वासंभवेन तथा[दा?]ऽप्युक्ताव्याप्तितादवस्थ्यादिति चेन्न। किंचिद्विषयकयत्प्राप्तित्वावच्छिन्नं नित्यप्राप्तौदासीन्यभिन्नकिञ्चिन्नि-वृत्तिनियतं न भवति तत् नियम्यान्यदिति विवक्षितत्वात्। अस्ति च प्रकृतौ ज्योतिष्टोमे बृहत्प्राप्तित्वावच्छिन्नस्य रथन्तरप्राप्तित्वावच्छिन्नस्य च औदासीन्यभिन्नविदलनादिनिवृत्तिनियतेभ्योऽवहननप्रास्यादिभ्यो-ऽन्यत्वम्। तस्मादपूर्वविध्यादिलक्षण[1]त्रयमिदं निर्दुष्टमिति — अपूर्वविध्यादिलक्षणान्युक्तानि।

॥ विधिरसायनोक्तपरिसंख्याविधिलक्ष्यव्यवस्थादूषणम् ॥

तत्र आर्थः लक्ष्यः एवकारप्रतिपाद्यः नञर्थभूतश्च सर्वोऽपि निषेधः परिसंख्येति स्वीकृत्य कृता परिसंख्याविधिलक्ष्यव्यवस्था तावदनु-पपन्ना। तथा हि—

अप्यार्थं चेन्निषेधं कथयसि परिसंख्यानगोष्ठीप्रविष्टं
हन्त्याद्येषु प्रसिद्धो नियमविधिरपि प्रत्ततोयाञ्जलिस्स्यात्।
यद्यप्राप्तांशसंपूरणफलकतया वारयस्युक्तदोषं
हन्तैवं नातिहायेड इति तव मतः स्याद्विधिः पारिसंख्यः॥ १६॥

1. विध्यादित्रयलक्षणमिति ख पाठः।

यदि हि आर्थनिवृत्तिमपि परिसंख्यागोष्ठीप्रवेशं कारयसि तदा ''व्रीहीनवहन्ती''त्यादेरपि परिसंख्याविधित्वमेव स्यात् । तत्राप्यार्थ-नखविदलनादिनिवृत्तिसत्त्वात् । तथा च सकलतन्त्रप्रसिद्धं विधीनां त्रैराश्यं भज्येत । सर्वत्रापि नियमविधिस्थले परिसंख्याविधित्वोप-पादनसंभवात् । न च परिसंख्याविधिस्थले सर्वत्र नियमविधित्वोप-पादनं संभवति, येन विनिगमनाविरहादुभयोरपि सिद्धिस्स्यादिति शङ्क्येत । ''इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते'' इत्यादौ मन्त्रस्य नियतप्राप्तत्वेन पक्षप्राप्त्यभावात् ।

ननु अप्राप्तांशपरिपूरणफलकत्वं नियमविधित्वं, निवृत्तिफलकत्वं परिसंख्याविधित्वं, ततश्च न ''व्रीहीनवहन्ती''त्यादेः परिसंख्या-विधित्वं, तत्र विधेयगतत्वेन प्रत्यासन्नस्याप्राप्तांशपरिपूरणस्यैव फलत्वेन आर्थविदलननिवृत्तेः फलत्वाभावात् । अतो न विधित्रैविध्यभङ्ग इति चेत् — हन्तैवं ''अतिहायेडो बर्हिः प्रतिसमानयते जुह्वामौप-भृत''मिति विधेः त्वदभिमतं परिसङ्ख्याविधित्वं न सिद्ध्येत् । तस्यात्यन्ताप्राप्तबर्हिःप्रयाजोपक्रमकालीनौपभृताज्यसमानयनप्राप्ति-फलकत्वेनार्थनिवृत्तिफलकत्वाभावात् । न हि विधेरनुनिष्पादिनी परिसङ्ख्या फलत्वेन स्वीकर्तुं युक्ता । तथा सति अनुनिष्पादिन्या विदलननिवृत्तेरपि अवघातविधिफलत्वापत्तेः । [1]अत एव त्वया नवमश्लोकावतारिकायां ''अतिहायेड'' इत्यादिविधिना बर्हिः-प्रयाजोपक्रमे जुह्वां प्रयाजार्थौपभृताज्यसमानयनप्राप्तिः, (?) तदनुनिष्पादिनी जौहवाज्यं प्राचीनप्रयाजत्रयार्थम्, औपभृताज्यमु-परितनप्रयाजद्वयार्थमिति(?) परिसंख्येति प्रतिपादितमिति दिक् ॥ १६ ॥

1. परिसंख्याविधित्वस्य त्वदभिमतत्वादेवेत्यर्थः ।

॥ विधिरसायनोक्तापूर्वविधिनिष्कृष्टलक्षणदूषणम् ॥

लक्षणान्यपि त्वदुक्तानि न युक्तानि। तथाहि—

प्राप्तेः किञ्चिन्निवृत्त्या सह हि नियतता कालिकी दैशिकी वा
नो युक्ता, प्रोक्षणादेरपि नखदलनाभावनैयत्यसत्त्वात्।
कर्मादिध्वंसयोगात् स्वविरहविरहव्याप्तिसत्त्वादभेदे-
ऽप्यात्रेयस्वर्णदानप्रभृतिविधिषु चाव्याप्तिरन्यापि बोध्या॥ १७॥

किंचिद्विषयकयत्प्राप्तित्वावच्छिन्नं नित्यप्राप्तौदासीन्यभिन्न-किंचिन्निवृत्तिनियतं नियम्यं, तदन्यपरिसंख्यान्यप्राप्तिकारी विधिरपूर्वविधि-रित्यत्र किंचिन्निवृत्त्या सह प्राप्तेः किं कालिकी व्याप्तिर्विवक्षिता? दैशिकी वा? । नाद्या; यदा प्रोक्षणप्राप्तिस्तदा विदलनाभाव इति व्याप्तेस्सत्त्वात्प्रोक्षणविधौ प्रोक्षणस्यापि नियम्यत्वप्रसङ्गेन तदन्यप्राप्ति-कारित्वाभावात्तत्राव्याप्तेः । अत एव न द्वितीया; यत्र दार्शपूर्णमासिकव्रीहिषु प्रोक्षणप्राप्तिस्तत्र नखविदलननिवृत्तिरिति दैशिकव्याप्तेरपि सत्त्वात्, अवघातस्य विदलनादिनिवृत्तिव्याप्यता-यास्त्वयैवोपपादितत्वेन तद्व्याप्यस्य प्रोक्षणस्य विदलनादिनिवृत्ति-व्याप्यत्वावश्यंभावात्, व्याप्यव्याप्यस्य सुतरां व्याप्यत्वात् । अत एव चोभयविधव्याप्तिविवक्षायामपि न निस्तारः । कालिक्या दैशिक्याश्च व्याप्तेरुपपादितत्वात् ।

किं च कालिकव्याप्तिविवक्षायां प्रोक्षणप्राप्तिकाले क्रिया-विभाग-पूर्वदेशसंयोगादीनां निवृत्त्यनन्तरमेव जलसंयोगोत्पत्त्या क्रियादिनिवृत्तेस्सत्त्वेन प्रोक्षणप्राप्तेः किंचिन्निवृत्तिनियतत्वात् प्रोक्षणस्य नियम्यत्वापत्तिः । दैशिकव्याप्तिपक्षेऽपि प्रोक्षणप्राप्तेः स्वाभावा-भावव्याप्तत्वात् प्रोक्षणस्य नियम्यत्वापत्तिर्दुर्वारा । न च प्रोक्षणस्य

तदभावाभावाभिन्नत्वेन तेन सह कथं व्याप्तिरिति वाच्यम् । अत्र लक्षणे भेदगर्भव्याप्तिर्न विवक्षितेति अभेदेऽपि व्याप्यव्यापकभावस्संभवतीति त्वयैवोक्तत्वात् । अन्यथा ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इत्यत्र षोडशिग्रहस्य नियम्यत्वानापत्तिः । तत्र षोडशिग्रहाभावनिवृत्तेः षोडशिग्रहात्मकतया तया सह षोडशिग्रहस्य व्याप्त्यसंभवात् ।

अस्तु वाऽत्र भेदगर्भाया एव व्याप्तेर्विवक्षा । तथाऽपि प्रोक्षणादेरपूर्वविधिविषयस्य नियम्यत्वं दुर्वारम् । तथाहि – घटाभावाभावो हि न घटः; भावस्याभावरूपत्वासंभवात् । किं तु अन्य एव । न चैवमनवस्था; घटाभावाभावाभावः घटाभाव एवेत्यङ्गीकारात् । ततश्च प्रोक्षणाभावाभावस्य प्रोक्षणभिन्नत्वेन तेन सह प्रोक्षणस्य व्याप्तेरप्रत्यूहत्वात् सर्वस्याप्यपूर्वविधिविषयस्य स्वाभावाभावनियतत्वेन नियम्यत्वं स्यादेवेति अपूर्वविधिलक्षणस्यासंभवः । अपि चाभेदेऽपि व्याप्तिस्वीकारपक्षे प्रोक्षणस्य स्वप्रागभावनिवृत्तिनियतत्वान्नियम्यत्वं दुरपह्नवम् ।

अथ प्राप्तेः किंचिन्निवृत्तिनियतत्वं नाम स्वप्रयुक्तकिंचिन्निवृत्ति[क?] त्वं, किंचिन्निवृत्तिप्रयोजकत्वं वा विवक्षितम् । तेन नोक्तदोषः । नखविदलननिवृत्तेरवघातप्रयुक्तत्वेन प्रोक्षणप्रयुक्तत्वाभावादिति चेत्—न । तथा सति ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इति नियमविधावतिव्याप्तेः । षोडशिग्रहाभावनिवृत्तेः षोडशिग्रहरूपतया तत्प्रयुक्तत्वाभावात्, षोडशिग्रहस्य स्वाभिन्नस्वाभावाभावप्रयोजकत्वाभावाच्च । अन्यथा प्रोक्षणादेरपि स्वाभावाभावप्रयोजकत्वापत्त्या नियम्यत्वप्रसङ्गेनासंभवापातात् ।

तदिहेदमवधेयम्— स्वस्य स्वाभावाभावनियतत्वं स्वीक्रियते वा? न वा? । आद्ये प्रोक्षणादिविधिष्वसंभवः । सर्वेषामपूर्वविधिविषयाणां

स्वाभावाभावनियतत्वात् । अन्त्ये षोडशिग्रहनियमविधावतिव्याप्तिः । तस्य स्वाभावाभावेन नियतत्वाभावात् नियम्यान्यत्वापत्तेरिति उभयतः [1]पाशा रज्जुः । वस्तुतस्तु ''आत्रेयाय प्रथमाय हिरण्यं दद्या[2]त्'' इत्यपूर्वविधावुक्तलक्षणस्याव्याप्तिः । दानप्राप्तित्वावच्छिन्नस्य स्वत्व-निवृत्तिनियतत्वेन दानस्य नियम्यत्वापातात् । अभेदेऽपि व्याप्तिस्वीकारे सति विशिष्टस्य दानस्य विशेषणभूतया स्वत्वानिवृत्त्या सह व्याप्तेर्निर्विवादत्वात्॥ १७॥

किञ्च प्रोक्षण ए [मे?] कदेशजलसंयोगो न सर्वत्र तत्-
संयोगस्तदिहाम्बुयोगविरहव्याप्तिः स्फुटा प्रोक्षणे ।
अव्याप्तिः कपिशाश्वसोमचमसादिब्राह्मताचोदना-
स्वध्वर्युप्रमुखाप्तिहानिनियता तेषां यतो ब्राह्मता॥ १८॥

प्रोक्षणं नाम एकदेशजलसंयोगफलको हस्तव्यापारविशेषः । तथा च प्रोक्षणप्राप्तिमत्सु ऐष्टिकव्रीहिषु एकदेशजलसंयोगवत् एकदेशजलसंयोगाभावोऽप्यस्तीति तादृशप्रोक्षणप्राप्तित्वावच्छिन्नस्य किञ्चिन्निवृत्तिनियतत्वात् प्रोक्षणविधावव्याप्तिः । ननु लक्षणीय-विध्यप्रवृत्तितर्कणकालीनप्रसक्तिमत्किंचित्पदार्थप्रतियोगिकनिवृत्तिनिय-तत्वं प्राप्तेर्विवक्षितम् । सर्वौषध्यवहननस्थले तस्यावैतुष्यार्थत्वेन विदलनप्रसक्तेरेवाभावेन तन्निवृत्तिनियतत्वं नास्तीत्युक्त्या तथा विवक्षासूचनात् । ततश्च प्रोक्षणविध्यप्रवृत्तौ व्रीहिष्वेकदेशजलसंयोगस्य प्रसक्त्यभावान्न तन्निवृत्तिनियतत्वमादाय प्रोक्षणस्य नियम्यत्वम्; येन तद्विधावव्याप्तिः स्यादिति चेत् — एवमपि प्रोक्षणाभावनिवृत्ति-नियतत्वमादाय तत्र लक्षणा[3]गमनस्य दुर्वारत्वात् ।

1. उभयतःस्पाशा रज्जुरिति कचित् पाठः । स्पश बन्धने इति धातोर्निष्पन्नः स्पाशशब्दः । उभयतो बन्धिका रज्जुरित्यर्थः । 2. ददातीति ख पाठः । 3. लक्षणस्य अगमनम् अव्याप्तिरित्यर्थः ।

प्रोक्षणविध्यप्रवृत्तिकाले प्रोक्षणाभावस्य प्रसक्तिसत्त्वात् । न च नित्यप्राप्तौदासीन्यभिन्नेत्यनेन स्वाभावभिन्नत्वमपि विवक्षितमिति नोक्तदोष इति वाच्यम्; षोडशिग्रहनियमविधावतिव्याप्तेः । तत्र विधिविषयस्य षोडशिग्रहस्य स्वाभावनिवृत्तिनियतत्वेऽपि तद्भिन्ननि-वृत्तिनियतत्वाभावात् ।

अपि च "अश्वः श्यावो दक्षिणा, स ब्रह्मणे देयः, औदुम्बरस्सोमचमसो दक्षिणा, स प्रियाय सगोत्राय ब्रह्मणे देयः, सर्वं ब्रह्मणे परिहरति," इत्यपूर्वविधा[1]वव्याप्तिः । तत्र विधिविषयस्य श्यावाश्व - सोमचमस - हविश्शेषाणां कार्त्स्न्येन ब्रह्मसम्बन्धस्य ऋत्विगन्तरसम्बन्धनिवृत्तिनियतत्वेन नियम्यान्यंत्वाभावात् । न च मा भूदेषामपूर्वविधित्वमिति वाच्यम्; "ब्रह्मसम्बन्धविधिषु च नाव्याप्तिः, कियत्यामपि प्राप्तावसत्यामेवेति विशेषस्य विवक्षणात्" इत्येवं ब्रह्मसम्बन्धविधावव्याप्तिमाशङ्क्य त्वया तस्याः परिहृतत्वेन तेषाम-पूर्वविधित्वस्य तवापि सम्मतत्वात् । इयं चाव्याप्तिरुक्तविवक्षाभिरपि दुर्निवारा । निवृत्तिप्रतियोगिनोऽध्वर्युप्रभृतिसम्बन्धस्य लक्षणीयविध्य-प्रवृत्तितर्कणकालीनप्रसक्तिमत्त्वात्, स्वप्रयुक्तऋत्विगन्तरसम्बन्ध-निवृत्तिनियतत्वस्य तत्सम्बन्धनिवृत्तिप्रयोजकत्वस्य च विधिविष-ब्रह्मसम्बन्धप्राप्तौ सत्त्वाच्च ॥ १८ ॥

अव्याप्तिंश्चातिहायेड इति विधिवचस्यापतत्येव यस्माद्
बर्हिःप्रारम्भकालौपभृतघृतसमानीतिरेतद्विधेया ।
प्राक्कर्तव्यप्रयाजत्रितयपरिचयापायनैयत्यजुष्टा-
स्वान्योपायापगत्याऽवहतिरिव सह व्याप्तियुक्ता नियम्या ॥ १९ ॥

1. विधिष्विति स्वरसः ।

उक्तलक्षणस्य ''अतिहायेडो बर्हिः प्रतिसमानयते जुह्वामौपभृत''मित्यपूर्वविधावप्यव्याप्तिरापतत्येव। एतद्विधिविषयस्य बर्हिःप्रयाजोपक्रमकालीनस्यौपभृताज्यसमानयनस्यौपभृताज्ये प्राचीनप्रयाजत्रयसम्बन्धनिवृत्तिनियतत्वात्। अतो यथाऽवघातस्य उपायान्तरनिवृत्तिनियतत्वान्नियम्यत्वेन नियम्यान्यप्राप्तिकारित्वाभावात् ''व्रीहीनवहन्ती''ति विधेर्नापूर्वविधित्वम्, एवं ''अतिहायेड'' इत्यादिविधेरपि अपूर्वविधित्वं न स्यात्। प्राचीनप्रयाजत्रयसम्बन्धिनिवृत्तिनियतत्वेन समानयनस्य नियम्यतया तद्विधेर्नियम्यान्यप्राप्तिकारित्वाभावात्। अस्यापूर्वविधित्वं प्रयाजत्रयसम्बन्धनिवृत्तेरेतदनुनिष्पादित्वं च त्वयैव [1]नवमश्लोकावतारिकायामुपपादितमिति नास्माभिरुपपादनीयम्। उक्तविवक्षाभिरप्यस्या अव्याप्तेर्दुष्परिहरत्वं तु स्फुटमेव॥ १९॥

किञ्च प्राक्तनदेवतापरिचयव्यावृत्तिनैयत्यवद्
दात्रग्न्यादिकदेवतान्वयविधिष्वव्याप्तिरापद्यते।

''ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरु''मिति दार्शिकहविषां देवतान्तरसंयोजनकारिषु अपूर्वविधिष्वपि त्वदुक्तलक्षणस्याव्याप्तिः स्यात्। तत्र विधिविषयदातृत्वविशिष्टाग्न्यादिदेवतान्तरसम्बन्धप्राप्तेः पूर्वदेवतासम्बन्धनिवृत्तिनियतत्वात्। देवतान्तरसम्बन्धविधाने सति अर्थात् पूर्वदेवतासम्बन्धनिवृत्तिरित्यङ्गीकारात्। तस्मादुक्ताव्याप्त्यादिदोषग्रस्तत्वात् त्वदुक्तमपूर्वविधिलक्षणमयुक्तम्॥

1. अस्मिन् ग्रन्थे षोडशश्लोके ''अतिहायेड'' इत्यत्र परिसंख्याविधित्वं विधिरसायनकृदभिमतमिति प्रतिपादितम्। अत्र चापूर्वविधित्वं तदभिमतमिति प्रतिपाद्यते। अतः तस्य उभयरूपत्वं तदभिमतमिति अङ्गीकर्तव्यं भवति। अथ वा अकामेनापि तस्यापूर्वविधित्वमुपपादितमिति वा।

॥ विधिरसायनोक्तनियमविधिनिष्कृष्टलक्षणदूषणम् ॥

पूर्वं येषु विधिष्वपूर्वविधिलक्ष्माव्याप्तयो दर्शिताः
तेषूह्यो नियमाभिधानविधिलक्ष्मातिप्रसङ्गस्स्वयम् ॥ २० ॥

नियमविधिलक्षणमप्यतिव्याप्तिग्रस्तत्वादयुक्तम्। पूर्वं हि येष्वपूर्वविधिष्वपूर्वविधिलक्षणास्या[1]व्याप्तिरुक्ता, तेषु नियमविधिलक्षणस्यातिव्याप्तिः स्वयमेवोहनीया। ''व्रीहीन् प्रोक्षती''ति विधेः प्रोक्षणाभावानिवृत्तिनियतप्रोक्षणप्राप्तिकारित्वात्, ''आत्रेयाय हिरण्यं ददाती''ति विधेः स्वत्वनिवृत्तिनियतहिरण्यदानप्राप्तिकारित्वात्, श्यावाश्वसोमचमसहविश्शेषब्राह्मत्वविधीनां ऋत्विगन्तरसम्बन्धनिवृत्तिनियतब्रह्मसम्बन्धप्राप्तिकारित्वात्, ''अतिहायेड'' इत्यादिविधेः आद्यप्रयाजत्रयसम्बन्धनिवृत्तिनियतसमानयनप्राप्तिकारित्वात्, अभ्युदयेष्टिप्रकरणपठितविधीनां पूर्वदेवतासम्बन्धनिवृत्तिनियतदेवतान्तरसम्बन्धप्राप्तिकारित्वाच्च तेषु त्वदुक्तनियमविधिलक्षणानुगतेः स्फुटत्वात्।

ननु किञ्चिद्विषयकयत्प्राप्तित्वावच्छिन्नं अनियतप्राप्तिककिंचिन्निवृत्तिनियतं, तत् नियम्यलक्षणं विवक्षितम्। तेन नोक्तापूर्वविध्यतिव्याप्तयः, तेषु निवृत्तिप्रतियोगिनां प्रोक्षणाभावादीनां नित्यप्राप्तत्वेन अनियतप्राप्तिकत्वाभावादिति चेत् — एवं सति नित्यप्राप्तौदासीन्यभिन्नेति निवृत्तिप्रतियोगिविशेषणं व्यर्थं स्यात्। अनियतप्राप्तिकत्वविशेषणेनैव नित्यप्राप्तिमदुदासान्युदासात्। किंचैवं ''उत्करे वाजिनमासादयति'' ''हिरण्यगर्भः समवर्तताग्र इत्याधारमाघारयती''ति नियमविध्योरव्याप्तिः स्यात्, तत्र निवृत्तिप्रतियोगिनोः वेदिप्राकृतमन्त्रयोः अनियतप्राप्तिकत्वाभावात्।

1. लक्षणाव्याप्तिरिति क पाठः

तस्मादुदाहृतविधिषु नियमविधिलक्षणस्या [ति?] व्याप्तिः, अपूर्वविधिलक्षणस्याति [स्याव्या?] व्याप्तिश्च दृढैवेति दिक् ॥ २० ॥

अपिच—

व्याप्तिष्षोडश्यभिख्यग्रहनियमविधौ लक्षणप्रापणाया-
भेदेऽपि स्वीकृता चेत् प्रसजति परिसंख्यागणेऽतिप्रसक्तिः ।
तत्कार्याया निवृत्तेरपि नियततया [1]स्वेन यत्सा नियम्या
हन्तैकाव्याप्तिहान्यै स्वयमुपगमिता बह्वतिव्याप्तिदोषाः ॥ २१ ॥

यदि "उत्तरेऽहन् द्विरात्रस्य गृह्यते" इति षोडशिग्रहनियमविधौ लक्षणोपपादनार्थमभेदेऽपि व्याप्तिं स्वीकरोषि, तदानीमेकामव्याप्तिं परिजिहीर्षतस्तव परिसंख्यासु भूयस्योऽतिव्याप्तयः प्रादुःष्युः । परिसंख्याफलीभूताया निवृत्तेरपि निवृत्तिनियतत्वेन निरुक्तनियम्य-लक्षणयोगित्वात् ।

स्यादेतत् । निवृत्तित्वप्रकारकज्ञानाविषयत्वं निवृत्तिनियत-विशेषणम् । तेन न परिसंख्यास्वतिव्याप्तिः । तत्फलीभूताया निवृत्तेः निवृत्तिनियतत्वेऽपि निवृत्तित्वप्रकारकज्ञानाविषयत्वाभावात् । यदुक्तं अभेदे व्याप्तिं स्वीकृत्य प्रोक्षणस्यापि प्रोक्षणाभावनिवृत्तिनियतत्वस्य सुवचत्वादपूर्वविधौ नियमविधिलक्षणस्यातिव्याप्तिरिति - तदपि न; नित्यप्राप्तौदासीन्यभिन्नेति विशेषणेनैव तत्परिहारात् । तथाहि — औदासीन्यं नाम विधिविषयाभाव एव विवक्षितः; तद्भिन्नत्वं तु तत्र निवृत्तिप्रतियोगिनः प्रोक्षणाभावस्य नास्त्येवेति कुतः तन्निवृत्ति-नियतत्वेन प्रोक्षणस्य नियम्यत्वप्रसङ्गः[2] । [3]उक्तषोडशिग्रहनियमविधौ षोडशिग्रहाभावस्यापि औदासीन्यरूपतया [4]तन्निवृत्तिनियतत्वमादाय

1. "स्वः स्यात्पुंस्यात्मनि" (मेदिनी) । 2. "इति" इत्यधिकं क कोशे. 3. उक्ते इति क पाठः । 4. तद्भिन्नत्वाभावात् औदासीन्यभिन्नकिंचिन्निवृत्तिनियतत्वं नास्तीति भावः ।

षोडशिग्रहस्य नियम्यत्वं दुरुपपादं स्यादत उक्तं नित्यप्राप्तेत्यौदासीन्यविशेषणम्। तेन षोडशिग्रहाभावस्यानित्यप्राप्तौदासीन्यरूपत्वेऽपि नित्यप्राप्तौदासीन्यभिन्नतया तन्निवृत्तिनियतत्वमादाय षोडशिग्रहस्य नियम्यत्वोपपत्तिरिति चेत्———

उच्यते। निवृत्तित्वप्रकारकज्ञानाविषयत्वविशेषणेन कथंचित् परिसंख्यास्वतिप्रसङ्गवारणसम्भवेऽपि "एकादश्यामुपवसेदि"त्याद्युपवासविशेषनियमविधिष्वव्याप्तिर्दुर्वारा स्यात्। तथाहि — उपवासो हि भोजननिवृत्तिः। ततश्च भोजनतन्निवृत्त्योः रागप्राप्तयोरुपवसेदित्यनेन भोजननिवृत्तिर्नियम्यते। भोजननिवृत्तेर्नियम्यत्वं च केवलस्वनियतत्वमादायैव वाच्यमिति, निवृत्तित्वप्रकारकज्ञानाविषयत्वस्य निवृत्तिनियतविशेषणत्वे भोजननिवृत्तेर्नियम्यत्वं दुरुपपादं स्यात्। तस्या निवृत्तित्वप्रकारकज्ञानविषयत्वात्। एवं च यस्य निवृत्त्यात्मना धीर्नियता तत्कारी विधिः परिसंख्याविधिरिति त्वदुक्तपरिसंख्यालक्षणस्यापि उपवासनियमविधिष्वतिव्याप्तिरनुसन्धेया। [किंच?] नित्यप्राप्तौदासीन्यभिन्नेति विशेषणेन कथंचित् प्रोक्षणाभावनिवृत्तिनियतत्वमादाय प्रोक्षणस्य नियम्यत्वनिरासेऽपि जलसंयोगाभावनिवृत्तिनियतस्य तस्य नियम्यत्वं दुरपह्नवम्। यत्र दार्शपूर्णमासिकव्रीहिषु प्रोक्षणप्राप्तिः तत्र जलसंयोगाभावनिवृत्तिरिति व्याप्तेस्सत्त्वात्। निवृत्तिप्रतियोगिनो जलसंयोगाभावस्य नित्यप्राप्तौदासीन्यभिन्नत्वात्, तस्य विधिविषयाभावरूपत्वाभावात्।

किं बहुना — "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्या [त्यां?] व्यपोहति" इति ब्रह्महत्यानिवृत्त्यर्थमत्यन्ताप्राप्तसेतुदर्शनविधायकेऽपूर्वविधावतिव्याप्तिः। नित्यप्राप्तौदासीन्यभिन्नब्रह्महत्यानिवृत्तिनियतत्वेन सेतुदर्शनस्य त्वदुक्तनियम्यलक्षणशालित्वात्, ब्रह्महन्तृविषयकसेतु-

दर्शनप्राप्तित्वावच्छिन्नस्य ब्रह्महत्यानिवृत्तिनियतत्वात्। एवं भिन्ननिमित्तकहोमप्राप्तित्वावच्छिन्नस्य क्रतुवैगुण्यनिवृत्तिनियतत्वात् ''भिन्ने जुहोती'' त्यादावतिप्रसक्तिः। इत्थं प्रायाश्चित्तविधिविशेषेषु तद्विधिविधेयानां कर्मणां दुरितनिवृत्तिनियतत्वेन नियम्यलक्षण-योगादतिव्याप्तिरूह्या। [1]षोडशिग्रहनियमविधावव्याप्तिः, [प्तेः।?] षोडशिग्रहस्य षोडशिग्रहप्रागभावध्वंसरूपत्वेन तदितरत्वाभावात् ध्वंसेतरनिवृत्तिनियतत्वस्य नियम्यलक्षणस्य तत्रोपपादयितुम-शक्यत्वात्। नच भावत्वानधिकरणेति ध्वंसविशेषणम्, तेन षोडशिग्रहस्य भावरूपध्वंसात्मकत्वेऽपि भावत्वानधिकरणध्वंसेतर-निवृत्तिरूपत्वात् न तत्राव्याप्तिरिति वाच्यम्। एवमपि प्रागुक्तदोषानतिवृत्तेः, प्रायश्चित्तविधिविशेषेषु दुरितध्वंसनियतत्वमादाय अतिव्याप्त्युद्भावनासंभवेऽपि ब्रह्महत्यादिविषयकसेतुदर्शनादिप्राप्तित्वा-वच्छिन्नस्य दुःखाभावनियतत्वमादाय तेष्वतिव्याप्तेर्दुर्वारत्वात्।

वस्तुतस्तु आग्रयणे ''द्यावापृथिव्य एककपाल'' इति द्यावापृथिव्यैककपालयागविधौ अपूर्वविधित्वेन सम्प्रतिपन्नेऽतिव्याप्तिः, आग्रयणविषयकद्यावापृथिव्यैककपालयागप्राप्तित्वावच्छिन्नस्य प्रकृत-विध्यप्रवृत्तिकालीनपक्षप्राप्तिकाप्रसूनबर्हिर्निवृत्तिनियतत्वादेककपालया-गस्य त्वदुक्तनियम्यलक्षणभाक्त्वात् ॥ २१ ॥

किञ्च—

शंय्वन्ता प्रायणीयेत्युपरमणविधावप्यतिव्याप्तिरस्य
स्यादन्यत्रापि यस्मात् तदुपरितनकृत्स्नाङ्गरीतेर्निवृत्त्या।

---

1. एवमेव सर्वत्र पाठो दृश्यते। अत्र च ग्रन्थशैली न समञ्जसेति स्फुटं विदुषाम् । तस्मादत्र ''ऊह्या'' इत्यनन्तरं, ''न च ध्वंसेतरनिवृत्तिनियतत्वमत्र विवक्षितम्, तथा च नोक्तस्थलेष्वतिव्याप्तिरिति वाच्यम् । एवमपि'' इतीदृशार्थबोधकग्रन्थभागः गलितः स्यादित्यालोच्यते ।

व्याप्ता संस्थाप्तिरेतद्विधिसमधिगता पारिसंख्यो विधिस्ते
प्राचीनानामपूर्वो विधिरयमिति तत्रास्य दोषोऽनुवृत्तिः ॥ २२ ॥

"शंय्वन्ता प्रायणीया सन्तिष्ठते" "इडान्ताऽऽतिथ्या" इति विध्योः त्वदुक्तनियमविधिलक्षणस्यातिव्याप्तिः। प्रायणीयातिथ्या-विषयकशंय्विडान्तसंस्थाप्राप्तित्वावच्छिन्नस्य शंय्विडोपरितनाङ्गकलाप-निवृत्तिनियतत्वात्। तयोश्च विध्योस्त्वत्पक्षे परिसंख्याविधित्वं, परिसंख्याविधिलक्षणाक्षेपे त्वया तत्र परिसंख्यालक्षणाव्याप्तेरुक्तत्वात्। प्राचीनपक्षे च तयोरपूर्वविधित्वम्; अत्यन्ताप्राप्तशंय्विडान्तसंस्था-विधायकत्वात्। अतः पक्षद्वयेऽपि तत्र नियमविधिलक्षणानुवृत्तिर्दोष एव ॥ २२ ॥

॥ विधिरसायनोक्तपरिसंख्याविधिनिष्कृष्टलक्षणदूषणम् ॥

तथा यस्य यद्विधिकाले निवृत्त्यात्मना धीर्नियता, सा तस्मिन् विधौ परिसंख्या नाम; तत्प्राप्तिकारी विधिः परिसंख्याविधिरिति परिसंख्याविधिलक्षणं च त्वदीयं न साधीयः। तथाहि—

तत्काले यस्य बुद्धिस्समुदयति निवृत्त्यात्मनाऽवश्यमेतत्-
प्राप्त्यर्थः पारिसंख्यो विधिरिति परिसंख्याविधेर्लक्षणं यत्।
तत् त्रेधा तण्डुलानां विभजनवचनेऽतिप्रसक्तं प्रतीतं
तत्काले पूर्वदेवव्यपनयनमिदं यन्निवृत्त्यात्मनैव ॥ २३ ॥

उक्तं परिसंख्याविधिलक्षणं "त्रेधा तण्डुलान् विभजेत्" इत्यपूर्वविधावतिप्रसक्तम्। तथाहि — अत्र तण्डुलशब्दो दार्शिकहविर्मात्रोपलक्षणार्थः, तथा च तण्डुलदधिशृतानां मध्यमादि-वाक्यैः देवतान्तरसम्बन्धविधानेन तेषामर्थात् पूर्वदेवतासम्बन्ध-निवृत्तिसिद्धावपि उपांशुयाजाज्यस्य देवतान्तरसम्बन्धाविधानात् तत्र

पूर्वदेवतासम्बन्धनिवृत्तेरर्थलभ्यत्वाभावात् सा विभजेदित्यनेन विधीयते इति [1]अभ्युदयेष्टिपेटिकायां निर्णीतम्। ततश्च तत्र विधीयमानायाः पूर्वदेवतासम्बन्धनिवृत्तेः विधिकाले निवृत्तित्वप्रकारकधीविषयतया तत्प्राप्तिकारिण्युक्तविधौ परिसंख्याविधिलक्षणस्यातिव्याप्तिः सुदृढैवेति दिक् ॥ २३ ॥

तस्मादस्माभिरुक्तमेवापूर्वविधिलक्षणमनवद्यम् ॥ यदि पुनर्लघु-लक्षणाकलने कुतूहलं, तदैवमभिधीयते———

अप्राप्तांशप्रापणपरिसंख्यामात्रफलकतारहितः।
यो विधिरपूर्वविधिरयमिति पूर्वाचार्यवर्यतात्पर्यम् ॥ २४ ॥

अप्राप्तांशपरिपूरण - परिसंख्यामात्रफलकत्वाभावे[2]सति विधिर-पूर्वविधिरित्येवं ''विधिरत्यन्तमप्राप्ते'' इति वदतामाचार्याणां तात्पर्यम्। अत्रानुवादकवाक्येष्वतिव्याप्तिवारणाय विधिरिति विशेष्यपदम्। नियमपरिसंख्याविध्योरतिव्याप्तिवारणाय सत्यन्तम्। ''सृष्टीरु-पदधाति'' ''तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्'' इत्यादिषु नियमपरिसंख्यासंकीर्णेष्वपूर्वविधिषु नियमपरि-संख्याफलकत्वाभावाभावादव्याप्तिः स्यादित्यत उक्तं मात्रपदम्। तेषां नियमपरिसंख्याफलकत्वेऽपि तदितराप्राप्तप्रापणफल [क] त्वस्यापि सद्भावात् तन्मात्रफलकत्वराहित्यरूपविशेषणसत्त्वात् न तत्राव्याप्तिः। स्वर्गकामविध्योः नानाशाखाग्निहोत्रादिविधिषु चाप्राप्तार्थप्राप-कत्वरहितेष्वपि नाव्याप्तिः। नियमपरिसंख्यामात्रफलकत्वरहितत्वेन विधित्वेन च निरुक्तलक्षणशालित्वात्। एवं च नियमपरि-संख्येतरफलकत्वाभावविशिष्टनियमपरिसंख्याफलकत्वाभावे सति

1. पूर्वमीमांसायां षष्ठाध्यायपञ्चमपादे आदितः षडधिकरणानि अभ्युदयेष्टिपे - टिकेत्यभिधीयते । 2. त्वाभाववति इति ग कोशे ।

विधिरपूर्वविधिरिति लक्षणं सम्पन्नम्। अत्र च संकीर्णापूर्वविधिषु विशेषणाभावप्रयुक्तो विशिष्टाभावः स्वर्गकामविधिनानाशाखाग्नि-होत्रादिविधिषु विशेष्याभावप्रयुक्तः, प्रोक्षणादिविधिषु उभयाभावप्रयुक्त इति विवेकः ॥ २४ ॥

इति श्रीवादिहंसाम्बुदाचार्यवंशावतंस-
वाजपेयसर्वपृष्ठाप्तोर्यामादियाजि-
श्रीनिवासाचार्यनन्दन-श्लेषयमकचक्रवर्ति-रघुनाथाचार्यदीक्षित-
सूनोः आत्रेय वेङ्कटाचार्ययज्वनः कृतिषु विधित्रय-
परित्राणे अपूर्वविधिलक्षणाक्षेपप्रतिक्षेपः
प्रथमः

हरिः ओम्

—शुभमस्तु—

॥ अथ नियमविधिलक्षणाक्षेपप्रतिक्षेपः द्वितीयः ॥

—०—

नियमलक्षणमादिमभाषितं विधिरसायनकारविदूषितम् ।
मम समर्थयितुं स्वयमिच्छतो मधुरिपुर्दिशतां म[न्म?]धुरं वचः ॥ २५ ॥

[॥ नियमविधिलक्षणाक्षेपानुवादः ॥]

नियमविधिलक्षणं खल्वित्थमाक्षिप्तं **विधिरसायने** — बहुविधानां नियमविधीनां ‘‘नियमः पाक्षिके सती’’ति लक्षणेन संग्रहणमशक्यम् । तथा हि — कचिदेकस्मिन् कार्येऽनियतानेकोपायप्राप्तावेकोपायनियमः, यथा ‘‘व्रीहीनवहन्ती’’ति । कचिदेकस्योपायस्यानियतानेककार्यप्राप्तौ एककार्यनियमः, यथा — ‘‘यद्योन्यां तदुत्तरयोर्गायती’’ति । क्वचिदुभयनियमः, यथा - ‘‘यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्’’ इति । एवं वाजपेये दक्षिणात्वेन देयानां सप्तदशानां रथानां मध्ये ‘‘इन्द्रस्य वज्रोऽसि वार्त्रघ्नः’’ इति याजुर्वैदिकमन्त्रैस्सज्जीकृतरथमधिकृत्य प्रवृत्ते ‘‘यजुर्युक्तं रथमध्वर्यवे ददाति’’ इति वाक्ये, ‘‘यो वृष्टिकामो योऽन्नाद्यकामो यस्स्वर्गकामः स सौभरेण स्तुवीते’’ति फलार्थत्वेन विहितं ब्रह्मसामस्तोत्राश्रयं सौभरमधिकृत्य प्रवृत्तेषु ‘‘हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय’’ इति वाक्येषु चोभयनियमो द्रष्टव्यः ।

इत्थं नियम्ये तत्प्रतिसम्बन्धिनि च विधिवाक्येनोपात्ते कचिदुपायनियमः, [कचित् कार्यनियमः?] कचिदुभयनियम इति त्रैविध्यं दर्शितम् । नियम्ये तत्प्रतिसम्बन्धिनि उभयस्मिन्नपि वा तदनुपात्तेऽपि स दृश्यते । यथा —‘‘पुरोडाशं प्रथयति’’

इत्यत्रानुपात्ते कर्तरि नियम्ये नियमः । ''उच्चैर्ऋचा क्रियते'' इत्यत्रानुपात्ते नियम्यप्रतिसम्बन्धिनि मन्त्रे नियमः । ''व्रीहिभिर्यजेत'' इत्यत्र नियम्येऽवहनने तत्प्रतिसम्बन्धिनि[षु?] यवेषु चानुपात्तेषु नियमः (?) । एवमुपात्तमनुपात्तमिति द्विविधमप्युदाहृतं नियम्यजातं पक्षप्राप्तिमद्दृष्टम् ।

क्वचिन्नियम्यस्य पक्षप्राप्त्यभावेऽपि तत्प्रतिद्वन्द्विनां पक्षप्राप्तिमात्रेण नियमो दृश्यते, ''यदि सोमं न विन्देत् पूतीकानभिषुणुयात्'' इति । अत्र हि सुसदृशानां बहूनामनियतप्राप्तौ मन्दसदृशानां पूतीकानामप्राप्तानामेव नियमः । क्वचित् किमपि पक्षप्राप्तं न दृश्यते ''हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति'' इति । अत्र नियमतश्चोदकात् ''इन्द्र ऊर्ध्वोऽध्वर'' इत्यस्य प्राप्ताविन्द्र-लिङ्गरहितत्वादत्यन्ताप्राप्तमेव मन्त्रान्तरमिन्द्राघारे नियम्यते । एवं न्यायतौल्यात् ''इषे त्वेति शाखामाच्छिनत्ति,'' ''उत्करे वाजिनमासादयति,'' ''परिधौ पशुं नियुञ्जीत,'' इति वाक्येष्वपि नियमविधिरङ्गीकरणीय इति तान्यपि पक्षप्राप्तिरहितोदाहरणानि । यथा खलु हिरण्यगर्भमन्त्रस्य प्रजापतिलिङ्गस्यैन्द्राघारेऽन्वयमप्राप्तस्यैव विनियोगानन्तरं तन्निर्वाहाय कथंचिदिन्द्रप्रकाशकत्वस्य कल्पनीयत्वेऽपि दृष्टार्थत्वान्नियमाद्दृष्टकल्पनावश्यंभावाच्च(?) नियमविधित्वमभ्युप-गम्यते, तथा 'इषे त्वा' इति मन्त्रस्य शाखाच्छेदने, तीक्ष्णाग्रस्योत्करस्य वाजिनासादने, तनीयसः परिधेः पशुनियोजने च विनियोगानन्तरमेव तन्निर्वाहाय मन्त्रे छिनद्मीत्यध्याहारस्योत्करे पृथ्वग्रत्वस्य परिधौ प्रथिम्नश्चापेक्षणीयत्वेऽपि न्यायसाम्यान्नियमविधित्वमुपगन्तव्यमेव । इत्थं नानारूपा नियमविधयः कथमनेन लक्षणेन संग्रहीतुं शक्याः? । 'पाक्षिके सति' इत्यस्य कार्योपायद्वयपाक्षिकत्वपरत्वे एकैकनियमाव्याप्तेः । कार्यस्यैवोपायस्यैव वा पाक्षिकत्वपरत्वे

तदन्यतर(?)नियमाव्याप्तिः [प्तेः?]। कार्योपायद्वयमनुगमय्य विध्युपात्तस्य पाक्षिकत्वपरत्वे पाक्षिकमात्ररहितेषु नियमविधिष्वव्याप्तेः ।

किं च पाक्षिके सतीत्यत्र विधिविषयस्य पाक्षिकत्वं विवक्षितं वा, विध्युद्देश्यस्य वा, उभयोर्वा, विधेयोद्देश्यसाधारण्येन विध्युपात्तस्य वा, विध्युपात्ततदनुपात्तसाधारण्येन नियम्यस्य वा, प्रकृतविधिफलाश्रयस्य वा, यस्यकस्यचिद्वा। नाद्यः; वैकृताग्निविधावतिव्याप्तेः। तद्विषयस्याग्नेरुत्तरवेद्या सह विकल्पितस्य पाक्षिकत्वात्। न द्वितीयः; ''रथन्तरे प्रस्तूयमाने सम्मीलयेत्'' इति विधावतिव्याप्तेः। तदुद्देश्यस्य रथन्तरस्य ज्योतिष्टोमे पाक्षिकत्वात्। न तृतीयः; 'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीयात्'' इति परिसंख्यायामतिव्याप्तेः। तत्रोद्देश्यस्य रथन्तरसामत्वस्य तन्निमित्तस्यैन्द्रवायवाग्रत्वस्य च प्रकृतौ पाक्षिकत्वात्। न तुरीयः; उदाहृतेषु त्रिष्वपि विधिष्वतिव्याप्तेः। विधिविषयस्याग्नेः, उद्देश्यस्य रथन्तरस्य, विधेयोद्देश्ययोरैन्द्रवायवाग्रत्वरथन्तरसामत्वयोश्च विध्युपात्तत्वेन तेषां च पाक्षिकत्वात्। न पञ्चमः; नियमविधिलक्षणे नियमप्रवेशे सति आत्माश्रयापत्तेः। न षष्ठः; उदाहृतनैमित्तिकाग्रताविधावतिव्याप्तेः। तत्र विकृतिविशेषव्यावृत्तिफलाश्रयस्यैन्द्रवायवाग्रत्वस्य पाक्षिकत्वात्। न सप्तमः;सर्वेष्वपूर्वपरिसंख्याविधिष्वतिव्याप्तेः।

ननु यस्यकस्यचित्पाक्षिकत्वे सति तदप्राप्तांशपरिपूरणफले नियमविधिरित्यधिकं योज्यते। तथा सति न काप्यतिव्याप्तिरिति चेत्, तर्हि लक्षणे श्रुतांशो व्यर्थः स्यात्। अप्राप्तांशपरिपूरणफलो नियमविधिरित्येतावत एव विशिष्टलक्षणधूर्वहत्वात्। न चैवमेवास्त्विति वाच्यम्; ''सर्वेभ्यो ज्योतिष्टोम'' इति सर्वफलकत्वविधावतिव्याप्तेः।

प्रातिस्विकवाक्येन स्वर्गार्थित्वे प्राप्ते तस्य तदप्राप्तफलान्तरांश परिपूरणत्वात्।

स्यादेतत्। अप्राप्तांशपरिपूरणफलको नियमविधिरिति लक्षणेऽप्राप्तत्वं विरोध्याक्रमणप्रयुक्तं विवक्षितम्। अतो नातिव्याप्तिः। सार्वकाम्यविधौ स्वर्गान्यफलाप्राप्तेः प्रापकप्रमाणाभावप्रयुक्तत्वेन विरोध्याक्रमणप्रयुक्तत्वात्। यद्वा, अनिर्धारितत्वमप्राप्तांशस्य विशेषणं क्रियते। तथा च सार्वकाम्यविधौ स्वर्गांशः प्राप्तः, तदन्यफलांशस्त्वप्राप्त इति निर्धारणसद्भावान्नातिव्याप्तिः। नाप्यसंभवः; व्रीह्यादिषु अवहनना- [द्य?] प्राप्तांशस्येदन्तया निर्धारणाभावादिति चेन्मैवम्—

आद्यविवक्षायां सार्वकाम्यविध्यतिव्याप्तिदोषतादवस्थ्यात्। [1]विश्वजिद्-अधिकरणपूर्वपक्षन्यायस्य स्वर्गान्यफलानामपि प्रापकप्रमाणस्य सत्त्वेन तदप्राप्तेस्तन्न्यायापवादक[दस्व?] स्वर्गकामन्निधिप्राप्ति[2] [प्त तद्वि?] विरोध्याक्रमणप्रयुक्तत्वात् । नन्वप्राप्तिकरंबितप्राप्तिकविरोध्याक्रमण-प्रयुक्तत्वं विवक्षितम् । अस्ति च व्रीह्यादिष्ववहननाप्राप्तौ आक्षेपकृताप्राप्तिकरम्बितप्राप्तिकविदलनादिविरोध्याक्रमणप्रयुक्तत्वम् । एवं च न सार्वकाम्यविधावतिव्याप्तिः । तदभावे स्वर्गान्यफलाप्राप्तेः स्वर्गकामवाक्यगतनियतप्राप्तिकस्वर्गरूपविरोध्याक्रमणप्रयुक्तत्वादिति चेत् — एवमपि "पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्यः" इति षडहोद्देशेन बृहद्रथन्तरपृष्ठविधावतिव्याप्तिरनिवार्या। षडहांशे तृतीयादिष्वहस्सु बृहद्रथन्तराप्राप्तेरप्राप्तिकरम्बितप्राप्तिकवैरूपवैराजादि-विरोध्याक्रमणप्रयुक्तत्वात् ।

द्वितीयविवक्षायां यद्यपि नोक्तातिव्याप्तिः, बृहद्रथन्तराद्य-प्राप्तांशस्तृतीयसुत्यादिरूपे इति निर्धारणसम्भवात्। तथाऽपि "अश्वः

1. मी.सू. 4-3-7-15, 2. प्राप्तितद्विरोधीत्यादि विधिरसायने ।

श्यावो दक्षिणा'' इत्युपहव्यदक्षिणां विधाय श्राविते ''स ब्रह्मणे देयः'' इति विधौ, ''औदुम्बरस्सोमचमसो दक्षिणा'' इति ऋतपेयदक्षिणां विधाय श्राविते ''स प्रियाय सगोत्राय ब्रह्मणे देयः'' इति विधौ, आयुष्कामेष्टिप्रकरणश्रुते ''सर्वं ब्रह्मणे परिहरति' इति विधौ चातिव्याप्तिः । सर्वर्त्विक्साधारणेष्वश्वसोमचमसहविश्शेषेषु अयं ब्रह्मणोंऽशः, अयमन्येषामिति निर्धारणासम्भवात् । तस्मादतिव्याप्त्य-व्याप्तिग्रस्तत्वान्नियमविधिलक्षणमप्ययुक्तमिति ॥

[॥ नियमविधिलक्षणाक्षेपपरिहारः ॥]

अत्र ब्रूमः —

स्वाभावे स्वनिवर्त्यबोध्यविषयप्रापिप्रमाणान्तरा-
नुत्थानेन युतेऽपि वाऽनधिगतिर्यस्यान्यकालीनया ।
प्राप्त्या संवलिता स्वयं निजपदात् तद्भ्रंशकृत्प्रापणं
कुर्वंस्तत्समवस्तुनोऽनधिगते ज्ञेयो द्वितीयो विधिः ॥ २६ ॥

अस्यार्थः — स्वनिवर्त्यस्वबोध्यार्थप्रापकप्रमाणान्तराप्रवृत्ति-सहितायां केवलायां वा स्वाप्रवृत्तौ स्वाधिकरणक्षणभिन्नक्षणवृत्ति-प्राप्तिकरम्बिता यस्यार्थस्याप्राप्तिः तस्य स्वविषयस्थानात् स्वतो निवृत्तिकारिणीं तत्तुल्यपदार्थस्याप्राप्ते प्राप्तिं कुर्वन् विधिर्नियमविधिर्ज्ञेय इति ।

एतदुक्तं भवति — ''नियमः पाक्षिके सती''ति वार्त्तिकस्य निवर्त्ये पाक्षिके सति नियम इत्यर्थः। ततश्च पक्षप्राप्तिमतोऽर्थस्य निवृत्तिं कुर्वतीं कस्यचिदर्थस्याप्राप्ते प्राप्तिं कुर्वन् विधिर्नियमविधिरिति लक्षणं फलितम् (?)। एतच्च ''व्रीहीनवहन्ती''ति प्रसिद्ध-नियमविधावस्ति । तस्य पक्षप्राप्तिमद्विदलनादिनिवृत्तिफलकावघात-

प्राप्तिकारित्वात् । ''यद्योन्यां तदुत्तरयोर्गायती''ति कार्यनियम-विधावप्येतदस्ति । पक्षप्राप्तिमदनुत्तरानिवृत्तिफलकोत्तराप्राप्तिकारित्वात् तस्य । ''यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्'' इति उभयनियमस्थलेऽप्य-स्त्येव । तेन विधिना पाक्षिकयागान्तरसम्बन्धनिवृत्तिफलकस्य जौहवाज्ये प्रयाजसम्बन्धप्रापणस्य, प्रयाजेषु तादृशद्रव्यान्तरनिवृत्ति-फलकस्य जौहवाज्यप्रापणस्य च क्रियमाणत्वात् । एवं ''यजुर्युक्तं रथमध्वर्यवे ददाति'' इत्यादिष्वप्युक्तलक्षणानुगतिरूह्या। उपहव्यादि-विकृतिगते रथन्तरबृहत्पृष्ठनियमविधावप्येतल्लक्षणमनुगतम्। पाक्षिक-रथन्तरादिनिवृत्तिफलकबृहदादिप्राप्तिकारित्वात् तस्य।

एवं सति विकृतिविशेषगते वामदेव्यादिपृष्ठविधावपूर्वविधित्वेन सम्प्रतिपन्नेऽतिव्याप्तिस्स्यात् । तस्य पाक्षिकबृहद्रथन्तरनिवृत्ति-फलकवामदेव्यादिप्राप्तिकारित्वादित्यत उक्तं — **तत्समवस्तुन** इति । निवर्तनीयतुल्यपदार्थस्येत्यर्थः। विधेयस्य निवर्तनीयतुल्यत्वं च लक्षणीयविध्यप्रवृत्तौ तेन सह पक्षप्राप्तिमत्त्वेन वा, तत्कार्यकारित्वेन वा विवक्षितम् । एतच्च वामदेव्यादिपृष्ठेषु नास्ति । निवर्तनीयर-थन्तरादिना सह तेषां पक्षप्राप्त्यभावात् । तत्कार्यस्तोत्र-विशेषसाधनत्वाभावाच्च । रथन्तरनियमविधौ नियम्यस्य रथन्तरस्य निवर्तनीयबृहत्कार्यकारित्वाभावेऽपि तेन सह पक्षप्राप्तिमत्त्वात् तत्तुल्यत्वं बोध्यम् ।

ननु ''[1]अप्राकृते तद्विकाराद् विरोधाद् व्यवतिष्ठेरन्'' इति नावमिकाधिकरणे उदाहृतस्य वैश्यस्तोमप्रकरणस्थस्य ''कण्वरथन्तरं पृष्ठं भवती''त्यस्य यत्पृष्ठस्तोत्रं तत् कण्वरथन्तरसाधनक-मित्येवमर्थकतया ग्रन्थकारैर्व्याख्यातत्वाद् वैकृतवामदेव्यपृष्ठादिविधेरपि

1. मी.सू. 9.2.16.48

तथात्वाद् वामदेव्यादेः प्राकृतबृहद्रथन्तरादिकार्यकारित्वेन निवर्तनीय-तुल्यत्वात् तत्रातिव्याप्तिस्स्यादेव। तथा ''कण्वरथन्तरं पृष्ठं भवती''त्यत्रापि निरुक्तलक्षणस्यातिव्याप्तिः । तस्य पाक्षिक-बृहद्रथन्तरनिवृत्तिकारिकण्वरथन्तरप्राप्तिकारित्वादिति चेन्न । ''उत्करे वाजिनमासादयति, हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति'' इत्यादेरिवोक्तविध्योरपि नियमविधित्वेन तत्र लक्षणानुगतेर्गुणत्वात् । तत्र विधेययोरुत्करमन्त्रविशेषयोर्निवर्तनीयकार्यसम्पादनसामर्थ्यस्य कल्प्यत्वेऽपि नियमविधित्वं स्वीकृतम् । इह तु विधेयस्य वामदेव्यकण्वरथन्तरादेर्निवर्तनीयबृहद्रथन्तरसाध्यपृष्ठस्तोत्ररूपकार्यनिव-[र्व?]र्तनसामर्थ्यस्य स्फुटत्वान्नियमविधित्वं कैमुत्यन्यायसिद्धम् ।

यदि च बृहद्रथन्तरयोः स्थाने कण्वरथन्तरस्य, चित्रत्व-शूरत्वादिगुणाभिधानात्मकस्तुतिद्वयस्थाने स्तुत्यन्तरस्य, चित्रादि-गुणानां स्थाने गुणान्तरस्य च विधानमिति केषांचित्पक्षोऽभ्युपगम्यते; तदानीमपूर्वविधित्वमेव; तथापि न तत्र निरुक्तनियमविधि-लक्षणातिव्याप्तिः । निवर्तनीयबृहद्रथन्तरादिसाध्यस्तुतिभिन्न-स्तुत्यन्तरनिव [र्व?] र्तकत्वाद् वामदेव्यकण्वरथन्तरादेः । अतः पक्षद्वयेऽपि न दोषः । ''कण्वरथन्तरं पृष्ठं भवति'' इत्यादौ स्तुत्यन्तरविधानपक्षस्तु अस्माभि**र्नवममकरन्दे** प्रतिक्षिप्तः। एतेन — आग्रयणे ''द्यावापृथिव्य एककपाल''इति द्यावापृथिव्यैकक-पालयागविधेरपि नियमविधित्वं स्यात् । तस्य पक्षप्राप्ति-मदप्रसूनबर्हिर्निवृत्तिकारिद्यावापृथिव्यैककपालयागप्राप्तिकारित्वात् - इति निरस्तम् । तत्र विधेयस्यैककपालयागस्य निवर्तनीयाप्रसूनबर्हिष इव लक्षणीयविध्यप्रवृत्तौ पाक्षिकत्वभावात् । निवर्तनीयकार्य-कारित्वाभावाच्च ।

यद्वा श्लोके तत्रातिव्याप्तिनिवर्तनाय स्वयमित्युक्तम् । तेन साक्षात्पाक्षिकार्थनिवृत्तिकारित्वं विधेयप्राप्तेर्विवक्षितम्। तेन नोक्तस्थलेऽतिप्रसङ्गश्च । आग्रयणीयद्यावापृथिव्यैककपालयागे वैश्वदेविकैककपालप्रकृतिके चोदकप्राप्तेन प्रसूनबर्हिर्नियमेनैव प्रसूनबर्हिर्निवर्तनात् एककपालयागप्राप्तेराग्रयणे प्रसूनबर्हिर्नियमसम्पादनद्वारैवाप्रसूनबर्हिर्निवृत्तिकारित्वेनावघातप्राप्तेरिव साक्षात्पाक्षिकनिवृत्तिकारित्वाभावात् ।

एतल्लक्षणं ''उरु प्रथस्वेति पुरोडाशं प्रथयति'' ''उच्चैर्ऋचा क्रियते'' इत्यादिष्वप्यनुगतम् । तैः पाक्षिकर्त्विगन्तरस्वरान्तरादिनिवृत्तिकारिण्याः अध्वर्यूच्चैस्त्वादिप्राप्तेः पुरोडाशप्रथन — मन्त्रादिष्वप्राप्तांशेषु क्रियमाणत्वात् । ''यदि सोमं न विन्देत् पूतीकानभिषुणुयात्'' इत्यत्र पूतीकानामेतद्विध्यभावे मन्दसदृशतया पाक्षिकत्वाभावेऽपि एतन्निवर्त्यानां सुसदृशानां बहूनां पाक्षिकत्वात् तन्निवृत्तिकरपूतीकप्राप्तिकारित्वमादाय लक्षणसङ्गतिः । ''इषे त्वेति शाखामाच्छिनत्ति'' ''परिधौ पशुं नियुञ्जीत'' इत्यनयोः मन्त्र-परिधिरूपनियम्यापाक्षिकत्वमादायोद्भाविता अव्याप्तिरपि नेह प्रसज्यते । तत्र नियम्ययोः पाक्षिकत्वाभावेऽपि निवर्त्यानां कल्पसूत्रादीनां बैल्वादियूपानां च पाक्षिकतया निरुक्तलक्षणसत्त्वात् ।

अत्र लक्षणे निवृत्तिप्रतियोगिनः पाक्षिकत्वाविवक्षायां ''इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त'' इत्यादिपरिसंख्याविधावतिव्याप्तिः स्यात् । तस्य गर्दभरशनासम्बन्धनिवृत्तिकार्यश्वरशनामन्त्रसम्बन्धप्राप्तिकारित्वात् । अतो निवृत्तिप्रतियोगिनः पाक्षिकत्वविशेषणमुपात्तम् । उक्तपरिसंख्याविधौ च निवृत्तिप्रतियोगिनो गर्दभरशनामन्त्रसम्बन्धस्यापाक्षिकत्वान्नातिव्याप्तिः ।

एतावत्युक्ते ''व्रीहीनवहन्ती''ति प्रसिद्धनियमविधावव्याप्तिः। एतदप्रवृत्तावपि शाखान्तरीयेण ''व्रीहीनवहन्ती''ति शास्त्रेणावघातस्य नियमिततया विदलनादीनां निवर्तनीयानां पक्षप्राप्त्यभावादित्यत उक्तं-**स्वबोध्यविषयकमानान्तराप्रवृत्तिसहितायां स्वाप्रवृत्ताविति**। तेन स्वबोध्यविषयकस्य शाखान्तरीयस्य ''व्रीहीनवहन्ती''ति शास्त्रस्याप्रवृत्तिसहितायामेतद्विध्यप्रवृत्तौ विदलनादीनां नियमविधिविशेषेषु स्वबोध्यप्रापकमानान्तरस्याप्रसिद्धेरव्याप्तिस्स्यादित्यत उक्तं — **केवलायां वेति** स्वाप्रवृत्तिविशेषणम्। एवमपि ''उत्करे वाजिनमासादयती''ति नियमविधावव्याप्तिः। तत्र निवर्तनीयायाः वेदेरेतद्विध्यप्रवृत्तौ पाक्षिकत्वाभावादित्यत उक्तम् - **स्वनिवर्त्यैति**। तथा च स्वनिवर्त्यवेदिप्रापकस्य ''वेद्यां हवीष्यासादयती''ति शास्त्रस्याप्रवृत्त्या युतायां प्रकृतविध्यप्रवृत्तौ वेदिवत् स्थलान्तराणामपि वाजिनासादने पक्षतः प्राप्त्या निवर्तनीयाया वेदेः पाक्षिकत्वसिद्ध्या नोक्तनियमविधावव्याप्तिः।

अत एव — ''व्रीहिभिर्यजेत'' इति नियमविधावव्याप्तिः; तत्र नियम्यानामत्यन्ताप्राप्तत्वात्। निवर्त्यानां यवानामप्येतद्विध्यप्रवृत्तौ यवशास्त्रता नित्यप्राप्ततया पाक्षिकत्वाभावात्। एवं ''यवैर्यजेत'' इति नियमविधावप्यव्याप्तिर्बोध्या - इति निरस्तम्। केवलायां व्रीहिविध्यप्रवृत्तौ निवर्त्यानां यवानां पाक्षिकत्वाभावेऽपि स्वनिवर्त्ययवप्रापकयवशास्त्राप्रवृत्तिसहितायां व्रीहिशास्त्राप्रवृत्तौ तेषां नीवारादिभिस्सह पक्षप्राप्तिसत्त्वात्। एवं स्वनिवर्त्यव्रीहिप्रापकव्रीहिशास्त्राप्रवृत्तिसहितायां यवशास्त्राप्रवृत्तौ निवर्त्यानां व्रीहीणां पाक्षिकप्राप्तिमत्त्वेन यवशास्त्रेऽपि नाव्याप्तिः। ''औदुम्बरो यूपो भवति'' इत्यत्राप्येतल्लक्षणानुगतिः। तत्र नियम्यस्यौदुम्बरत्वस्य तद्विध्यप्रवृत्तौ पक्षप्राप्त्यभावेऽपि निवर्त्यानां बैल्वखादिरपालाशानां पक्षप्राप्तिमत्त्वात्।

वैकृताग्निविधिषूद्भाविता अतिव्याप्तिरप्यस्मिल्लक्षणे न प्रसज्यते। वैकृताग्निविधी [नां गु?] णकामप्राप्त्यर्थत्वेन पाक्षिकोत्तरवेदिनिवृत्तिफलकाग्निप्राप्तिकारित्वाभावात्। लक्षणीयविध्यप्रवृत्तौ योंऽशो विधिविषयेणाप्राप्तः, तत्र तादृशतत्प्राप्तिकारित्वस्यैव लक्षणत्वेनोक्तत्वाद् वैकृताग्निविध्युद्देश्येषु विधिविषयाप्राप्तांशाभावात्। अत एव श्लोके **अनधिगते** इत्यप्राप्तपरं पदं सार्थकम्। यदि चाग्निष्टोमद्विरात्रादिषूत्तरवेद्या सह विकल्पित एवाग्निरित्यभ्युपेयते; तदाऽपि तत्राग्निप्राप्तेरुत्तरवेदिनिवृत्तिकारित्वाभावान्नातिव्याप्तिरिति गृहाण।

यदि वाऽग्निष्टोमे [1]वेदिबर्हिर्न्यायेन उत्तरवेद्यग्न्योस्समुच्चयोऽस्त्विति मतं, तदाऽपि वैकृताग्निविधिषु नातिव्याप्तिः। तदप्रवृत्तावतिदेशेनोत्तरवेद्यग्न्योस्समुचित्यैव प्राप्तेः उत्तरवेदेः पाक्षिकत्वाभावात्। अग्निप्राप्तेस्तन्निवृत्तिकारित्वाभावाच्च। ''अथातोऽग्निमग्निष्टोमेनानुयजन्ती''ति वाक्यविहितोऽग्निः उत्तरवेदिं बाधित्वाऽग्निष्टोमे निविशत इति कथंचिदभ्युपगमेऽपि नोक्तविधिष्वतिव्याप्तिः। तदप्रवृत्तौ अग्निष्टोमतश्चोदकेनाग्नेरेव नित्यप्राप्त्या उत्तरवेदेः द्विरात्रादिषु प्राप्तिकथाविरहात्। सार्वकाम्यविधौ च नोक्तलक्षणस्यातिव्याप्तिः; तस्याप्राप्तांशे ज्योतिष्टोमादिप्राप्तिकारित्वेऽपि पाक्षिकनिवृत्तिफलकतत्प्राप्तिकारित्वाभावात्।

ननु ''पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्यः'' इति षडहोद्देशेन बृहद्रथन्तर[2]पृष्ठविधावुक्तलक्षणस्यातिव्याप्तिः। अनेन विधिना विधिविषयबृहद्रथन्तरपृष्ठाप्राप्तेषु [[3]तृतीयादिष्वहस्सु?] पाक्षिक-

1. 11.4.14 अधिकरणे भाट्टदीपिकायां ''वेद्यां हवींष्यासादयति'' ''बर्हिषि हवींषास्यादयति'' इति वाक्याभ्यां प्राप्तयोर्वेदिबर्हिषोस्समुच्चय एव न विकल्पः इति निरूपितम् । 2. ''पृष्ठ'' इति क कोशे नास्ति ।
3. अत्र तालकोशे लुप्तांशोऽयमस्माभिः औचित्यात् पूरितः ।

वैरूपादिनिवृत्तिकरबृहद्रथन्तरप्राप्तेः क्रियमाणत्वादिति चेत् — न; निवर्तनीयवैरूपादेः पाक्षिकत्वाभावात्। पाक्षिकत्वं हि स्वाधिकरण-क्षणभिन्नकालवृत्तिप्राप्तिकरम्बिताप्राप्तिकत्वमिति निरवोचाम। ततश्च प्रकृतविध्यभावे वैरूपादेरेकस्मिन् एव काले तृतीयादिष्वहस्सु [अ?] प्राप्तिः, आद्ययोरह्नेर [ह्नोः प्रा?] प्राप्तिश्चेति तत्प्राप्त्याप्राप्त्योर्भिन्नकालीनत्वाभावात् तस्य न पाक्षिकत्वमिति पाक्षिकनिवृत्तिकरबृहद्रथन्तरप्राप्तिकारित्वाभावाद् नोक्तविधावति-प्रसक्तिः। अत एव "स ब्रह्मणे देयः" इत्यादिषु श्यावाश्व - सोमचमस - हविश्शेषाणां ब्रह्मसम्बन्धविधिष्वपि नातिव्याप्तिः। तत्र निवर्तनीयस्यर्त्विगन्तरसम्बन्धस्य पाक्षिकत्वाभावात्। तस्य ब्रह्मभागेऽप्राप्तेस्तदितरभागेषु प्राप्तेश्चैककालीनत्वेन भिन्नकालिकत्वाभावात्। तस्मात् निरुक्तलक्षणस्य न काप्यतिव्याप्तिः।

स्यादेतत् - एवमपि "हिरण्यगर्भस्समवर्तताग्रे इत्याघारमाघारयति" इति नियमविधावव्याप्तिरनिवार्या। एतदप्रवृत्तौ निवर्तनीयस्य प्राकृतमन्त्रस्य नित्यप्राप्तत्वेन पाक्षिकत्वाभावात्। नच निवर्त्य-प्राकृतमन्त्रप्रापकस्य "इन्द्र ऊर्ध्वोऽध्वरः इत्याघारमाघारयति" इति विधेरप्रवृत्त्या सहितायामेतद्विध्यप्रवृत्तौ प्राकृतमन्त्रस्य पाक्षिकत्वमस्तीति शङ्कितुं शक्यम्। उत्तराघारस्योक्तमन्त्रवर्णसमर्पणीयदेवताकस्यै-तन्मन्त्रविध्यप्रवृत्तिवेलायामैन्द्रत्वाभावेनास्य मन्त्रस्य तत्प्रकाशने अन्ताप्राप्तत्वेन पाक्षिकत्वाभावात्, कल्पसूत्रादेरेव तदानीं पाक्षिकत्वादिति चेत्———

उच्यते। स्वाधिकरणक्षणभिन्नक्षणवृत्तिप्राप्तिसंवलिताप्राप्तिक-पदार्थकार्यकारित्वमिह पाक्षिकत्वं विवक्षितम्। तेन प्राकृत-मन्त्रविध्यप्रवृत्तिदशायां भिन्नकालीनप्राप्तिसंवलिताप्राप्तिकाः कल्प-

सूत्रादयः तत्कार्योत्तराघारस्मृतिजननयोग्यः प्राकृतमन्त्रः तन्निवृत्तिं वायव्यपशुगतैन्द्राघारे कुर्वतीं तत्र हिरण्यगर्भलिङ्गकमन्त्रप्राप्तिं कुर्वाणे ''हिरण्यगर्भस्समवर्तताग्र इत्याघारमाघारयति'' इति विधौ नोक्तलक्षणदुर्भिक्षम्। अत्र भिन्नकालीनप्राप्त्यप्राप्तिकरम्बितकार्यकारित्वं तादृशप्राप्त्यप्राप्तिकरम्बितस्य कल्पसूत्रादेस्तदन्यस्य तत्कार्यकारिणः प्राकृतमन्त्रादेश्च साधारणमिति न क्वाप्यव्याप्तिः।

एवं सति प्रसिद्धपरिसंख्याविधावतिव्याप्तिः। तादृशप्राप्त्यप्राप्ति-करम्बितकल्पसूत्रादिकार्यकरस्य मन्त्रस्य गर्दभरशनासम्बन्धनिवृत्तिं कुर्वाणायाः अश्वरशनायां तस्य प्राप्तेः तेन विधिना क्रियमाणत्वादित्यत उक्तं श्लोके — **निजपदादिति।** लक्षणीयविधिविषयप्राप्यादित्यर्थः। उक्तविधिना क्रियमाणा चाश्वरशनायां मन्त्रप्राप्तिः न तद्विषयप्राप्येऽश्वरशनादाने मन्त्रनिवृत्तिं करोति। अपि तु गर्दभरशनादाने इति न तत्रातिव्याप्तिः। इह विवक्षितस्य निवृत्तिप्राप्त्यो-स्सामानाधिकरण्यस्याभावात्। नियमविधिस्थले च सर्वत्र विधिफलीभूतविधिविषयप्राप्तितत्फलीभूतेतरनिवृत्त्योस्सामानाधिकरण्य-मेव दृश्यते। यद्वा, तादृशनिवृत्तिफलकप्राप्तिफलकत्वमिह विवक्षितम्। अतो नोक्तपरिसंख्यायामतिव्याप्तिः। तत्रान्यनिवृत्तेरेव फलत्वेन लिङ्गात् सम्भवन्त्याः अश्वरशनायां मन्त्रप्राप्तेः फलत्वाभावात्। ''पञ्च पञ्चनखा भक्ष्याः'' इति प्राप्तपरिसंख्यायां च नातिव्याप्तिः। तत्र गोधादिपञ्चकेतरपञ्चनखभक्षणस्यानियतरागनिबन्धनस्य निवर्तनीयस्य पाक्षिकत्वेऽपि एतद्वाक्यस्य तन्निवृत्तिफलकत्वेन तत्फलकप्राप्ति-कारित्वाभावात्।

नन्वेवं ''उत्तरेऽहन् द्विरात्रस्य गृह्यते'' इति नियमविधावव्याप्तिः, तत्र नियम्यस्य षोडशिग्रहस्य षोडशिग्रहाभावनिवृत्तिरूपत्वेन

तद्भिन्नत्वाभावात् पाक्षिकनिवृत्तिकारिनिवर्तनीयतुल्यवस्त्वन्तरप्राप्तिकारित्वाभावात् तस्येति चेन्न। षोडशिग्रहाभावाभावः षोडशिग्रहात्मको न भवति, किन्त्वतिरिक्त एवेत्युक्तत्वेन तस्य विधेः षोडशिग्रहाभावनिवृत्तिफलकषोडशिग्रहनियमफलकतयातत्राव्याप्त्यभावात्।

नन्वेवमपि ''न हिंस्यात् सर्वा भूतानि'' इति नियमविधावव्याप्तिः; तत्र हि हिंसातद्वर्जनयोः पक्षप्राप्तयोः हिंसावर्जनं नियम्यते। हिंसयेव तद्वर्जनेनापि पुरुषेप्सितसिद्ध्या तयोरुभयोरपि पक्षप्राप्तिसत्त्वात्। तत्र चोक्तलक्षणं नोपपादयितुं शक्यम्। पाक्षिकहिंसानिवृत्त्यतिरिक्तस्य प्रापणीयस्याभावात्। यथा ''पञ्च पञ्चनखा भक्ष्याः'' इत्यत्र पाक्षिकवानरादिभक्षणनिवृत्त्यतिरिक्तस्य प्रापणीयस्याभावान्न तस्य नियमविधित्वं, तद्वदस्यापि नियमविधित्वासम्भवादिति चेत्———

सत्यम्। तथाऽपि लक्षणे निरुक्तपाक्षिकार्थनिवृत्तिं लक्षणामनपेक्ष्य शब्दतः प्रापयन् वा विधिर्नियमविधिरिति प्रवेश्यते। तेन ''न हिंस्यात्'' इत्यत्र[1] नाव्याप्तिः। ''न हिंस्या''दिति वाक्यं पाक्षिकहिंसाप्रतियोगिकनिवृत्तिं लक्षणामनपेक्ष्य प्रतिपादयति। ''पञ्च पञ्चनखा भक्ष्या'' इत्येतत् तु पाक्षिकवानरादिनिवृत्तिं लक्षणयैव प्रतिपादयतीति न तत्रातिप्रसङ्गः। षोडशिग्रहस्य षोडशिग्रहाभावाभावत्वपक्षेऽपि अनयैव विवक्षया षोडशिग्रहनियमविधावव्याप्तिस्सुपरिहरा। तस्य लक्षणामनपेक्ष्यैव षोडशिग्रहाभावनिवृत्तिरूपषोडशिग्रहप्रतिपादकत्वात्।

---

1. तालकोशे —— ''नातिव्याप्तिः, न हिंस्यादिति वाक्यं हि ... ... लक्षणमनपेक्ष्य न प्रतिपादयति'' इति पाठो दृश्यते। तत्रासङ्गत्यमालोच्य उपरि दर्शितः पाठोऽस्माभिः ऊहितः।

अत एव "नानृतं वदेत्" इति नियमविधावपि नाव्याप्तिः। तस्य लक्षणामनपेक्ष्यैव पाक्षिकानृतवदनप्रतियोगिकनिवृत्ति-प्रतिपादकत्वात्। पाक्षिकपदोपादानाच्च "दीक्षितो न जुहोति," "न तौ पशौ करोति," "नातिरात्रे षोडशिनं गृह्णाति" इत्याद्यपूर्वविधिषु नातिप्रसक्तिः; तेषां लक्षणामनपेक्ष्य निवृत्तिबोधकत्वेऽपि पाक्षिकप्रतियोगिकनिवृत्तिबोधकत्वाभावात्। षोडशिग्रहस्यापि निषेधविध्यप्रवृत्तिदशायां पाक्षिकत्वाभावात्। "न कलञ्जं भक्षयेत्," "न सुरां पिबेत्" इत्यादिरागप्राप्तनिषेधानां "न हिंस्या" दितिवत् नियमविधित्वात् तेषु लक्षणानुगतिरुचितैवेति दिक्।

"अतिहायेडो बर्हिः" इत्याद्यपूर्वविधावपि नातिव्याप्तिः, तत्र निवर्तनीयस्य प्रयाजत्रयसम्बन्धादेरपाक्षिकत्वात्। विधिविषयस्य समानयनस्य तत्तुल्यत्वाभावाच्च। अत्र विधिविषयस्य निवर्तनीयतुल्यत्वं प्रकृतविध्यप्रवृत्तिकालीनपक्षप्राप्तिमत्त्वेन वा, तत्कार्यजननयोग्यत्वेन वेति प्रागुक्तम्। निवर्तनीयकार्यजननयोग्यत्वं च क्लृप्तकल्प्यसाधारणम्। क्लृप्तमवघातविधिस्थले। कल्प्यं "इषे त्वेति शाखामाच्छिनत्ती" त्यादिषु। 'इषे वा' इतिमन्त्रो - त्कर - परिधि - हिरण्यगर्भलिङ्गकमन्त्राणां शाखाच्छेदनप्रकाशन - वाजिनपात्रधारण - पशुनियोजने-न्द्रप्रकाशनेषु सामर्थ्यस्य विनियोगविधिबलात् अध्याहार - पृथ्वग्रता - प्रथिमसम्पादन - लक्षणादिभिः कल्प्यत्वात्।

अयमत्र निष्कर्षः — पाक्षिकार्थनिवृत्तिफलां निवर्तनीय-तुल्यस्यार्थस्याप्राप्ते प्राप्तिं कुर्वन्, पाक्षिकार्थनिवृत्तिं लक्षणामनपेक्ष्य शब्दतः प्रतिपादयन् वा विधिर्नियमविधिः। अत्र कर्मणि क्तप्रत्ययान्तप्राप्तपदं लक्षणीयविध्यप्रवृत्तौ सदैवाप्राप्तस्य कदाचिदप्राप्तस्य च साधारणम्। निवर्त्यस्यार्थस्य पाक्षिकत्वं च स्वनिवर्त्यप्रापक-

विध्यन्तराप्रवृत्तिसहितायां वा, स्वबोध्यप्रापकविध्यन्तराप्रवृत्तिसहितायां वा, केवलायां वा लक्षणीयविध्यप्रवृत्तौ तद्विषयप्राप्ये भिन्नकालीनप्राप्त्यप्राप्तिकरम्बितो योऽर्थस्तत्कार्यकारित्वमिति सर्वं समञ्जसम् ॥

इति श्रीवादिहंसाम्बुदाचार्यवंशावतंस
वाजपेयसर्वपृष्ठाप्तोर्यामादियाजि-
श्रीनिवासाचार्यनन्दन - श्रीमद्रघुनाथाचार्यदीक्षितसूनोः आत्रेय-
वेङ्कटाचार्ययज्वनः कृतिषु विधित्रयपरित्राणे
नियमविधिलक्षणाक्षेपप्रतिक्षेपो
द्वितीयः

[।। अथ परिसंख्याविधिलक्षणाक्षेपप्रतिक्षेपस्तृतीयः ।।]

पारिसंख्यविधिलक्षणस्य यत् दूषणं विधिरसायने कृतम्।
तद्विशिक्षणविचक्षणं वचस्साधु मे दिशतु सारसेक्षणः ।। २७।।

[।। परिसंख्याविधिलक्षणाक्षेपानुवादः ।।]

आचार्योक्तं परिसंख्याविधिलक्षणमप्येवमाक्षिप्तं **विधिरसायने** — "तत्र चान्यत्र च" इति परिसंख्यालक्षणं "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त" इति लक्ष्ये, **तत्र** = अश्वरशनाग्रहणे, **अन्यत्र** = गर्दभरशनाग्रहणे च शेषिणि, एकस्मिन् मन्त्ररूपे शेषे लिङ्गाविशेषात् प्राप्ते सति इत्येवं योजनीयम्। एषा च शेष्यन्तरपरिसंख्या। [एवं?] "दण्डी प्रैषानन्वाह" इत्यादिशेष्यन्तरपरिसंख्यायामपि लक्षणं योज्यम्। "शंय्वन्ता प्रायणीया सन्तिष्ठत" इति लक्ष्ये, प्रायणीयायामेकस्यां शेषिण्यां शंय्वन्ताङ्गकलापरूपे तदुपरितनाङ्गकलापरूपे च शेषे प्राप्ते तदुपरितनाङ्गकलापरूपशेषान्तरपरिसंख्या। एवं "इडान्ता आतिथ्या सन्तिष्ठते" इत्यादावपि।

अत्र लक्षणगतौ तदन्यशब्दौ शेष्यन्तरपरिसंख्यायां शेषिपरौ, शेषान्तरपरिसंख्यायां शेषपरावित्यननुगमः। नच - तच्छब्दस्सर्वत्र विध्युपात्तपरः, अन्यशब्दस्तदनुपात्तपरः, ततश्च नाननुगमः। अश्वरशनाग्रहणशंय्वन्ताङ्गकलापयोः शेषिशेषयोर्विध्युपात्तत्वेन, परिसंख्येयगर्दभरशनाग्रहणशंयूपरितनाङ्गकलापरूपशेष्यन्तरशेषान्तर-योर्विध्यनुपात्तत्वेन च क्रोडीकृतत्वादिति — वाच्यम्। एवं सति "यदि रथन्तरसामा सोमस्स्यादैन्द्रवायवाग्रान् गृह्णीयात्" इति परिसंख्यायामव्याप्तेः। रथन्तरसामसु अरथन्तरसामसु च ज्योतिष्टो-मविकृतिषु चोदकादैन्द्रवायवाग्रतायां शेषतया प्रसक्तायामरथन्तरसाम्नां

परिसंख्यार्थं ज्योतिष्टो[मे?]मपाठप्राप्तायास्तस्या नैमित्तिकत्वकरण-मिति प्रागुक्तम्। अस्मिंश्च वाक्ये रथन्तरसाम्नामरथन्तरसाम्नां च ज्योतिष्टोमविकृतीनामनुपात्तत्वादव्याप्तिः। एवं "दीक्षाः सोमस्य" इति परसंख्यायामप्यव्याप्तिर्द्रष्टव्या। परिसंख्येयानां निरूढपश्वादीना मिव ग्राह्याण सोमविकृतीनां विश्वजिदादीनामपि विध्यनुपात्तत्वात्।

न च तदन्यशब्दौ ग्राह्यपरिसंख्यापरौ, अतो नोक्तदोष इति वाच्यम्। "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् [च], अत्र ह्येवावपन्ति अत एवोद्वपन्ती"ति परिसंख्यायामव्याप्तेः। अत्र विवृद्धस्तोमकक्रतुगतेषु सर्वेष्वपि स्तोत्रेषु स्तोमविवृद्ध्यर्थं प्राकृतेभ्योऽधिकावापे प्राप्ते "अत्र ह्येवावपन्ती" त्यनेन पवमानगतगायत्र्यादिभ्योऽन्यत् सर्वं परिसंख्यायते। तत्र परिसंख्यायामावापस्य व्यावर्तनीयेषु स्तोत्रान्तरेष्वेव प्राप्तिरस्ति। नतु तत्र ग्राह्येषु पवमानगतगायत्र्यादिषु। यद्यपि स्तोत्रान्तरेष्विव पवमानस्तोत्रेष्वपि स्तोमविवृद्ध्यर्थमावापप्राप्तिरस्ति; तथाऽपि न सामान्तराणामावापप्राप्तिः, किन्तु सामसहितानामृगन्तराणामेव; स्तोत्रीयगर्गतसंख्याधिक्यरूपस्तोमविवृद्धेः ऋगन्तरावाप एवाति-सामञ्जस्यात्। ऋगन्तरावापश्च पवमानगतगायत्र्यादिषु ग्राह्यासु न प्राप्नोति; ऋचामृगन्तराधारत्वानुपपत्तेः। येषां प्रत्यक्षविहितानां साम्नामुत्तराग्रन्थे योनिर्न पठिता, अत एवोत्तरे अपि न स्तः, तेषामावापस्य प्राकृतऋक्ष्वेव प्राप्तावपि न गायत्र्यादि[1]प्राप्तिः। किन्तु अन्त्यतृच एव, [2]आगन्तुकानामन्ते निवेश इति न्यायात्। ततश्च "अत्र ह्येवावपन्ति" इति वाक्येन एवकारश्रुतिबलात् पवमानगतगायत्र्यादिभ्योऽन्यत्र सर्वत्रावापं परिसंचक्षाणेन

1. "गायत्र्यादिषु" इति विधिरसायने ।

2. मी.सू. 5.2.9. अधिकरणे "अन्ते तु बादरायणः" इत्यादिसूत्रे अयं न्यायो दर्शितः ।

स्तोत्रान्तराणां पवमानगतान्त्यतृचानां च निवृत्तौ सत्यामर्थादावापः पवमानगतगायत्र्यादिष्वेवावतिष्ठते। स च गायत्र्याद्याधारत्वसामर्थ्यात् साम्नामेव, नर्चामित्यपि व्यवतिष्ठते।

[1][न च] पवमानगतगायत्र्यादिभ्योऽन्यत्रावापपरिसंख्यानेऽपि गायत्र्यादिष्वावापाविधाने तास्वे[2]वावापो न प्राप्नोति। [3]स्तोत्रान्तरेष्वावश्यकेनाभ्यासेनैव संख्यापूरणसम्भवात्। ततश्च गायत्र्यादिष्वावापमिच्छता तद्विधानार्थमेवेदं वाक्यं, नतु स्तोत्रान्तरपरिसंख्यानार्थमित्यङ्गीकरणीयम्। एकस्य वाक्यस्योभयत्र व्यापारायोगादिति वाच्यम्। एवकारोपहतविधिशक्तिकस्यास्य परिसंख्यापरत्वावश्यसम्भावात्, स्तोत्रान्तराणामगत्या अभ्यासेनैव संख्यापूरणेऽपि पृथक्त्वनिवेशिन्यास्संख्यायाः सिद्ध्यर्थं सम्भवत्सामञ्जस्यापरित्याग[4]न्यायप्राप्तवापस्यार्थात् गायत्र्यादिषु व्यवस्थासिद्धेः। ततश्चात्र परिसंख्या[5] वाक्यार्थः। इयांस्तु विशेषः- ''इमामगृभ्णन्'' इत्यादिपरिसंख्यायामश्वरशनाग्रहणे मन्त्रस्य प्राप्तिः श्रौती; आर्थी गर्दभरशनग्रहणपरिसंख्या। इह त्वेवकारश्रवणादावापे शाब्दी गायत्र्याद्यतिरिक्तपरिसंख्या; आर्थी तस्य गायत्र्यादिषु प्राप्तिः, तत्सामर्थ्याच्च तस्य ऋग्विषयत्वं परित्यज्य सामविषयत्वप्राप्तिरिति। एवं च स्तोत्रान्तरपवमानगतान्त्यतृचेषु व्यावर्तनीयेष्विव ग्राह्येषु गायत्र्यादिष्वेतद्वाक्योपजीवनमन्तरेण प्राप्त्यभावादत्राव्याप्तिरनिवार्या।

अत एव द्वयोस्समुच्चित्यप्राप्तिमात्रं ''तत्र चान्यत्र च प्राप्त'' इत्यनेन विवक्षितमिति पक्षोऽपि निरस्तः। ''अत्र ह्येवावपन्ती''ति

1. आवश्यकत्वात् विधिरसायनस्थितमिदमत्र योजितम् । 2. विधिरसायने एवकारो नास्ति । 3. स्तोत्रान्तरेष्विवेति विधिरसायने । 4. अपरित्यागाय न्यायप्राप्तस्येति विधिरसायने । 5. परिसंख्यैवेति विधिरसायने ।

परिसंख्यास्थले ग्राह्यपरिसंख्येययोरावापस्य समुचित्य प्राप्त्यसम्भवेन तत्राव्याप्तेः।

किञ्च "तत्र चान्यत्र च प्राप्त" इत्यनेन शेषिद्वये एकस्य शेषस्य प्राप्तिर्विवक्षिता वा? एकस्मिन् शेषिणि शेषद्वयस्य वा?। नाद्यः; "शंय्वन्ता प्रायणीया सन्तिष्ठते" इत्यादिशेषान्तर-परिसंख्यायामव्याप्तेः। न द्वितीयः, शेष्यन्तरपरिसंख्यायामव्याप्तेः। यद्युच्येत — उभयसंग्रहाय शेषशेषिभावसम्बन्धेन प्राप्तिर्विवक्षितेति। तदा "तत्र चान्यत्र च" इति सप्तम्याः "प्राप्ते" इति सप्तम्याश्च किं सामानाधिकरण्यं विवक्षितं, वैयधिकरण्यं वा? नाद्यः, शेष्यन्तरपरिसंख्यायामव्याप्तेः।

ननु सप्तम्योः सामानाधिकरण्यं विवक्षितम्। नचैवं शेष्यन्तरपरिसंख्यायामव्याप्तिः, तत्र = अश्वरशनाग्रहणे; अन्यत्र = गर्दभरशनाग्रहणे च शेषशेषिभावेन मन्त्रसम्बन्धितया प्राप्ते सतीत्येवं तत्र लक्षणयोजनसम्भवात्। वैयधिकरण्यपक्षोऽपि नानुपपन्नः। न च शेषान्तरपरिसंख्यायामव्याप्तिः। तत्र = शंय्वन्ताङ्गकलापे, अन्यत्र = शंयूपरितनाङ्गकलापे च प्रायणीयारूपे शेषिणि प्राप्ते सतीत्येवं तत्र लक्षणयोजनसम्भवादिति चेत् — न। एवं सति "वाग् वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते" इत्याश्रयान्तरपरिसंख्यायां, "सायं जुहोति, प्रातर्जुहोती"ति निमित्तान्तरपरिसंख्यायां चाव्याप्तेः। आश्रयाश्रयिणोर्निमित्तनैमित्तिकयोश्च शेषशेषिभावाभावात्।

अथ येन केनचित्सम्बन्धेन तत्र चान्यत्र च प्राप्त इत्येव लक्षणम्; अतो नोक्तदोष इति चेत् — एवं सति "षडहा भवन्ति, चत्वारो भवन्ति, शतोक्थ्यं भवति, शताग्निष्टोमं भवति, सर्वस्त्रिवृद् भवति, सर्वः पञ्चदश" इत्यादिविधिष्वतिव्याप्तिस्स्यात्।

एकस्मिन् षट्त्रिंशद्रात्रे षडहधर्माणां छन्दो [ग?] धर्माणां च तदन्तर्गतत्वसम्बन्धेन चोदकात् त्प्राप्तेः। तथा शतोक्थ्ये शताग्निष्टोमे चाग्निष्टोमसंस्थोक्थ्यसंस्थयोस्तदन्तर्गतत्वसम्बन्धेन, एवमेकस्तोमक्रतुषु च त्रिवृत्पंचदशयोस्तदन्तर्गतत्वसम्बन्धेन चोदकात् प्राप्तिरस्तीति तत्राप्यतिव्याप्तिरनिवार्या।

नन्वेकत्र समुच्चित्य प्राप्तिरिह विवक्षिता। नचोदाहृतस्थलेषु। [[1]षट्त्रिंशद्रात्रे आ] दितः षडहधर्मजातस्य, ततश्चतुर्थ्वहस्सु छन्दोगधर्मजातस्य च चोदकात् प्राप्तेः। शतोक्थ्ये शताग्निष्टोमे चाद्येऽहनि अग्निष्टोमसंस्थायाः, द्वितीयतृतीययोरुक्थ्यसंस्थायाः, इत्येवंप्रकारेण चोदकात् प्राप्तिर्भिन्नविषया। एवमेकस्तोमक्रतुषु बहिष्पवमाने त्रिवृत्स्तोमस्य, आज्येषु माध्यन्दिनपवमाने च पञ्चदशस्तोमस्येत्येवंरूपेण चोदकाभिन्नविषयैवेति न क्वाप्यतिव्याप्तिरिति चेत् — न। एकस्मिन् षट्त्रिंशद्रात्रादौ षडहधर्मच्छन्दोगधर्मादीनां शेषशेषिभावसम्बन्धेन प्राप्त्यभावेऽपि तदन्तर्गतत्वसम्बन्धेन समुच्चित्यप्राप्तिसत्त्वात्। शेषशेषिभावसम्बन्धस्याविवक्षणात्। अपिच "सर्वं ब्रह्मणे परिहरति", "ब्रह्मणे देयः", "स प्रियाय सगोत्राय ब्रह्मणे देयः," इति विधिष्वतिव्याप्तिस्स्यात्; ब्रह्मणस्तदन्यर्त्विग्वर्गस्य चैकस्मिन् हविश्शेषे, श्यावाश्वे, सोमचमसे च प्राप्तिसत्त्वात्। एवमग्निष्टुति "आग्नेया ग्रहा भवन्ति" इति विधौ चातिव्याप्तिः, तस्याग्निष्टुति इन्द्रवाय्वाद्यनेकदेवताप्राप्तावग्निविधानार्थत्वात्।

किञ्च "व्रीहीनवहन्ति" इत्यादिनियमविधिष्वतिव्याप्तिः, विदलनादिष्ववहननादिषु च पक्षप्राप्तेषु प्रवर्तमानत्वात्। नच नित्यप्राप्त-

1. षट्त्रिंशद्रात्रे इत्येतस्थाने षडहधर्माणामिति तालकोशे दृश्यते, तच्चानन्वितम्। अतः विधिरसायनस्थः पाठः उपरि कुण्डलमध्ये दर्शितः।

[त्व] स्य विवक्षितत्वान्नोक्तनियमविधावतिव्याप्तिरिति वाच्यम्। तर्हि "पञ्च पञ्चनखा भक्ष्या" इति प्रसिद्धपरिसंख्यायामव्याप्तेः। गोधादिपञ्चकभक्षणस्य वानरादिभक्षणस्य चानियतरागमूलत्वेन तयोर्नित्यप्राप्त्यभावात्। नच समुच्चित्य प्राप्तिर्विवक्षिता; तेन न नियमविधावतिव्याप्तिः। अवघातविदलनयोः परस्परप्रतिक्षेपकत्वेन समुच्चित्य प्राप्त्यसंभवात्। नाप्युक्तपरिसंख्यायामव्याप्तिः; कूर्मादि - वानरादिभक्षणयोः परस्परप्रतिक्षेपकत्वाभावेन समुच्चित्य प्राप्तिसम्भवादिति वाच्यम्। एवमपि "पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते" इति नियमविधावतिव्याप्तेः। इदं हि वाक्यं "द्वादशाहेन प्रजाकामं याजयेत्[1]" इत्यहःशब्दोदितानां द्वादशानां यागानां प्रजाकामार्थत्वेन चोदितानामेकफलत्वेन प्रयोगैक्ये सति पूर्वं पूर्वमहः क्वचित् पदार्थेऽवस्थाप्य परं परमुपक्रमितव्यमित्यनियमेन पत्नीसंयाजरूपे तदुपरितने तत्प्राचीने वा क्वचिदङ्गेऽवस्थापने प्राप्ते पत्नीसंयाजेष्ववस्थापननियमार्थम्। ततश्च पत्नीसंयाजान्तानां तदुपरितनानां चाङ्गानां कदाचित् त्समुच्चित्य प्राप्तिरस्तीत्यतिव्याप्तिरनिवार्या। एवं "यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्" इति नियमविधावप्यतिव्याप्तिः, जौहवाज्ये प्रयाजानामन्येषां च कदाचित् समुच्चित्य प्राप्तिसत्त्वात्।

ननु तत्र चान्यत्र च प्राप्ते तदन्यनिवृत्तिफलको विधिः परिसंख्येति लक्षणं विवक्षितम्। तथाचोदाहृतेष्वप्राप्तविषयेषु चतुष्षडहादिविधिषु तत्तत्प्राप्तेरेव फलत्वेन, पक्षप्राप्तविषयेष्ववघातादिविधिषु तत्तन्नियमस्यैव फलत्वेन निवृत्तेरानुषङ्गिकत्वान्नातिव्याप्तिरिति चेन्न — तथा सति अन्यनिवृत्तिफलकत्वस्यैव लक्षणत्वसम्भवेन "तत्र चान्यत्र च प्राप्त"

1. याजयेयुः इति ख पाठः।

इति श्रुतांशवैयर्थ्यात्। विधिनियमयोः प्राप्तिपूर्तिफलकयो-र्निवृत्तिफलकत्वाभावेन तावतैव तत्रातिव्याप्तिवारणात्।

ननु ''दीक्षितो न जुहोति'', ''न तौ पशौ करोति'', ''नातिरात्रे षोडशिनं गृह्णाति'' इत्यादिष्वपूर्वविधिषु ''न हिंस्यात् सर्वा भूतानि'', ''नानृतं वदेत्'' इत्यादिनियमविधिषु च निवृत्तिफलकत्वादतिव्याप्तिः स्यादिति तद्वारणाय श्रुतांश इति चेन्न। तेष्वतिव्याप्तेरुक्तविशेषणेनापि दुर्वारत्वात्। तथाहि — दीक्षामध्ये क्रत्वर्थहोमाः वर्जनीयैः पुरुषार्थहोमैरग्निहोत्रादिभिस्सह प्राप्ताः। पशावाज्यभागातिरिक्ताङ्गानि आज्यभागाभ्यां समुच्चित्य प्राप्तानि। अतिरात्रे षोडशिग्रहव्यतिरिक्ताङ्गानि षोडशिग्रहेण [सह?] प्राप्तानि, पुरुषे भोजनादीनि हिंसादिभिस्सह प्राप्तानीति।

ननु ''तत्र चान्यत्र प्राप्त'' इत्यत्र एकरूपसम्बन्धेन प्राप्तिर्विवक्षिता। अस्ति च प्रागुदाहृतेषु शेषित्वेन शेषत्वेनाश्रयत्वेन निमित्तत्वेन वा केनचिदेकरूपेणैव सम्बन्धेनोभयोः प्राप्तिः। तथाच ''दीक्षितो न जुहोति'' इत्यपूर्वविधौ नातिव्याप्तिः; दीक्षामध्ये क्रत्वर्थहोमानां क्रतुशेषत्वेन प्राप्तिः, पुरुषार्थहोमानां कालैक्यसम्बन्धेनेति सम्बन्धभेदात्। ''न तौ पशौ करोति'' '' नातिरात्रे षोडशिनं गृह्णाती''ति निषेधयोस्तूक्तलक्षणानुसारेण परिसंख्यात्वमेवास्तु। न चैवमपि ''न हिंस्यात्'' इति नियमविधावतिव्याप्तिः, पुरुषं प्रति शेषत्वेनैव भोजनादीनां [हिंसादीनां च?] प्राप्तिसत्त्वादिति वाच्यम्। अत्यन्ताप्राप्तनिवृत्तिफलक[त्व?]स्य लक्षणे विवक्षितत्वादिति चेत्—

मैवम्। दृष्टार्थानां कण्डूयनादीनामदृष्टार्थानां हरिस्मरणादीनां च पुरुषार्थहोमैः सह कालैक्यसंबन्धेन क्रतौ प्राप्तिसत्त्वेन ''दीक्षितो न जुहोती'' इत्यपूर्वविधावुक्तविवक्षयाऽप्यतिव्याप्त्यनिरासात्।

निवृत्तावत्यन्ताप्राप्तत्वविवक्षायां शशादिपञ्चकव्यतिरिक्तपञ्चनखभक्षण-निवृत्तेरत्यन्ताप्राप्तत्वाभावेन "पञ्च पञ्चनखा भक्ष्या" इति परिसंख्यायामव्याप्तिप्रसक्त्या तस्य विशेषणस्याविवक्षणीयतया "न हिंस्यात्" इति नियमविध्यतिव्याप्त्यनिरासात्।

ननु [यदि] "दीक्षितो न जुहोति" इत्यादिषु सर्वेषु निषेधेषु लक्षणमस्ति; [तदा] सन्तु तेऽपि परिसंख्या [विधय] इति चेत्; तथाप्यपूर्वविधावतिव्याप्तिः। यदि निवृत्तिफलको विधिरित्येतावदेव लक्षणं क्रियते, यदि वाऽनेकस्य समुच्चित्य प्राप्ताविति विशेष्यते, सर्वथाऽप्यग्निहोत्रविधावस्त्येवेदं लक्षणम्। श्रमपरिहारार्थं लौकिक-कर्मणामग्निहोत्रादिकर्मणां चाकरणयोस्समुच्चित्य प्राप्तौ "यावज्जीव-मग्निहोत्रं जुहोती"ति विधेः अग्निहोत्राकरणनिवृत्तिरूप-तदनुष्ठानफलकत्वात्। न चात्र निवृत्तिपदेना[1]भावरूपैव निवृत्ति-र्विवक्षितेति शक्यं वक्तुम्; लक्षणस्य चात्राव्याप्तिः न शङ्कनीया। नियम्यस्य पत्नीसंयाजावस्थापनस्य पाक्षिकत्वाभावेऽपि हारियोजन-प्रचार - पश्चादिसमापनकर्मावस्थापनयोर्निवर्त्यंयोस्त्वदुक्तगत्या पाक्षि-कत्वात्। "अनियमे प्राप्ते" इति **भाष्यं** निवर्त्यानियमे प्राप्ते इति सुयोजम्। यस्मिन्कस्मिंश्चिदनियमेनावस्थाने प्राप्ते इति **तन्त्ररत्नवाक्यमपि** हारियोजनप्रचारे पश्चादिसमापककर्मणि यस्मिन्कस्मिंश्चिदित्येवं निवर्त्यानियमपरत्वेन त्वयैव योजितमिति न काऽप्यनुपपत्तिः।

यत्तु सिद्धान्ते परेणोक्तं — "पत्नीसंयाजान्तावस्थापनस्य पाक्षिकत्वाभावेऽपि सहत्वनिर्वाहकतया दृष्टार्थत्वसत्त्वात् तावन्मात्रेणायं नियमविधिः" इति ——— तन्न। अग्निष्टोमीयान्तपूर्वाङ्गावभृथाद्युत्त-

1. भावरूपैवेति विधिरसायने।

राङ्गतन्त्रतया न्यायसिद्धैकोपक्रमावसानत्वेन सहत्वनिर्वाहसंभवात् पत्नीसंयाजान्तावस्थापनस्य तादर्थ्याभावेन दृष्टार्थत्वाभावात्। एतच्च विस्तरेण **नवममकरन्दे**ऽस्माभिर्निरूपितं द्रष्टव्यम्॥

परिसंख्यालक्षणं द्विविधम् (तु इत्थम्: उच्यते—)

एवान्यान्यानपेक्षस्वगतपदभवाभाववत्त्वाप्रकार-
ज्ञानस्यागोचरत्वा [रः स्या?] नञ्सहितपदज्ञाप्यभावातिरित्ता।
यैषा किञ्चिन्निवृत्तिर्विधिमभिदधते [1]तत्फलं पारिसंख्यं
प्रादुष्ष्युर्लक्षणेऽस्मिन् न परनिगदिताव्याप्त्यतिव्याप्तिदोषाः॥ २९

निवृत्तिफलको विधिः परिसंख्याविधिः "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यादिषु परिसंख्याविधिषु सर्वेषु निवृत्तिफलत्वस्यानुगतत्वात्। एतावत्युक्ते "यावज्जीवमग्निहोत्रं जुहोती"ति विधावतिव्याप्तिः, तस्याग्निहोत्राकरणनिवृत्तिरूप-तदनुष्ठानफलकत्वात्। अत उक्तं — **भावातिरिक्तेति**। तदकरण-निवृत्तेस्तत्करणात्मकभावरूपत्वान्न तत्रातिव्याप्तिः। भावातिरिक्तनिवृत्तिफलकत्वं परिसंख्याविधित्वमित्येतावन्मात्रोक्तौ "न तु कांस्यस्य तापनम्" इत्यादिनिषेधपरिसंख्यास्वनुष्ठानफलास्वव्याप्तिः, "न तु कांस्यस्य तापनम्" इत्यस्य कांस्येतरतैजसेषु तापनाभावाभावरूपतापनप्राप्तिफलकत्वात् तत्र फलीभूताया निवृत्तेर्भावरूपत्वादत उक्तं — **नञ्सहितपदज्ञाप्येति** भावविशेषणम्। ततश्च कांस्यस्य न तापनमित्येवं तापनस्य नञ्समभिव्याहृततापन-[पद?] ज्ञाप्यभावत्वेन तदसहितपदज्ञाप्यभावातिरिक्तत्वान्न तत्राव्याप्तिः। एतावत्युक्ते "न तौ पशौ करोति" इत्यादि-

1. तत्फलमित्यत्र बहुव्रीहिः तथा च तादृशनिवृत्तिफलकं विधिं परिसंख्यां अभिदधते इत्यन्वयः।

निषेधेष्वतिव्याप्तिः, तेषामुक्तरूपाज्यभागानिवृत्त्या[1] दिफलकत्वात्। तत्फलीभूतायाः आज्यभागादिनिवृत्तेर्भावरूपत्वाभावात्। अतः **स्वगतपदजन्यज्ञानाविषयत्वं** निवृत्तिविशेषणं दीयते। तेन न तत्रातिव्याप्तिः, आज्यभागाभावादिरूपायाः निवृत्तेः स्वशब्दविवक्षितप्रकृतविधिगतनञ्पदजन्यज्ञानविषयत्वात्। एवं सति पुनः ''न तु कांस्यस्य तापनम्'' इत्यत्राव्याप्तिः स्यात्; तत्र फलीभूततापनरूपनिवृत्तेः तद्वाक्यगततापनपदजन्यज्ञानविषयत्वात् तन्निवारणाय स्वगतपदजन्यज्ञाने **अभावप्रतियोगिकत्वाप्रकारकत्वं** विशेषणं दद्मः। तेन न तत्राव्याप्तिः। ''न तापन'' मित्येवं तापनस्य तद्वाक्यगतपदजन्येऽभावप्रतियोगिकत्वप्रकारके ज्ञाने विषयत्वेऽपि तदप्रकारकज्ञानाविषयत्वात्। एवं च स्वगतपदजन्याभावप्रतियोगिकत्वाप्रकारकज्ञानाविषयनञसमभिव्याहृतपदज्ञाप्यभावातिरिक्तनिवृत्तिफलकत्वं परिसंख्याविधित्वमिति सम्पन्नम्। एतच्च ''पञ्च पञ्चनखा भक्ष्या'' इति प्रसिद्धपरिसंख्यायामव्याप्तम्; तद्वाक्यफलीभूतायाः कीशादिभक्षणनिवृत्तेर्लक्षणया तद्वाक्यगतपदजन्यज्ञानविषयत्वात्। अतः **अन्यापेक्षेति** स्वगतपदविशेषणम्। लक्षणानपेक्षेत्यर्थः। उक्तपरिसंख्याविधिफलीभूतनिवृत्तिज्ञानं लक्षणां[2]मपेक्ष्यैव तद्वाक्यगतपदैर्जन्यत इति लक्षणानपेक्षस्वगतपदजन्यज्ञानाविषयनिवृत्तिफलकत्वमस्त्येवेति न तत्राव्याप्तिः। एवमपि ''अत्र ह्येवावपन्ति'' इत्यत्राव्याप्तिः, तत्फलीभूतायाः स्तोत्रान्तरेष्वावाप निवृत्तेः तद्गतैवकारजन्यज्ञानविषयत्वात्। अत उक्तं — **एवान्येति।** एवकारभिन्नेत्यर्थः। स्तोत्रान्तरेष्वावापनिवृत्तेस्तद्गतैवकारजन्यज्ञानविषयत्वेऽपि एवकारभिन्नतद्गतपदजन्यज्ञानाविषयत्वात् तत्रापि लक्षणानुगतिः।

1. अत्र आदिपदं अधिकमिति भाति ।
2. अनपेक्ष्यैवेति तालकोशे ।

अत्र भावप्रतियोगिकाभावाभावस्य भावरूपत्वं नास्तीति पक्षे अग्निहोत्रकरणाभावाभावस्याग्निहोत्रकरणरूपत्वाभावेन निवृत्तिफल-कत्वाभावादेव ''यावज्जीवमग्निहोत्रं जुहोती'' त्यत्र नातिव्याप्तिरिति तस्मिन् पक्षे भावातिरिक्तेति निवृत्तिविशेषणं न देयम्। नापि नञसहितपदज्ञाप्येति भावविशेषणम्।

नन्वेवमस्मिन् पक्षे ''न तु कांस्यस्य तापन'' मित्यस्य निवृत्तिफलकत्वाभावात् परिसंख्याविधित्वं न स्यादिति चेत् — इष्टापत्तेः। ''नानूयाजेषु'' इत्यस्य पर्युदासपरत्वमाश्रित्य यथाऽनूयाजव्यतिरिक्तेष्वित्यर्थस्समाश्रीयते, तथा ''न कांस्यस्य'' इत्यस्य कांस्यव्यतिरिक्तस्येत्येवमर्थं स्वीकृत्य कांस्यव्यतिरिक्तस्य तापनं कार्यमित्येवमत्यन्ताप्राप्ततापनप्रापकत्वेन तस्यापूर्वविधिताया एव स्वीकारसंभवात्। अस्मिन् पक्षे अभावप्रतियोगिकत्वाप्रकारकत्वं स्वगतपदजन्यज्ञानविशेषणमपि नोप देयम्। तस्य ''न तु कांस्यस्य तापनम्'' इत्येतदव्याप्तिवारकत्वात् तत्राव्याप्तेश्चादोषत्वात्।

तथाच एवकारभिन्नलक्षणानपेक्षस्वगतपदजन्यज्ञानविषय-किंचिन्निवृत्तिफलकविधित्वं परिसंख्याविधित्वमिति संपद्यते। इदं च लक्षणं प्रसिद्धशेष्यन्तरपरिसंख्यायामस्ति। तत्फलीभूतायाः गर्दभरशनाग्रहणे मन्त्रनिवृत्तेरार्थत्वेन तद्गतपदजन्यज्ञानाविषयत्वात्। गृहमेधीये ''आज्यभागौ यजती''ति शेषान्तरपरिसंख्यायामप्यस्ति। आज्यभागेतराङ्गनिवृत्तेरशाब्दत्वात्। ''यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीयात्'' इत्यत्रापि फलीभूतारथन्तरसामभ्यो विकृतिभ्यः ऐन्द्रवायवत्वनिवृत्तिर्न तद्गतपदजन्यज्ञानविषयः। एवं ''दीक्षा सोमस्य'' इत्यादिनिमित्तान्तरपरिसंख्यायां च नाव्याप्तिः। तत्फलीभूतयोराश्रयान्तरनिमित्तान्तरनिवृत्त्योस्तद्गतपदजन्यज्ञान-विषयत्वात्। ''षडहा भवन्ति, चत्वारो भवन्ति'' इत्याद्यपूर्व-[विधिष्वपि नातिव्याप्तिः, तेषां निवृत्तिफलकत्वाभावात्?]।

अत एव ''सर्वं ब्रह्मणे परहिरति'' इत्यादिविधिषु नातिव्याप्तिः, तेषामत्यन्ताप्राप्तायाः कात्स्न्र्येन ब्रह्मसम्बन्धप्राप्तेरेव फलत्वेन तत्र आर्थत्विंगन्तरसम्बन्धनिवृत्तेः फलत्वाभावात्। ''आग्नेया ग्रहा भवन्ति'' इत्यत्रापि नातिव्याप्तिः, तस्याप्राप्ताग्निदेवतासम्बन्धप्रापणफलकत्वेनानुषङ्गिकेन्द्रवाय्वादिनिवृत्तेः फलत्वाभावात्। नियमविधिषु च नातिव्याप्तिः; तेषां नियमफलकत्वेन निवृत्तिफलकत्वाभावस्योक्तत्वात्। ''यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्'' इति नियमविधावप्यन्यनिवृत्तेरशाब्दत्वान्नातिप्रसक्तिः।

''तत्र चान्यत्र च प्राप्ते'' इति श्रुतोंऽशो निवृत्तिफलकत्वस्य परिसंख्याविधिलक्षणत्वे व्यर्थस्स्यादित्येतदवशिष्यते। तत्रोच्यते — तत्र चान्यत्र प्राप्त्युपपादनेन न प्राप्तेः फलत्वम्। किन्तु निवृत्तेरेवेति ज्ञापनेन निवृत्तिफलकत्वं परिसंख्याविधित्वमिति तत एव लाभात् तद्वैयर्थ्योक्त्ययोगात्। तस्मान्निरुक्तं परिसंख्याविधिलक्षणं निरवद्यमित्यास्तां विस्तरः।

परभाषितदूषणापहर्तृ[त्यै?] परिसंख्याविधिलक्षणं मदुक्तम्।
परिपक्वधियो गताभ्यसूयाः परिगृह्णन्त्वनुकम्पया महान्तः॥ ३०

इति श्रीवादिहंसाम्बुदाचार्यवंशावतंस वाजपेयसर्वपृष्ठाप्तोर्यामादियाजि-
श्रीनिवासाचार्यनन्दन श्रीमद्रघुनाथाचार्यदीक्षितसूनोरात्रेय-

वेङ्कटाचार्ययज्वनः कृतिषु विधित्रयपरित्राणे

परिसंख्याविधिलक्षणाक्षेपप्रतिक्षेपः

तृतीयः

॥ विधित्रयपरित्राणं सम्पूर्णम् ॥

॥ हरिः ओम् ॥ ॥ श्रीमते हयग्रीवाय नमः ॥

*विधित्रयपरित्राणोदाहृतानां विधिवाक्यानां सूची ।

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
अक्षैर्दीव्यति	अपूर्व	3-3-7	4
अग्नये स्विष्टकृते समवद्यति	परिसंख्या	12-3-2	13,27
अग्निहोत्रं जुहोति	अपूर्व	1-4-3	4
अतिहायेडोबर्हिः प्रतिसमानयते जुह्वामौपभृतम्	अपूर्व	4-1-15	40,46,50,51,72
अत्र ह्येवावपन्ति	परिसंख्या	10-4-12	41,75,76,83
अथातो अग्निमग्निष्टोमेनानुयजन्ति	अपूर्व	2-3-10	4,68
अपबर्हिषः प्रयाजान् यजति	अपूर्व	10-7-13	18
अपबर्हिषावनूयाजौ यजति	अपूर्व	10-7-13	19
अप्सुमन्तावाज्यभागौ यजति	परिसंख्या	10-7-13	19
अश्वः श्यावो दक्षिणा, स ब्रह्मणे देयः	अपूर्व	10.3.18	21,33,34,50
आग्नेया ग्रहा भवन्ति	नियम	10-4-24	13,13,25,84
आज्यभागौ यजति	परिसंख्या	10-7-9	13,13,25,84
आत्रेयाय प्रथमाय हिरण्यं दद्यात्	अपूर्व	3-2-8	49-52
इडान्ता अतिथ्या	विधिरसायन- -मते अपूर्व प्राचीनमते परिसंख्या	10-7-10	56,74

★ अत्र प्रायशः मैसूरनगरमुद्रितभाट्टदीपिकासम्पुटचतुष्टयमनुसृत्यैव अध्याय-पादाधिकरणनिर्देशः कृतः । क्वचित् पूनानगरमुद्रित सवार्त्तिकशाबरभाष्यानुरोधेनापि । अत्र कोशे विधिवाक्यानां स्वस्वरूपेणोद्धरणं यत्र यत्र कृतमस्ति तत्स्थलानुरोधेन पुटनिर्देशः कृतः । न तु विधीनामर्थतोऽनुवादस्थलानुरोधेनापि ।

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
इडामुहह्वयते	परिसंख्या		13,13,27
इन्द्र ऊर्ध्वोध्वर इत्याघारमाघारयति	अपूर्व	1-4-4	69
इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते	परिसंख्या	1-2-4	3,29,46, 66,74,76,82
इषे त्वेति शाखामाच्छिनत्ति	नियम	2-1-15	36,66,72
उक्थ्ये गृह्णीयाद्विश्वजिति ग्राह्याः	अपूर्व		5
उच्चैः ऋचा क्रियते	नियम	3-3-1	18,37,60,66
उत्करे वाजिनमासादयति	नियम	10-3-3	36,52,65,67
उत्तरेऽहन् द्विरात्रस्यगृह्यते-	नियम	10-5-13	12,20 24,25,31, 33,43,48,53,70
उपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्याः	अपूर्व	10-8-11	5
उपांशु पौर्णमास्यां यजन्	अपूर्वपरिसंख्योभयरूपः	2-2-4	14,23,31
उपांशुयाजमन्तरा यजति	अपूर्व	2-2-4	9
ऊर्जेत्वेत्यनुमार्ष्टि	नियम	2-1-15	36
ऋतावुपेयात्	नियम	10-8-7	20,33
एकादश्यामुपवसेत्	नियम	4-1-3	54
एकं साम तृचे क्रियते स्तोत्रीयम्	अपूर्व	9-2-3	15
ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रम् अथाग्रयणाग्रम्	अपूर्व	10-5-25	6,7
औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वाऽवहन्ति, अथ- -एतदुपदधाति	अपूर्व	11.1.4	42
औदुम्बरस्सोमचमसो दक्षिणा, स प्रियाय सगोत्राय ब्रह्मणे देयः	अपूर्व	10.3.19	21.33,50

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
औदुम्बरो यूपो भवति	नियम	1-2-2	12,26,28, 39,40,67
कण्वरथन्तरं पृष्ठं भवति	अपूर्व	9-2-15; 10-4-23	64,65
कृष्णलं श्रपयति	अपूर्व	8-1-9, 10-1-1	18
क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति	अपूर्व	4-2-6	15
खादिरो यूपो भवति	नियम	10-7-14	8
चित्रया यजेत पशुकामः	अपूर्व	1-4-3	4
ज्योतिष्टोमेन स्वर्गकामो यजेत	अपूर्व	2-2-1; 4-4-12	8,57
त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति	अर्थवादः		9
तावब्रूतामग्नीषोमौ	परिसंख्या	2-2-4	8
	संकीर्णापूर्वविधिः	10-8-16	57
तं त्रिरात्रेण (?)	अपूर्व	2-3-10	5,17
तं द्विरात्रेण	अपूर्व	2-3-10	5,17
त्रेधा तण्डुलान्	अपूर्व	6-5-1	17,33,56
दण्डी प्रेषानन्वाह	परिसंख्या	4-2-6 10-2-30	15,24,74
दधि मधु	अपूर्व	1-4-3	4
दध्ना जुहोति	अपूर्व	2-2-2	44
दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत	अपूर्व	2-2-2 4-4-11	10
दीक्षा सोमस्य	परिसंख्या	3-7-5	75,84
दीक्षितो न जुहोति	अपूर्व	10-8-7	16,72,80,81
द्यावापृथिव्य एककपालः	अपूर्व		55,65

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
द्वे आहवनीये जुहोति	अपूर्व		9,10,23
	परिसंख्या		41
न तु कांस्यस्य तापनम्	अपूर्व		84
	परिसंख्या		16,82,83
नतौ पशौ करोति	अपूर्व	10-8-2	16,28.72
	परिसंख्या		80,82
न नीलवसनं धार्यं न भूपालैरनुत्सवे	परिसंख्या		16
न सुरां पिबेत्	नियम		72
न हिंस्यात् सर्वा भूतानि	नियम		71,71,80
नातिरात्रे षोडशिनं गृह्णाति	अपूर्व	4-1-2	16,72,80
नानृतं वदेत्	नियम	1-1-6 (कौस्तुभे) 1-2-4	72,80
पञ्च पञ्चनखा	परिसंख्या	1-2-4	30,70,71, 79,81
पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते	नियम	9-1-9	79,81
पत्निसंयाजान्तः अग्निषोमीयस्सन्तिष्ठन्ते	अपूर्व		
परिधौ पशुं नियुञ्जीत	नियम	10-3-3	36,60,66
पुरोडाशं प्रथयति	नियम		59,66
पृष्ठैरुपतिष्ठते	अपूर्व	7-3-1	44
पृष्ठ्यष्षडहो बृहद्रथन्तर-सामा कार्यः	अपूर्व	10-6-3	18,33,62,68
प्राजापत्यं घृते चरुं निर्वपेच्छत--कृष्णलमायुष्कामः	अपूर्व	8-1-9 10-1-1	21
प्रातर्जुहोति	परिसंख्या	11-2-1	77
बृहत्पृष्ठं भवति	नियम	10-6-6 10-7-14	12,20,24,41

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
भिन्ने जुहोति	अपूर्व	6-4-4 6-5-15	55
य एवं विद्वानग्निं चिनुते	अपूर्व	2-3-10	4
यजुर्युक्तं रथमध्वर्यवे ददाति	नियम	10-3-21	14,26,59, 64,79,85
यज्जुह्वां गृह्णाति प्रयाजभ्यस्तत्	नियम		
यदाहवनीये जुहोति	अपूर्व		9,41
यदि बृहत्सामा	परिसंख्या	2-3-1	37,42
यदि रथन्तरसामा सोमः	परिसंख्या	1-3-1	6,18,36,42 61,74,84
यदि सोमं न विन्देत पूतीकानभिषुणुयात्	नियम	6-3-13	21,34,38, 39,60,66
यदुपभृति प्रयाजानुयाजेभ्यस्तत्	नियम		14,26
यद्योन्यां तदुत्तरयोर्गायति	नियम	7-2-1	15,19,33, 59,64
यवैर्यजेत	नियम		12,26,67
यावज्जीवं दर्शपूर्णमासाभ्यां यजेत	अपूर्व	2-4-1	12
यावज्जीवमग्निहोत्रं जुहोति	अपूर्व		4,81,82,84
ये मध्यमाः स्युस्तानग्नये ... ...ये स्थविष्ठाः.... येऽणिष्ठाः....	अपूर्व	6-5-1	51
रथन्तरं पृष्ठं भवति	नियम	10-6-6 10-7-14	12,20,41
रथन्तरे प्रस्तूयमाने संमीलयेत्	अपूर्व	9-2-14	61
वसन्ते वसन्ते ज्योतिषा यजेत	अपूर्व	6-1-11	11
वाग्वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते	परिसंख्या	10-5-17	77,84

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
वेद्यां हवींषि आसादयति	अपूर्व	3-7-1	36,67
वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकामः	अपूर्व	4-4-4	9,23
व्रीहिभिर्जयेत	नियम	1-1-6	12,26,60,67
व्रीहीनवहन्ति	नियम	2-1-4	3,6,8,9,
		3-2-4	16,23
			32,46,51,59
			63,67,78
व्रीहीन् प्रोक्षति	अपूर्व	2-1-5	3,14,29,
			40,52
शंय्वान्ता प्रायणीया सन्तिष्ठते	विधिरसायनमते अपूर्व प्राचीनपक्षे परिसंख्या	10-7-10	56,74,77
शताग्निष्टोमं भवति शतोक्थ्यं भवति	अपूर्व	8-3-4	77
श्येनचितं चिन्वीत स्वर्गकामः	अपूर्व	10-8-11	5
षडहा भवन्ति चत्वारो भवन्ति	अपूर्व	8-3-3	77,84
षोडश्युत्तरे	परिसंख्या	10-5-13	31
सप्तदश सामिधेनीरनु-ब्रूयात्	अपूर्व परिसंख्या	10-8-9	11,13
स प्रियाय सगोत्राय ब्रह्मणे देयः	अपूर्व	10-3-19	63,78
स ब्रह्मणे देयः	अपूर्व	10-3-18	21,63,69,78
सर्वस्तृवृद्भवति	अपूर्व		77
सर्वस्मै वा एतद्यज्ञाय गृह्यते	अपूर्व	10-8-15	14,26
सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः	अपूर्व		10,17,61

विधिवाक्यानि	विधिभेदः	आकरनिर्देशः	पुटम्
सर्वं ब्रह्मणे परिहरति	अपूर्व	10-2-5	33,50,63 78,85
सर्वः पञ्चदश	अपूर्व		77
सायं जुहोति	परिसंख्या	11-2-1	77,84
सृष्टीरुपदधाति	नियमसंकीर्णा-पूर्वविधिः	1-4-17	57
सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति	अपूर्व		54
स्वाध्यायोऽध्येतव्यः	नियम	1-2-1	10
(अग्नये) स्विष्टकृते समवयति	परिसंख्या	12-3-2	13
हिरण्यगर्भस्समवर्तताग्र इत्याघारयति	नियम	10-3-2	21,35,35 38,39,52, 60,65,69
हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामाय	नियम	2-2-13	59